सप्तमाध्याय

शांकरभाष्य
आनंदगिरिकृतटी०
स्वामिकृता श्रीधरी
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
कुसुमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
तात्सिकी
पंचोली ॥

भाषाअनुवाद ॥

श्रीभगवानुवाच मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्र
यः असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

शाङ्करभाष्यं

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो म
त इति प्रश्नबीजमुपन्यस्य स्वयमेव ईदृशं मदीयं तत्त्वमेवं मद्गतान्तरात्मा ।
स्यादित्येतद्विवक्षुर्भगवानुवाच मयीति मयि वक्ष्यमाणविशेषणे परमेश्व
रे आसक्तं मनो यस्य स मय्यासक्तमनाः हे पार्थ योगं युञ्जन् मनःसमाधानं
कुर्वन् मदाश्रयः अहमेव परमेश्वर आश्रयो यस्य स मदाश्रयो यो हि कश्चित्
पुरुषार्थेन केनचिदर्थी भवति स तत्साधनं कर्माग्निहोत्रादि तपो दानं वा
किंचिदाश्रयं प्रतिपद्यते अयं तु योगी मामेवाश्रयं प्रतिपद्यते हित्वान्यत्सा
धनान्तरं मय्येवासक्तमनाः भवति यस्त्वमेवम्भूतः सन् असंशयं समग्रं
समस्तं विभूतिबलशक्त्यैश्वर्यादिगुणसम्पन्नं मां यथा येन प्रकारेण ज्ञा
स्यसि संशयमन्तरेण एवमेव भगवानिति तच्छृणूच्यमानं मया ॥ १ ॥

आनन्दगिरिकृतटीका

कर्मसंन्यासात्मकसाधनप्रधानं त्वंपदार्थप्रधानं वा प्रथमषट्कं व्याख्या
य मध्यमषट्कं मयास्तनिष्ठं तत्पदार्थनिष्ठं वा व्याख्यातुमारभमानः सम
नन्तराध्यायमवतारयति योगिनामिति अतीताध्यायान्ते नान्तरात्मना यो भ
जते मामिति प्रश्नबीजं प्रदर्श्य कीदृशं भगवतस्तत्त्वं कथं वा मद्गतान्तरा
त्मा स्यादित्येतस्य प्रश्नद्वये जाते स्वयमेव भगवानपृष्टमेव तदु
क्तं इच्छन्नुक्तवानित्यर्थः परमेश्वरस्य वक्ष्यमाणविशेषणं सकलजग
दायतनत्वादिनानाविधविभूतिभागित्वं तत्रासक्तिर्मनसो विषयान्तर
परिहारेण तन्निष्ठत्वं मनसो भगवत्येवासक्तौ हेतुमाह योगमिति वि
षयान्तरपरिहारे हि गोचरमालोच्य मानो भगवत्येव प्रतिष्ठितो भवतीत्य
र्थः तथापि स्वाश्रये मुमुक्षोर्मनः स्थापयति नान्यत्रेत्याशंक्याह मदाश्र
य इति योगिनो यदीश्वराश्रयत्वेन तस्मिन्नेवासक्तमनस्त्वमुपन्यस्तं तद

पर्यायेति योऽहीति ईश्वराख्याश्रयस्य प्रतिपत्तिमेव प्रकटयति हित्वेति अन्ययो
गिनस्त्वदाश्रयप्रतिपत्त्या मनसस्त्वय्यासक्तिस्तथापि मम किमायातमित्या
शंक्य द्वितीयार्द्धं व्याचष्टे यस्त्वमेवमिति एवम्भूतो यथोक्तध्यानोनिष्ठ
हत्यवदेवमभ्यासक्तमनाः यस्त्वं सत्यं तथाविधः सन्नसंशयमविद्यमानः
संशयो यत्र ज्ञाने तद्यथा स्यात्तथा मां समग्रं ज्ञास्यसीति सम्बन्धः समग्रमि
त्यस्यार्थमाह समस्तेति विभूतिर्नानाविधैश्वर्योपायः सम्पत्तिः बलं श
रीरगतं सामर्थ्यं शक्तिर्मनोगतं प्रागल्भ्यं ऐश्वर्यमीशितव्यविषयमीश
नसामर्थ्यं आदिशब्देन ज्ञानेच्छादयो गृह्यन्ते असंशयमिति पदस्य क्रिया
विशेषणत्वं विवक्षयन् क्रियापदेन सम्बन्धं कथयति संशयमिति वि
नासंशयं भगवत्तत्त्वपरिज्ञानमेव स्फोरयति एवमेवेति भगवत्तत्त्वज्ञान
वे कथं मम ज्ञानमुपदेशं विना नहि त्वामृते तदुपदेष्टा कश्चिदस्तीत्याशं
क्याह तच्छृणुवेति १ ॥

स्वामिकृतटीका

विज्ञेयमात्मनस्तत्त्वं सयोगं समुदीरितं भजनीयमथेदानीमैश्वरं रूपमीर्यते
सर्वाध्यायांतेमहत्तेनांतरात्मना यो मां भजति स मे युक्ततमो मत इत्युक्तं तत्र की
दृशस्त्वं यस्य भक्तिः कर्तव्येत्यपेक्षायां स्वस्वरूपं निरूपयिष्यन् श्रीभगवानु
वाच मयि परमेश्वरे आसक्तमभिनिविष्टं मनो यस्य स मदाश्रयः अहमेवा
श्रयो यस्य सः अनन्यशरणः सन् योगं युञ्जन् अभ्यसन् असंशयं यथा
भवत्येवं मां समग्रं विभूतिबलैश्वर्यादिसहितं यथा ज्ञास्यसि तदिदं मया व
क्ष्यमाणं शृणु १ ॥

पिशाचभाष्यटीका

योगिनामित्यादिश्लोकेन प्रश्नबीजमुपन्यस्य तस्य यमेव हर्षं मदीयं तत्त्वमहं तान
रात्मस्यादित्यनाहि वक्तुर्भगवानुवाच मय्यासक्तमनाः पार्थेत्यादि मयि वक्ष्य
माणविशेषणे परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः पार्थ योगं यु
ञ्जन्मनसः समाधानं कुर्वन् मदाश्रयः योगे प्रवृत्तो येन केनचित्पुरुषार्थेन तत्साधनं
कर्माग्निहोत्रादि तपो दानं किंचिदाश्रयं प्रतिपद्यते अयं तु योगी मामेव मा आश्र
यं प्रतिपद्यते हित्वान्यत्साधनान्तरं मय्येवासक्तमना भवति यस्त्वेवंभूतस्सो

वपरमेश्वराश्रयो
मदाश्रयः

हे॰

संशयं समग्रं समस्तविभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नं यथा येन प्रकारेण एवमेवायं भगवानिति ज्ञास्यसि तच्छृणु ॥ १ ॥

रामानुजभाष्यटीका

प्रथमेनाध्यायषट्केन परमप्राप्यभूतस्य परस्य ब्रह्मणो निरवद्यस्य निखिलजगदेककारणस्य सर्वज्ञस्य सत्यसंकल्पस्य महाविभूतेः श्रीमतो नारायणस्य प्राप्त्युपायभूतं तदुपासनं वक्तुं तदङ्गभूतमात्मज्ञानपूर्वककर्मानुष्ठानसाध्यं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनमुक्तं इदानीं मध्यमेन षट्केन परब्रह्मभूतपरमेश्वरस्वरूपं तदुपासनं च भक्तिशब्दवाच्यमुच्यते तदुत्तरत्र यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्यारभ्य विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परामिति वक्ष्यति उपासनं तु भक्तिमत्राभिहितं यत्तद्वेदपरमप्राप्त्युपायभूतमिति वेदांतवाक्यसिद्धं तमेव विदित्वातिमृत्युमेति तमेवं विद्वानमृत इह भवतीत्यादिनाभिहितं वेदनं तु आत्मा वारे द्रष्टव्यो निदिध्यासितव्यः आत्मानमेव लोकमुपासीत सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्षः भिद्यते हृदयग्रंथिरिति विवेकात् स्मृतिसंतानरूपं दर्शनसमानाकारं ध्यानमुपासनशब्दवाच्यमित्यवगम्यते नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति विशेषेणानन्यरेणात्मना वरणीयताहेतुभूतं स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रियरूपं स्मृतिसंतानमेवोपासनशब्दवाच्यमिति ज्ञायते तदेव हि भक्तिरित्युच्यते स्नेहपूर्वमनुध्यानं भक्तिरित्युच्यते बुधैरिति वचनात् अतस्तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यते नाहं वेदैर्न तपसा न दानेन न चेज्यया शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप इत्यनयोरैकार्थ्यं सिद्धं भवति तत्र सप्तमेन तावदुपास्यभूतपरमपुरुषस्वरूपयाथात्म्यं प्रकृत्या तिरोधानं तन्निवृत्तये भगवत्प्रपत्तिरुपासकविधाभेदा ज्ञानिनः श्रै

संचोच्यते मयीति मय्याभिमुख्येनसक्तमनाः मत्प्रियत्वातिरेकेणमत्स्वरूपे
णश्रीः चेष्टितेनमद्विभूत्यादिविशेषेस्तन्निनत्त्वादेवविशीर्यमाणस्वभाव
तयामयिसुगाढबद्धमनामदाश्रयस्तथास्वयंचमयाविनाशीर्यमाण
तयामदाश्रयस्मदेकाधारः मद्योगंयुंजन्नुक्तप्रवृत्तोयोगविषयभूतं
मामसंशयंनिःसंशयंसमग्रंसकलंयथाज्ञास्यसियेनज्ञानेनोक्तेन
ज्ञास्यसितज्ज्ञानमवहितमनाः शृणु १ ॥

श्रीअभिनवगोस्वामीकृतटीका ३ उपक्रमं १ स्वार्थं

परमार्थप्रपा टीका

सर्वाध्यायांतेमद्गतेनांतरात्मनेत्यादिनाभ्यासयोगेनकृत्वादित्वावक्ष्ये
नांतर्यामित्वेनस्थितस्यस्वस्वरूपस्यप्रतीतिमभिधायेदानींसर्वात्मकत्वे
नानेस्थितस्यप्रतीतसाधनोपायंदर्शयन्स्वमायावैभवमैश्वर्यंचप्रकटी
करोति ॥ मयीति मयिपरमेश्वरेआसक्तमनाःहतमनोयस्यसतथाम
दाश्रयः अहमेवाश्रयोयस्यमदेकपरायणःसन्योगंयुंजन् अभ्यस
न् असंशयंयथाभवतितथामासमग्रंविभूतिबलशक्त्यैश्वर्यादिस
हितंयथाज्ञास्यसितदिदंमयावक्ष्यमाणंशृणुसर्वोपिदृढयोगाभ्यासो
हिमहत्तरंकार्यंतदाश्रयव्यतिरेकेणनिर्विघ्नंनसेत्स्यतीतिकृत्वामा
माश्रयमवलंब्यप्रवृत्तस्यसुखोपायेनयोगसिद्धिर्भवतीत्यर्थः १ ॥

वनमाली टीका ॥

[illegible]नेकर्मचसंन्यासेयोगभक्तीरमापतिः स्वप्रामये
वदन्षड्भिर्भक्तिःसम्मुखतानतः १ प्रागिजीवस्वरूपंचाविर्भूतंस्वप्रसा
दनःस्वप्रसादाद्विद्यायाजीवस्यायानिवर्त्तनं १ भक्तिविर्हृदयेष्ये॰
षाः[illegible]सदननगणालयं योगिनांध्यानगम्यंयतद्भवीतिरमाध
वः १ सतमेस्वस्वरूपस्याधामसंपक्तुवदाकृतिः स्वप्रसादाद्विहृ॰
ज्ञिस्वजीवस्यतिनिरूप्यते ४ यदाघपणःपश्यपनेत [illegible] कर्मवर्णंकर्ता
रमीशंनदाविद्वान् पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैत्यमा य॰
रि॰ नेप्रेरणारंचमत्वाजघ्नुस्ततस्तेनाम्रतत्वमेति नमात्मस्वरूपेणपश्य
निधीरास्तेषांशांतिःशाश्वतीनेतरेषांतरतिशोकमात्मवित् नमे

मुपैत्य॰

वविदित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनायेति श्रुतिभिर्भगवज्ज्ञान
स्यैव मोक्षहेतुत्वमुक्तं न च ज्ञानाविच्छिन्नस्नेहसंततिसहितं निश्चयात्मकम
परोक्षं मोक्षहेतुरपरोक्षस्य दैन्यानां हेतुत्वेन तज्ज्ञानतत्पराणां केषांचि
तंघ्रापस्म दसित्सद्भावात् संशयात्मा विनश्यतीति भगवतानिष्टहेतुत्वेनोक्ता प
रोक्षं तु विषयिणामप्यस्तीति विशेषणत्रयमुक्तं अतएव सर्वयोगिषु
ने मद्गतेनांतरात्मनेत्यनेन स्नेहपूर्वकज्ञानवतः श्रेष्ठत्वमुक्तं सर्वोत्तमत्वता व
नेस्नेहधारासहितेनाहंयज्ञानसहितोऽविच्छिन्नस्नेहप्रवाहो वा भक्तिः
सा च सद्गुणाधिक्यज्ञानादलौकिकस्य वस्तुनो ज्ञानं च लक्षणज्ञानात्
भवति अतो भक्तवात्सल्यादयः सद्गुणा जगदुदयादिकर्तृत्वादिकं च
लक्षणमित्येतन्नहृदयंगमत्वमर्ज्जुनेनाष्टमप्यातिकार्हाणोको विवक्ष
राहमधीति मयि परे जगदुदया दिर्ल्लीलसकलजगदायतनत्वादि
विविधविभूतिमति कारुण्यौदार्यसौशील्यभक्तवात्सल्यसौंदर्यला
वण्याद्यनंतामितसद्गुणे असक्तं विषयांतरपरिहारेण रागिणां विष
द येष्विव स्वाभाविकं मनो मयि यस्य तं वसतं मदाश्रयो मदेकशरणः रा
जाश्रयो भार्यायासक्तस्य राज्ञः भृत्यः प्रसिद्धो मद्भक्तस्य मदाश्रयो मदा
सक्तमनास्त्वं त्वद्विधो वान्यः योगं युंजन्मनःसमाधानं चेष्टोक्तप्र
कारेण मयि कुर्वन् असंशयं यथा स्यात्तथा समग्रं स्वापरोक्षयोग्या
शेषगुणविशिष्टं यथा येन प्रकारेणापरोक्षीकरिष्यसि तथा तं प्रका
रं शृणु त्वद्योग्याशेषगुणवर्णनेन तत्तेषां श्रवणमनननिदिध्यास
नैर्मत्प्रसादसहितैरपरोक्षं तत्स्यात् गुणानंततास्यापि यथास्वतः
परोक्षस्यापि षड्जादिस्वरस्य गांधर्वशास्त्रवासितेन श्रोत्रेणापरोक्षं त
था स्वतः परोक्षस्यापि स्वयोग्यानंतगुणविशिष्टस्य हरेः श्रवणमन
ननिदिध्यासनवासितेन मनसापरोक्षं अर्ज्जुनमप्यलब्धीकृत्यपक्ष
पायान्यां मम मद्भक्तसंसारार्णवाज्जहेतुमुपदिशति नतज्ज्ञानमेवोढ
र्द्धतस्य न राजवत्तारस्य जीवन्मुक्तत्वादिति भावः १ ॥

ज्ञसमवैजयंतीटीका

समेमेव वर्णितेस्वस्य स्वरूपं ध्यानगोचरम् भक्तानांचाप्यभक्तानांचान

गी॰
टी॰
स॰

5

विद्धं निरूपितं १ इत्येवं तावत्प्रथमषट्केन परमपुरुषस्य सर्वेश्वरस्य सर्व
नियंतुर्जगत्कारणस्य भगवतः प्राप्त्युपायभूतमात्मस्वरूपावलोकनं
फलानुसंधानरहितं ज्ञानगर्भकं कर्मयोगं चोक्त्वेदानीं द्वितीयष
ट्केन परमेश्वरस्य परब्रह्मणः पुरुषोत्तमस्य तत्त्वरूपं तस्योपासनं भक्तिप्र
वृत्तिभेदं च वक्ष्यते तत्र सप्तमे ऽध्याये भगवदुपासकस्यानेकविधभेदाज्ज्ञा
निनः श्रैष्ठ्यं चोच्यते षष्ठाध्यायांते योगिनामपि सर्वेषां मद्गतेनांतरात्म
ना श्रद्धावान्भजते यो मां स मे युक्ततमो मत इत्युक्तो मदुपासकस्य भ
जनो भजनार्हस्य च तत्स्वरूपं कीदृशं कथं वा तस्यांतरात्मत्वं ज्ञातो भवतीत्ये
वमर्जुनेनापृष्टोपि भक्तवात्सल्यविवशः सन् तदुपरिज्ञापनं कृत्वा ।
स्वयमेव तदाशयाभिज्ञो भगवानुवाच मयीति मयि सर्वेश्वरे सर्वोपा
स्येवेदांतैकवेद्ये जगदभिन्ननिमित्तोपादानकारणे आसक्तं सर्वस
म्बंधानुसंधानविषयतया निरतिशयस्नेहेन निबद्धं सर्वसंकल्परू
पं मनो यस्य स तथा पितृमातृभ्रातृकलत्रपुत्रमित्रधनधामादिसंबंध
नित्यत्वनिश्चयेन मय्येव नित्यसर्वस्वरूपे निरतिशयप्रेष्ठत्वेन दृढतया नि
बद्धसकलसंकल्पमना इत्यर्थः यद्वा यथेह कर्मचितो लोकः क्षीयते
एवमेवामुत्र पुण्यचितो लोकः क्षीयते ब्राह्मणो निर्वेदमायादित्यादि
श्रुत्यर्थविवेकात्सर्वप्राकृतलोकानां तत्संबंधिभोगानां च विनश्वरत्व
निश्चयेन मय्येवैकस्मिन्नासक्तमना इत्यर्थः यद्वा मम रूपगुणादिश्र
वणेन गृहकुटुंबादिभ्यश्छिन्नोपि मय्येवासक्तचित्तः नन्वेवंरूपः कुतो
भवतीत्यपेक्षायामाह यतो मदाश्रयः अहमेवाश्रयः परायणं यस्य त
थासः मदितरदेवभावरहितो मदितरेभ्यो देवेभ्यो मन्नाममये भक्तिज्ञा
नादिसाधनव्याप्त्या विरहितो मत्प्राप्तीतरफलकामशून्यो मदितरैः स
हादिभिः सह मित्रस्वाम्यादिसंबन्धशून्यो मदनन्यभक्त इत्यर्थः योगं
युञ्जन् कर्मज्ञानभक्तिरूपकं योगं कुर्वन् सन् योगी त्वं असंशयं परं तत्त्वं
किंस्वरूपवानो ऽन्यो देवो वेत्येवंरूपसंदेहशून्यो यथा भवति तथा सम
ग्रं सकलगुणशक्तिविभूत्यैश्वर्यबलपौरुषादिसंपन्नं मां सर्वेश्वरं व
सुदेवनंदनं यथा येन प्रकारेण ज्ञानेन ज्ञास्यसि वेदिष्यसि तज्ज्ञानं
मद्विषयं मयोच्यमानमवहितमनाः शृणु १ ॥

नत्

यद्भक्तिंनविनामुक्तिर्यः सेव्यः सर्वयोगिनाम् तंवंदेपरमानंदघनंश्रीनंदनंदनम् एवंकर्मसंन्याससात्मक
साधनप्रधानेनप्रथमषट्केन त्वंपदलक्ष्यंसयोगंव्याख्यायाधुना ध्येयब्रह्मप्रतिपादनप्रधानेन
मध्यमेनषट्केन तत्पदार्थोव्याख्यातव्यः तत्रापियोगिनामपि सर्वेषांमद्गतेनान्तरात्मना श्रद्धा
वान्भजतेयोमांसमेयुक्ततमोमत इति प्रागुक्तस्य भगवद्भजनस्य व्याख्यानाय सप्तमोध्याय आ
रभ्यते तत्रकीदृशंरूपंभगवतोभजनीयं कथंवा मद्गतेनान्तरात्मा स्यादित्येतद्द्वयं पृष्टव्यमर्जुनेना
पृष्टमपि परमकारुणिकतया स्वयमेवविवक्षुर्भगवानुवाच ॥

मधुसूदनीटीका

मयिपरमेश्वरेसकलजगदायतनत्वादिविविधविभूतिभागिनिआसक्तं
विषयांतरपरिहारेणसर्वदानिविष्टंमनोयस्यसत्वंमय्यासक्तमनाः तथामदा
श्रयोमदेकशरणः राजाश्रयोभार्याद्यासक्तमनाश्चराजभृत्यः प्रसिद्धः मु
मुक्षुस्तुमदाश्रयोमदासक्तमनाश्चत्वंतुहियोगीवा योगंयुंजन्मनः समा
धानंषष्ठोक्तप्रकारेणकुर्वन्प्रसिद्धंयथाभवतितथासमग्रंसर्ववि
भूतिबलशक्त्यैश्वर्यादिसंपन्नंमांयथायेनप्रकारेणज्ञास्यसितच्छृ
णुउच्यमानंमया १ [illegible]
[illegible] ॥

सदानंदीटीका

ॐघनश्यामंवामंस्तननतमभिरामंकृतयतिंश्रियोधामाकामंविमल
सवरामंमुनिगणैः सदामाधारामंविधिहरललामंकृतिमतंश्रये
रामारामंभवानिविरामंगजरतिं १ ज्ञेयंव्याख्यायषट्केनत्वंपदार्थमथा य४
धुना ध्येयंज्ञेयसमादेयंतत्पदार्थंवदत्यजः २ षट्कस्यातेनयथेन
भक्तियोगोहिसूचितः विवरीतुंतमाध्यायषट्केनारभतेहरिः ३ ब्रह्म
विद्याप्रधानांगोयोगोभगवतेरितः इदानींसर्वयोगानामन्तमोयोग
उच्यते ४ इत्यनन्यानकामेहिसत्यप्यैकमत्यतः व्याख्यायंतेचिदा
नंदपदाम्भोजरजःश्रियः ५ भक्तियोगोहियोगानामन्तमोभगवत्प्रि
यः भगवत्कृपयासाक्षात्जायतेहृदिदेहिनां ६ कर्मभ्रष्टाजनालोके
जायंतेजन्मसंसृतौ योगभ्रष्टाश्चजायंतेशुचीनांश्रीमतांकुले ७
नारायणपदाम्भोजरजःश्रीप्रेमसंभृते भक्तियोगेसकृत्तस्यप्रवेशः
पुण्यपुंजतः ८ भ्रष्टःपार्थन्यपरिभ्रष्टोनान्विष्टोपीहलभ्यते अनुसक्त्वहृ
योपितोनारायणपदांबुजे ९ भजेदनन्ययाभक्त्यानैवंतन्नैर्गुण्यसज्जनः
तत्रश्रीहरिरेवादौभजनीयस्वरूपतः १० कीदृशंभजनंतस्यतद्गतेनां
तरात्मना कथमित्येवमाकांक्षामालक्ष्यार्जुनस्यच ११ स्वयंवाक्य
मवाचेदंवदमानंकृपानिधिः मयीश्वरेहरौसाक्षाज्जगज्जन्मादिका
रणे १२ समासक्तंमनोयस्यसत्यकानिर्विषयंसदा ऊर्ध्वंश्रितसमाधा

गी॰ टी॰ स॰ तेमांसमाश्रित्यसर्वदा १४ ईदृशात्वंहिमामीशंभगवंतिमयोच्यते सम
ग्रैश्वर्यसंपन्नंयथाज्ञास्यसितन्मया उच्यमानंशृणुस्वेष्टंनिःसंदेहमन
यार्जुन १५ १ ॥

5

नीलकंठीटीका

पूर्वाध्यायांतेयोमांभजतेसमेयुक्ततमोमतइत्युक्तं तत्रकीदृशात्पूर्वोक्त
निष्कामकर्मयोगापेक्षयाविलक्षणेनवाभजनंकेनवागुणेनपूर्वयोगा
पेक्षयातस्ययुक्ततमत्वमित्येतामर्जुनशंकांस्वयमेवपरिहरन्भगवा
नुवाच मय्यीति कश्चिद्राजाश्रयोधनमानासक्तमनाभवति अयंतु
मदाश्रयेणमामेवपरमपुरुषार्थभूतंप्राप्तुमिच्छन्नित्यर्थः ईदृशोयो
गंयुंजन्समाधिमनुतिष्ठन् त्वंपदार्थविवेककालेयद्यपिसार्वज्ञ्यम
स्तिसर्वभूतस्थमात्मानमित्यादिवचनात्तथापितस्मादन्यईश्वरोस्ति
नवेतिपातंजलकापिलयोस्तार्किकमीमांसकयोर्वासेश्वरानीश्वर
योर्मतभेदात्संशयःकारणज्ञानाच्चासमग्रंतत्सार्वज्ञ्यमितिमत्वाआ
ह असंशयंसमग्रमितिमांतत्पदार्थमीश्वरंयथाज्ञास्यसितत्तंप्रका
रंशृणु अग्रेवक्ष्यमाणरीत्यासर्वंब्रह्मवासुदेवात्मकमितिभजनेनैवल
१८ क्षणंप्रकारंज्ञानंतत्त्वमस्ययोगिनःपूर्वयोगापेक्षयाआधिक्यमितिभा
वः १ ॥

आनन्दीटीका

अथात्रलक्षणपर्वणिश्रद्धावान्भजतेयोमामितिपूर्वाध्यायोक्तिमंथनेनज्ञा
नकर्मसमुच्चयानुष्ठानोपायेनसंयमेनपरमोध्येयस्सर्वासांप्रकृतिविकृ
तीनामधिष्ठातुःपरमेश्वरस्यस्वरूपंलक्षयितुंश्रीभगवानुवाच ॥ मयि
परमेश्वरेआसक्तोयोक्तक्रमेणसंयमेनदृढीकृतंयत्तिदृढंमनोयेनस
त्वंयोगमष्टांगंयुंजन्नभ्यस्यन्मदाश्रितोमदेकपरायणःमांवासुदेवंपर
मेश्वरंसमग्रंवक्ष्यमाणेनप्रकृतिपुरुषकालेश्वराणामैक्यात्म्येनव्यक्ता
व्यक्तात्मकंअसंशयमन्योन्यविभिन्नार्थप्रतिपादकैःएषएवकस्मान्न
त्वान्यामित्येवंत्वादितंसंशयंपुरीकृत्ययथाज्ञास्यसितथामयोच्यमानं
शृणुसावधानमवधारय १ ॥

रामकणीटीका

एवंयदंगभावमापन्नानांयोगानांयोगत्वसिद्धिस्तस्यज्ञानकर्मसमु
च्चयरूपस्यानिरतिशयस्ययोगस्यानुष्ठातुर्मद्भक्तस्यकर्मयोगिनोपिसततलब्धे
यथोक्तोविघ्नतएवेत्यात्मनएवजगत्कारणत्वादिप्राकट्यचिनप्रायंतेया
तरंस्कन्दनयाप्रतिपादयितुंभगवानुवाच ॥ षष्ठाध्यायेपरिसमाप्तो
मद्गतेनांतरात्मना योमांभजतिसयुक्ततमइतियदुक्तंतदेवमध्यास
क्तमनामदाश्रितश्लोकेनेनपदद्वयेनेहानूदितम् ततश्चमत्स्वरूपंता
न्ते त्वामांभजन्स्वयथायेनप्रकारेणसंदेहरहितंकृत्वासमग्रंसंपूर्णास्वरू
पंमांज्ञास्यसिप्रतिपत्स्यसेतदिदानींश्रुणु श्रुयंहिजगत्प्रपंचःस्वतःसि
द्धनित्यप्रधानपरिणामतयाकश्चित्प्रतिपन्नोन्यैःपरमाणुपाकप्रभ
वत्वेन इतरैःक्षणिकज्ञानसंतानभ्रमजन्यतया परैश्चान्यथाचेति
किमत्रतत्त्वंस्यादित्यस्तिसंशयावकाशः तन्निरासायार्थेवेदवक्ष्यमाण
मवधारय तदवधारणादेवचसमग्रमत्स्वरूपंज्ञातंभविष्यतीत्याह १

लासिकीदलक्ष्मीटीका

एवंप्रथमाध्यायषट्केनत्वंपदलक्ष्यस्ययोगप्रकारंबोधंव्यक्तमभिधाय प्रा
कृतिमादितत्प्रायंतत्पदार्थतयास्त्येयमैश्वररूपंभजनीयं जीवन्मुक्तप
दामयेमध्यमाध्यायषट्केनविवक्षुःश्रीभगवानुवाच ॥ मयिप्रेमा
न्ते न्तिक्षासक्तंबुध्यानेसम्यग्निविष्टंमनोमननात्मकंयस्यसः तथायो
गंमुक्त्वायोगंसमाधिरूपंयुंजन्नभ्यस्यस्तथामदाश्रयःसन् अहमेवा
श्रयवाश्रयःशरणंयस्यसभक्त्यामांसमाश्रितइत्यर्थः संदेहरहितं
समग्रं कृत्वामामीश्वरंसंपूर्णस्वरूपंविभूतिबलैश्वर्यादिसहितंयथाज्ञास्य
सित्वात्मतयाप्रत्यभिजानासि तदिदानींवक्ष्यमाणंश्रुणु १ ॥

विशेषमात्मनलब्धस्ययोगं
तस्तुदीरितम् भजनीयमथेदा
नीमैश्वर्यरूपमीर्यते +

पंचोलीटीका

षष्ठाध्यायांतेमद्गतेनांतरात्मनायोमांभजतेसमेयुक्ततमोमतः
इत्युक्तेतत्रकीदृशस्त्वयस्यभक्तिःकर्तव्याकथंचत्वद्गतांतरात्मा
त्वांभजतिइत्यर्जुनस्यप्रश्नेहृदिकृत्वातन्निरूपयितुंभगवाना
ह मयीति हेपार्थमय्यासक्तमनाःमयिवर्तमानविशेष

गी॰
टी॰
स॰

ऽपि परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः अहमेव पर॰
मेश्वरो आश्रयो यस्य स नाग्निहोत्रादिकर्म तपो दानं वा पुरुषार्थ
साधनं आश्रयते स मदाश्रयः योगं युंजन् मनःसमाधानं कुर्वन्
एवंभूतस्त्वम् असंशयं समग्रं समस्तविभूतिबलशक्त्यैश्वर्यादि॰
गुणसंपन्नं यथा येन प्रकारेण ज्ञास्यसि एवमेव भगवानिति तत्प्र
कारं मया उच्यमानं शृणु १

6

तत्त्वदीपिका

विज्ञेयमात्मनस्तत्त्वं सयोगं समुदीरितं भजनीयमथेदानीमैश्वरं रूप
मीर्यते एवं प्रथमेनाध्यायषट्केन त्वंपदलक्ष्यस्तयोगप्रकारं वोद्धव्यम्
अभिधाय अवशाक्यप्रतिपादितप्रायं तत्पदार्थं तयाज्ञेयमैश्वरं रूपं भजनी
यं नीयस्तुतिपदात्मयेमध्यमाध्यायषट्केन विविक्षुः प्रथमं तावदात्म
विद्यां सकलकल्याणैः समृद्धिविहं मनो मननात्मकं यस्य सः तथायो
गं युंजन् योगं समाधिरूपं [illegible] अहमीश्व॰
र एवाश्रयः शरणं यस्य स मदाश्रयः मामसमाश्रितः सर्वैः [illegible]
[illegible] सर्वविभूतिबलैश्वर्यादिसहितं यथा ज्ञास्य॰
सि [illegible] तदिदानीं [illegible] शृणु अवधानम
एकाग्रेण चेतसा १

श्रीवीरमत्सिद्धोधिनी॥

श्रीकार्तवीर्यार्जुनाय नमः योमां भजते स मे युक्ततमो मत इत्यु
क्तस्य भजनस्य व्याख्यानाय सप्तमोऽध्याय आरभते तत्र कीदृशं
भगवतो रूपं भजनीयं कथं वा तज्ज्ञातोन रात्मास्यादित्यपेक्षाद र्जुनेन
प्रष्टव्यमदृष्टमपि परमकारुणिकतया स्वयमेव विवक्षुर्भगवा
नुवाच मयीति मयि परमेश्वरे आसक्तं मनोऽन्तःकरणं यस्य सता
दृशः सन् योगं कर्मयोगं युंजन् प्रयुंजानः मदाश्रयः अहमेवाश्रयो
यस्य मत्प्रसादार्थं येन कर्मणि प्रवृत्तः सन् त्वमसंशयं निःसंदेहं य
था स्यात्तथा समग्रं संपूर्णं सर्वविभूतियुक्तं निःशेषं च यथा मां ज्ञास्य
सि तन्मयोच्यमानं शृणु १॥

गुभाष्य

सायनंप्राधान्येनोक्तमतीतैरध्यायैः उत्तरेस्तुषड्भिर्भगव
न्माहात्म्यमेवप्राधान्येनाह आसक्तमनाअतीवसक्तेदृशुक्तम
नाः मदाश्रयः भगवानेवमयासर्वंकारयति सएवचमे
परायणं तस्मिन्नेवाहंस्थितइतिस्थितः असंशयंसमग्रमिति
क्रियाविशेषणं इदंमहिषयं ज्ञानंविज्ञानंविशेषज्ञानं दैले
भ्यंज्ञानस्याह १॥

1.

भाषाअनुवाद

अथ इस अध्याय मे भजनीय ईश्वर का स्वरूप कहते हैं कि जो छठे अध्याय के अंत मे कहा कि मदात्मक होय जो मेरी भजन करै है सो उत्तम है इस पर जो कहो कि सो भगवान कैसे है जिन की भक्ति करना चाहिये इस अभि प्राय पर अपने स्वरूप का निरूपण करने के अर्थ श्रीकृष्ण अर्जुन से कहते है कि हे अर्जुन मेरे मे जिस का मन लगा है और मेंही हैं अवलम्ब जिस के असे अनन्य शरणागत होय योगाभ्यास करने के अनंतर संशय रहित समग्र कहे विभूतिबल ऐश्वर्य्य सहित मेरे रूप को जैसे जानि सकेगा सोई मेरे वचन तुम श्रवण करो १॥

दोहा

मोमेपार्थ स्वांतदे योगयुंजं मो आश्रित होय संशयनहिज्यों सम
मोहिकोजानेगोसुनसोय १॥

8

ज्ञानंतेहंसविज्ञानमिदंवक्ष्याम्यशेषतः यज्ज्ञात्वानेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते २ ॥

शंकरभाष्यटीका

तच्चमद्विषयं ज्ञानमिति ज्ञानंतेतुभ्यमहं सविज्ञानं विज्ञानसहितं स्वानुभवसंयुक्तमिदं वक्ष्यामि कथयिष्याम्यशेषतः कार्त्स्न्येन न तज्ज्ञानं विवक्षितं स्तौति श्रोतुरभिमुखीकरणाय यज्ज्ञात्वाय तज्ज्ञानंज्ञात्वानेहभूयः पुनःज्ञातव्यंपुरुषार्थसाधनमवशिष्यते नावशेषोभवतीति तत्वज्ञोयः ससर्वज्ञोभवतीत्यर्थः २ ॥

आनन्दगिरीकृतटीका

ज्ञास्यसीत्युक्त्यापरोक्षज्ञानशंकायां तन्निरुत्यर्थं तदुक्तिप्रकारमेव विवृणोति तदेवेति इदमपरोक्षंज्ञानंचैतन्यं तस्यसविज्ञानस्य प्रतिलम्भेकिं स्यादित्याशंक्याह यज्ज्ञात्वेति इदमाचैतन्यस्य परोक्षत्वं व्यावर्त्यते तदेव सविज्ञानमिति विशेषणेनस्फुटय^ यति अशेषतः अनवशेषेण तद्वेदनफलोपन्यासेन श्रोतारं तच्छ्रवणप्रवणं करोति तज्ज्ञानमिति एकविज्ञानेन सर्वविज्ञानस्फूर्तिमाश्रित्योत्तरार्धतात्पर्यमाह यज्ज्ञात्वेति २ ॥

^वर्तमानं स्तौति ज्ञानमिति

स्वामिकृतटीका

^ज्ञानंशास्त्रीयंविज्ञानमनुभवस्तत्सहितंइदंमद्विषयंअशेषतः संकल्पेनवक्ष्यामि यज्ज्ञात्वाइहश्रेयोमार्गेवर्तमानस्यपुनरन्यज्ज्ञातव्यमवशिष्टंनभवतितेनैवकृतार्थोभवतीत्यर्थः सन्नर्तिविनीम ज्ञानंजलभामित्याह २ ॥

पिशाचभाष्यटीका

अथवक्ष्यमाणंमया ज्ञानमिति तस्यमद्विषयंज्ञानंतेतुभ्यमहंसविज्ञानंविज्ञानसहितंस्वानुभवयुक्तमिदंवक्ष्याम्यशेषतः तज्ज्ञानंविवक्षितंस्तौतिश्रोतुरभिमुखीकरणाय यज्ज्ञात्वायज्ज्ञानंज्ञात्वानेह भूयः पुनःज्ञातव्यमवशिष्यतेनतत्वज्ञोयःससर्वज्ञोभव

गी॰ टी॰ स॰

9

तीत्यर्थः १ ॥

रामानुजभाष्यटीका

ज्ञानमिति अहं च तेमद्विषयमिदंज्ञानंविज्ञानेनसहाशेषतोवक्ष्यामि
विज्ञानंविविक्ताकारविषयंज्ञानं यथाहं मद्व्यतिरिक्तात्समस्तचिद
चिद्वस्तुजातान्निखिलहेयप्रत्यनीकतयानवधिकातिशयासंख्येय
कल्याणगुणगणेनमहाविभूतितयाविविक्तः तेनविविक्तविषयज्ञा
नेनसहमत्स्वरूपज्ञानंवक्ष्यामिकिंबहुनायज्ज्ञानंज्ञात्वामयिपुनर
न्यज्ज्ञातव्यंनावशिष्यते १ ॥

ज्ञानविज्ञानेज्ञानक्रियेएवतत्तोनकिंचिदवशिष्यते

अभिनवगुप्तकृतटीका

सर्वस्यज्ञेयस्यज्ञानक्रियानिष्ठत्वात् १ ॥

परमार्थप्रपाटीका

ज्ञानमिति ज्ञानंशास्त्रोत्थं विज्ञानंमद्विषयोनुभवस्तेनसहितंअ
शेषतःसाकल्येनवक्ष्यामि यज्ज्ञात्वाइहश्रेयोमार्गेअन्यत् ज्ञातव्यं
नावशिष्यते ममसाकल्येनसर्वात्मकत्वविज्ञानेनव्यतिरिक्तंकिं
ज्ञातव्यमस्तीत्यर्थः श्रुतिरपि मैत्रेय्यात्मनोवाअरेदर्शनेनश्रव
दं णेनमत्याविज्ञानेनेसर्वंविदितमिति १ ॥

वनमालीटीका

मा वक्ष्यंणंज्ञानंश्रोतुराभिमुख्यायस्तौति ज्ञानमितिइदमुक्तंसगुण
विशिष्टमज्ञानस्वतःपरोक्षस्यापिममप्रसादादिनापरोक्षंज्ञानंवि
ज्ञानेनविविक्ततयाविशेषज्ञानेनसहितंनिखिलहेयशून्यतयान
वधिकासंख्येयकल्याणगुणगणेनमहाविभूतितयाजीवाजडाच्च
यथाहंविविक्तस्तेनविविक्तज्ञानेनसहमत्स्वरूपज्ञानं साधनफ
लादिसहितेननिरवशेषंकथयिष्यामीत्यर्थः यज्ज्ञात्वाप्राप्यमपि
पुनरपिज्ञातव्यंनावशिष्यते स्वयोगपाशेषगुणानामपरोक्षस्यज्ञातत्वा
दितिभावः १ ॥

जस्तमवैजयंतीटीका

नन्वेयनज्ञानेनाहंत्वांसमग्रंज्ञास्यामितंज्ञानंकिंमांत्वंवदेत्यपेक्षायांत
द्वक्ष्यमाणज्ञानंप्रस्तुवन्नाह ज्ञानमिति सविज्ञानंविशेषेणकेवले
नस्वरूपविषयंज्ञानंविज्ञानंविज्ञानेनकेवलस्वरूपविषयकेनसह

वर्त्तमानेयतन्त्सविज्ञाने चेतनाचेतनप्रकृति द्वयविविक्तेनस्व रूपज्ञाने
नसहितमित्यर्थः ननुसर्वव्यापकस्यविभुरूपस्यान्तर्यामिणस्तवचि
दचिदंशद्वयभवनेनसंभवतीतिचेन्नप्रतत्त्वशक्तिमतोभगवतो
ममचिदचिद्द्वयभवनत्वासंभवाभावात् ज्ञानंचेतनाचेतनप्र
व, निष्ठस्वरूपविषयकमिदंवक्ष्यमाणमशेषतःसामग्र्येणेतिम
दनन्यभक्तायतेभ्यमहं सर्वेश्वरोपित्वद्भक्तिविवशोभूत्वापरमंगु
ह्यमपिवक्ष्यामिसकलजनदुर्ध्यानविषयंसर्वजगत्कारणंचयत्स्व
स्यस्वरूपंतस्यज्ञानमात्रंवक्ष्येभगवताप्रतिज्ञातंज्ञानस्यमहत्त्व
माह यदिति यज्ज्ञानंज्ञात्वामद्वचनाच्छ्रुत्वाइहास्मिञ्जगतिश्रेयो
मार्गेवाभूयः पुनर्मत्तोन्यज्ज्ञानंवेदनयोग्यमन्यन्नावशिष्य
तेसर्वेषांज्ञानानांतस्मिन्नेवान्तर्भूतत्वात्किंचिदप्यवशिष्टंनभवति
तेनैवकृतकृत्योभविष्यसीत्यर्थः कारणज्ञानादेवकार्यमात्रस्य
ज्ञानंभवतीतिप्रतिज्ञातंश्रुतिभिरपि तथाहि एकेनमृत्पिण्डेन
सर्वंमृन्मयंविज्ञातंस्यात् [illegible]मणिनाविज्ञातेनसर्वं[illegible]
[illegible] एकेनलोहमणिनाविज्ञातेनसर्वंलोहमयं
विज्ञातंस्यादित्यादिभिः २ ॥

मधुसूदनीटीका

ज्ञास्यसीत्युक्तेः परोक्षमेवतज्ज्ञानंस्यादिति शंकांव्यावर्तयन्नुक्तोतिश्रोतुरभि
मुख्याय ॥ इदंमद्विषयंतेनोऽपरोक्षंज्ञानमसंभावनादिप्रतिबंधेनफलमज
नयत्परोक्षमित्युच्यते असंभावनादिनिरासेनविचारपरिपा
कांतेनैवप्रमाणेनजनितंज्ञानंप्रतिबंधाभावात्फलेजनयदप
परोक्षमित्युच्यते विचारपरिपाकनिष्पन्नत्वाच्चतदेवविज्ञानंतेन
विज्ञानेनसहितमिदमपरोक्षमेवज्ञानंप्रपन्नायतेतुभ्यमहं
परमाप्तःवक्ष्याम्यशेषतः साधनफलादिसहितत्वेननिरवशेषं
कथयिष्यामि श्रौतीमेकविज्ञानेनसर्वविज्ञानप्रतिज्ञामनुसरन्ना
पं ह्ययंज्ञानंनित्यचैतन्यरूपंज्ञात्वावेदांतजन्यमनोवृत्तिविषयीकृत्य
इहव्यवहारभूमौभूयः पुनरपिअन्यत्किंचिदपिज्ञातव्यंनावशि
ष्यते सर्वाधिष्ठानसन्मात्रज्ञानेनकल्पितानांसर्वेषांबाधेसन्मा
त्रपरिशेषात्सन्मात्रज्ञानेनैवत्वंकृतार्थोभविष्यसीत्यभिप्रायः २

गी॰ टी॰ स॰ [illegible] ॥

सदानंदीटीका

तत्कोत्तरणमित्युत्थाय श्लोकानि ज्ञानं सगोचरं इदं मद्विषयं ज्ञानमपरोक्षं स्व
नोपयनः १ परोक्षं प्रतिबंधेन ज्ञानमित्युपर्यंते तन्निरासे प्रमाणेन सवि च४
चारेणापरस्ततः १ विज्ञानेन [illegible] यत् स्वरूपावसानकं प्राक्तज
10 नेपरोक्षं च परमात्मेशो हमीश्वरः ३ कथयिष्यामि शेषेण सफलं च समा
धनं नित्यचैतन्यरूपं यदागमानजयाधिया ४ विषयीकृत्य लोके
स्मिन्नुत रत्पमनागपि जिज्ञासोस्तव वाक्यस्य ज्ञानं न नावशिष्यते
सर्वाधिष्ठानसन्मात्रज्ञाने ध्यारोपितं जगत् तज्ज्ञानाद्बाधितं सर्वं ज्ञे
यं किमवशिष्यतां ६ तन्मात्रज्ञाननत्त्वज्ञत्कृतकृत्यो भविष्यसि ७
म॰ परब्रह्मज्ञानेन जगदिदं पूर्णं [illegible] संसविदितं यतः प्रोक्तं श्रुत्यावज्रविध
स्य दृष्टांतकथनैः यदा विश्वं सर्वं भगवति हरौ भ्रांतिकलितं तदा॰
ब्रह्मज्ञानाद्धि दिनमलमस्त्येव निगमात् ७ २ ॥

नीलकंठीटीका

यत एवात ज्ञानमिति ज्ञानं शुद्धपरज्ञानं यत ब्रह्म सत्यं ज्ञानमनंतं
ब्रह्मविज्ञानमानंदं ब्रह्मेति श्रुतेः तेनभ्यमहं वक्ष्यामि अशेषतः
साधनकलापसहितं किं वचनमात्रेण परोक्षज्ञानेन नाहस्य
स्वविषये परोक्षज्ञानजनकत्वनियमादित्याशंक्याह सविज्ञानं
म अनुभवसहितं तत्त्वमसीत्यादेर्वाक्यादपरोक्षज्ञानोत्प
तो त्तिदर्शनात् कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति एक
विज्ञानात् सर्वविज्ञानाभ्यनुज्ञां श्रौतीमेव वर्णयति यज्ज्ञात्वेति ज
गत्कारणाधिष्ठानस्य ज्ञानरूपस्य ब्रह्मणो ज्ञाने संपाद्यो [illegible] केदात्
सर्वस्यात्ममात्रत्वेन ज्ञातव्यानवशेषात् ग्रुक्तं इत्यर्थः २ ॥

धानन्दीटीका

ज्ञानं शास्त्रीयपदार्थावबोधः विज्ञानं स्वयं तत्साक्षात्कारः [illegible]
[illegible] २॥

रामकंठीटीका

इदंसमनंतरप्रस्तुतंजगत्प्रपंचपरमार्थप्रतिपत्तिविषयंमत्स्वरू
पसाकल्यसंवित्तिविषयंचज्ञानमुपपत्त्युपन्यासरूपंशास्त्रंतदु
भयसाक्षात्काररहितेनाविशिष्टज्ञानेनसहितमशेषतःकथयिष्या
मियत्प्रतिपद्यभूयोबाह्यंवस्त्वंतरंनकिंचिदवशिष्यते यदवग
माद्विदितसकलवेद्यःकृतकृत्योभविष्यसीत्यर्थः २ ॥

लासिकी टीका

अथवक्ष्यमाणंज्ञानंस्तौति ज्ञानंशास्त्रजमद्वैतलक्षणंशुद्धविद्या
ख्यंतदुक्तं सामानाधिकरण्यंपाहि सद्विद्याहमिदंधियोः अत्रापरत्व
भावानामनात्मत्वेनभासनात् परत्वाहंतयाच्छादात्परापरदशा
हिसेति सविज्ञानंसाक्षात्कारसहितं इदंप्रत्यक्षमानमशेषतः
साकल्येनतेतुभ्यमहंपरमात्मावक्ष्यामि यज्ज्ञानंज्ञात्वाप्रतिपद्य
साक्षात्कृत्येहश्रेयोमार्गेपुनर्बोधव्यमवस्त्वंतरमवशिष्टंनभव
ति यदवगमाद्विदितवेद्यःकृतार्थोभविष्यसीत्यर्थः २ ॥

पंचोली टीका

यच्चज्ञानंभगवद्विषयमेवउत्तरत्रवक्ष्यमाणंस्तौतिभगवान् ज्ञा
नंतेहमिति हेअर्जुनाहमिदंज्ञानंविज्ञानसहितंज्ञानंशास्त्रज
नितंविज्ञानंसाक्षात्काररूपंप्रत्यक्षंतेनसहितंतेतुभ्यमशेषतः
साकल्येनवक्ष्यामितज्ज्ञानंश्रोतममभिमुखीकरणायस्तौति यदि
ति ज्ञानंज्ञात्वाइहलोकेभूयःपुनरपिज्ञातव्यंपुरुषार्थसाधन
ननावशिष्यतेसतत्त्वज्ञःसर्वज्ञोभवतीत्यर्थः २ ॥

रणवीरसमिद्धोधिनी ॥

ज्ञानमिति अहं तेतुभ्यं विज्ञानेन विशिष्टज्ञानेनाचार्योपदेश
जनितेन सहितमिदं वक्ष्यमाणं ज्ञानं शास्त्रजनितमशेषतः
साधनफलतत्त्वेननिरवशेषं वक्ष्यामि किंतदित्यपेक्षायांत
स्यातिमाहात्म्यंद्योतयति यद्विज्ञानसहितंज्ञानंमयोपदिश्यमानं
ज्ञात्वानिश्चयविषयतामापाद्य इहलोके पुरुषव्यवहारेवा मनस्तु रू
पभजनेवाभूयः पुनरन्यज्ञातव्यंनावशिष्यते तेनैवकृतार्थोभवसीत्यर्थः २ ॥

11

भाषाअनुवाद

अब भगवान जी कहतेहै उसी की प्रसंशा करते है विज्ञान जो अनुभव और ज्ञान जो शास्त्र से मेरे विषय मे होता है ये दो नो मै तुमारे प्रति कहूं गा जो जानि के भक्तिमार्ग मे आरूढ पुरुष को और फेरि कुछु जानना बाकी नही रहता है इसी से वे कृतार्थ होते है २॥

दोहा

ज्ञानसहित विज्ञानको तोहि कहों अवशेष जाकेजानेऔरकछु
नजानन योग्यविशेष २॥

12

मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये यततामपि सिद्धानांकश्चिन्मांवेत्तितत्त्वतः ३ ॥

शांकरभाष्यंटीका

अतोविशिष्टफलत्वात् दुर्लभतरं ज्ञानंकथमित्युच्यते मनुष्याणा मिति मनुष्याणांमध्ये सहस्रेष्वनेकेषु कश्चिद्यतति सिद्धये सि द्ध्यर्थं यतति प्रयत्नंकरोतितेषां यततामपि सिद्धानां सिद्धाएव हितेयेमोक्षायमोक्षमार्गे यतन्तेतेषांकश्चिदेवमांवेत्ति तत्त्वतोय थावत् ३ ॥

आनंदगिरिकृतटीका

भगवत्तत्त्वज्ञानस्यविशिष्टफलत्वमुक्त्वा फलितमाह अतइति ज्ञानस्य दुर्लभत्वप्रश्नपूर्वकं प्रकटयति कथमित्यादिना सह स्रशब्दस्य बहुवचकत्वमपेत्यव्याकरोति अनेकेष्विति सिद्धये सत्त्वशुद्धिद्वारा ज्ञानोत्पत्त्यर्थमित्यर्थः सिद्ध्यर्थं यतमानानां क थंसिद्धत्वमित्याशंक्याह सिद्धाएवेति सर्वेषामेव तेषांज्ञानो दयात्तस्य सुलभत्वमित्याशंक्याह तेषामिति ३ ॥

मद्भक्तिं विना तु मज्ज्ञानं दुर्लभमित्याह

स्वामिकृतटीका

मनुष्याणामिति असंख्यातानांजीवानांमध्येमनुष्यातिरिक्तानांश्रेयसि प्रवृत्तिरेवनास्ति मनुष्याणांचसहस्रेषुमध्येकश्चिदेवपुण्य वशात्सिद्धयेआत्मज्ञानायप्रवर्तते प्रयत्नंकुर्वतामपिसहस्रेषु कश्चिदेवप्रकृष्टपुण्यवशादात्मानंवेत्ति तादृशानांचात्मज्ञाना सिद्धानांसहस्रेषुकश्चिदेवमांपरमात्मानंमत्प्रसादेनतत्त्वतोवेत्ति नदेवमतिदुर्लभमपि ज्ञानं तं तुभ्यमहंवक्ष्यामीत्यर्थः ३ ॥

पिशाचभाष्यंटीका

अतोविशिष्टफलत्वात्दुर्लभंज्ञानंकथमित्युच्यते मनुष्याणा मिति मनुष्याणांमध्येसहस्रेष्वनेकेषुकश्चिद्यततिसिध्येसिध्य र्थंतेषांयततामपिसिध्यानांसिद्धाएवहितेयेमोक्षाययतंतेतेषांक

गी॰
टी॰
स॰

13

श्चिदेवमां वेत्ति तत्त्वतः यथावत् ३ ॥

रामानुजभाष्यटीका

वक्ष्यमाणज्ञानस्य दुःप्राप्यतामाह मनुष्याणामिति मनुष्याः शास्त्रा-
धिकारयोग्यास्तेषां सहस्रेषु कश्चिदेव सिद्धिपर्यन्तं यतते सिद्धिपर्यन्तं य-
तमानानां सहस्रेषु कश्चिदेव मां विदित्वा सिद्धये यतते मद्विदां सह-
स्रेषु कश्चिदेव तत्त्वतो यथावस्थितं मां वेत्ति कश्चिदिति नाभिप्रायः सम-
हात्मा सुदुर्लभः मां तु वेदनकथनेन निवक्ष्यते ३ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थम्

अस्य च यत्नतः सर्वेषां न योग्यत्वमनेन दुर्लभत्वाद्यत्नसेव्यतामाह ३ ॥

परमार्थप्रपाटीका

अथैतस्य दुर्लभत्वमाह मनुष्याणामिति असंख्यातानां जीवानां म-
ध्ये मनुष्यव्यतिरिक्तानां परमार्थप्रवृत्तिरेव न संभवति तथा प्राकृता-
नां मनुष्याणां सहस्रेषु बहुषु कश्चिद्विरलः सुकृतातिशयशाली सि-
द्धये स्वात्मज्ञानाय प्रवर्तते तथा प्रयत्नं कुर्वतामपि सिद्धानां सहस्रे-
षु कश्चित् मदनुग्रहपात्रं मां तु यतो यथा तथ्येन वेत्ति यतो दुर्लभम-
तिदुर्लभं तज्ज्ञानमहं वक्ष्यामीत्यर्थः ३ ॥

वनमालीटीका

परोक्षस्य सर्वेन्द्रियप्रवर्तकस्येन्द्रियैः सूक्ष्मयोगस्य रूपस्यापरोक्ष-
यं ज्ञानं मत्प्रसादं विना केवलं पुरुषानुष्ठितश्रवणादिभिर्दुर्ल-
भमित्यभिप्रायेणाह मनुष्याणामिति मनुष्याणां शास्त्राधिकृतानां स-
हस्रेषु कश्चिदेव सिद्धये मदपरोक्षाय यतते सर्वतः यततामपि
मदपरोक्षाय यत्नं कुर्वतामपि कश्चिदेव सिद्धो ज्ञानी भवति सिद्धा-
नां मदपरोक्षवतां मध्ये तत्त्वतः आप्तकामस्य जगदुदयादिकर्तृत्वं
सर्वत्रोदासीनस्यापि भक्ताभक्तयोरनुग्रहनिग्रहादिकर्तृत्वं अति-
महतो गरुडादिकं मां गन्तृत्वं एकस्यापि युगपदनेकावतारैः प्र-
तिजीवं सत्ये नित्यैरन्तर्यामिरूपेण लौकिकानेककार्यकर्तृत्वं वैकु-
ण्ठादिस्थस्यापि व्यापकत्वमेवमादयो लोकविरुद्धा धर्मा भगवत्य-
चिन्त्यपादानत्वतः परमार्थभूता एव संभवन्ति न तु इन्द्रजालवन्म-

दुर्लभं

नां

नह्य

षेति ॥ मामचिंत्यानेकशक्तियुक्तंमत्महाप्रसादयुक्तःकश्चिदेववेत्ति
नसर्वः महापरोक्षंतुयथाकथंचित्स्यान्नउर्वंतंभवत्येवएतादृशा
नुमत्महाप्रसादंविनानभवतीतिभावः यत्तुतत्वतःप्रत्यगभेदेनतत्
त्वमसीत्यादिश्रुत्युपदिष्टमहावाक्येभ्योनेकेषुमनुष्येष्वात्मपरमा
त्मनोरभेदज्ञानसाधनानुष्ठानादुर्लभइतितन्न अभेदभेदकपदा
भावात् स्वरूपातिरिक्तस्याभेदस्यमहावाक्यजन्यबोधविषयत्वे
वेदान्तानांत्वदभिम तावंडार्थकत्वहानेरद्वैतहानेश्च श्रुति
तात्पर्यगोचराभेदस्यस्वरूपात्वासंभवान्नतामिथ्यात्वेनहोपकश्रुतेतर
प्रामाण्यापत्ते भेदस्यसत्यत्वापत्तेश्च अभेदस्याभिन्नत्वेहिस्वरूपस्या स्वरूपं
ज्ञानाधिष्ठाननयासत्वादिसादितयावसदाभानेनशास्त्रवैयर्था
पत्तेः तदित्यादिपदैकपदद्वयावोधितस्यैक्यादेर्महावाक्यजन्य
वोधभानेसर्वेडार्थकत्वभानेमहावाक्यवैयर्थ्यंस्यात् ३ ॥

उत्तमवैजयंतीटीका

[illegible] स्वभक्तिमंत
रेणवक्ष्यमाणस्वज्ञानस्यातिशयदौर्लभ्यमाह मनुष्याणामिति
अस्मिन्ब्रह्मांडेनीचोच्चयोनिगताअपरिमिताजीवाःसंतितेषामप
रिमितेषुजीवेषुमध्येकतिचिदेवमनुष्याःशास्त्राधिकारयोग्या
भवंतितेषामसंख्यातानांप्राणिनांयोग्यानांसहस्रेषुसंख्यातेषुमध्ये
कश्चिद्विरलएकएवसिद्धयेस्वात्मपरमात्मस्वरूपावलोकनाय
यतनेयत्नंकरोतितेषांयततां पतंउर्वतांसहस्रेषुमध्येकश्चि
द्विरलःसिद्धःस्वपरस्वरूपावलोकनंप्राप्तोतितेषांसिद्धानांस्वप
रात्मस्वरूपविदामपिसहस्रेषुमध्येकश्चिदेवविरलस्तत्वतःस्वरू
पतोयथात्म्येनवेत्तिकिंतुचिंत्यानंतैश्वर्यगुणशक्तिकत्वकार
णत्वेनतानभवतीत्यभिप्रायः ३ ॥

श्रुतिदुर्लभंचैतन्मदनुग्रहमंतरेणम मधुसूदनीटीका ह्यफलेज्ञानेयत्नः ॥
मनुष्याणांशास्त्रीयज्ञानकर्मयोग्यानांसहस्रेषुमध्येकश्चिदेको
अनेकजन्मकृतसमासादितनित्यानित्यवस्तुविवेकःसन्यत

गी॰ टी॰ स॰

14

ति यततेसिद्धयेसत्वशुद्धिद्वारा ज्ञानोत्पत्तये यततांयतमानांज्ञानायसि
द्धानांप्रागर्जितसुकृतानांसाधकानांमध्येकश्चिदेकःश्रवणमनननिदि
ध्यासनपरिपाकांतेमांमेस्वरूपंवेत्तिसाक्षात्करोतितत्त्वतः प्रत्यगभेदे
नतत्त्वमसीत्यादिगुरूपदिष्टमहावाक्येभ्यः अनेकेशुभमनुष्येषुज्ञानमत्ता
नसाधनानुष्ठायीपरमदुर्लभः साधनानुष्ठापिष्वपिमध्येफलभागी
परमदुर्लभइतिकिंवक्तव्यमस्यज्ञानस्यमहात्म्यमित्यभिप्रायः ३
[illegible]
[illegible] ॥

सदानंदीटीका

मनुष्याणांतरेणोदुर्लभंतन्महाफले कर्मज्ञानादियोग्यानांसह
स्रेषुनरजन्मनां ३ अपिकश्चिद्विवेकीसन्यतनेचित्तशुद्धये ज्ञाना
ययतमानानांसिद्धानांचविपश्चितां ३ मध्येकश्चिन्महानेकःस
म्यग्ज्ञानेनमांहरिं साक्षात्करोतितत्त्वेनस्वरूपेणाचिद्धनं ३ मत्त
त्वज्ञोस्तिसर्वज्ञोदुर्लभोजगतीतले किंवाच्यंज्ञानमाहात्म्यंश्री
हरेरयमाशयः ४ ॥ ३ ॥

नीलकंठीटीका

एतदेवज्ञानंदौर्लभ्यप्रदर्शनेनस्तौति मनुष्याणामिति यततां
यतमानानां ३ ॥

आनन्दीटीका

अत्रदुष्प्रापतामा हृ मनुष्याणांकर्मभूमौदुर्लभंजन्मप्राप्तवतांसहस्रेषुमध्येकश्चिदेकः
सिद्धयेजन्माभावरूपस्यफलस्यप्राप्तयेयततितदुपायमनुतिष्ठति
यततांसिद्धिंप्राप्तानामपिमध्येकश्चिदेकःशुकोवानारदोवेतिप्र
सिद्धोमांवासुदेवंतत्त्वतःव्यक्ताव्यक्तात्मकत्वेनवेत्ति ३ ॥

एतयोश्चज्ञानविज्ञानयोर्मत्संवेदनमे रामकंठीटीका वफलंपर्यवस्यतितच्चपरमरहस्यत्वात्

सर्वदुर्लभंयतः ॥ इहहिनिरवधौप्राणिसर्गप्रपंचेमनुष्यत्वमेवतावद्दुर्लभं तेष्वपिमनु
ष्याद्यकर्मभूमिलब्धजन्मानःचतुर्वर्गसिद्ध्यधिकारिणस्तेषांसह
स्रेषुमध्येकश्चिदेवतथाविधकर्मपरिपाकवशादुत्पन्नसंसारवि

गतः सिद्धये पुनर्जन्माभावलक्षणफलप्राप्तये यततेतत्तदुपायाह
रणप्रयत्नपरो भवति न तु तावत्सिद्धिं प्राप्नोति तेषामपि यतमाना
नां सिद्धानां तत्तद्दर्शननिश्चितमोक्षलक्षणां सिद्धिं प्राप्तानामपि मध्ये
कश्चिदेव प्रकृष्टपुण्यपरिणामवशाद्वा मम मदनुग्रहाद्वि विभावित
यथोक्तनिरतिशयश्रद्धाभक्तिप्रसाधितविवेकजज्ञानप्रभावाद्यथा
प्रतिपादितस्वरूपं मां वेत्त्यात्मत्वेन प्रतिपद्यन्ते ३ ॥

लासिकी टीका

तत्त्वज्ञाने परमरहस्यत्वात्सुदुर्लभं यतः तत्र प्रकृष्टपुण्यप्रवेशेन सु
दुर्लभमनुष्यजन्मभाजां सहस्रेषु मध्ये कश्चिदेव लब्धात्मबोधः सि
द्धये बोधोत्कर्षाय यतते सर्वदात्मसमाधाने प्रावर्तते यततां सदा
विमृशतामपि तथा सिद्धानां ज्ञानोत्कर्षं प्राप्तानां सहस्रेषु मध्ये क
श्चिल्लोकोत्तरो मामीश्वरं तत्त्वतो यथावद्विभूतिबलैश्वर्यादियुतं वे
त्त्यात्मतया संवेदयते ३ ॥

पंचोली टीका ॥

अतो विशिष्टफलत्वाद्दुर्लभं भगवद्विषयं ज्ञानमित्याह मनुष्या
णामिति मनुष्याणां सहस्रेषु कश्चिदेव सिद्धये मोक्षाय यतते यत
तामपि मोक्षार्थं यत्नं कुर्वतामपि सिद्धानामपि मध्ये कश्चिदेव तत्त्व
तो यथार्थेन मां परमेश्वरं वेत्ति ३ ॥

रणवीरसमिह्लादिनी ॥

मद्विषयज्ञानं चेदमतिदुर्लभमित्याह मनुष्याणामिति मनुष्या
णां कर्मादिकारिणां सहस्रेषु मध्ये कश्चिदेकोऽधिकारी तावद्यतति
सिद्धये पुरुषार्थनिष्पत्त्यर्थं स्व्यात्यर्थं वा स्वकर्मणि प्रवृत्तिमान्भ
वति यततां प्रयत्नातिशयं कुर्वतामपि सिद्धानां प्रसिद्धानां साध
कानामपि सहस्रेषु मध्ये कश्चिदेक एवं मां परमेश्वरं तत्त्वतः स्व
रूपकर्मादिभिः प्रकारैर्वेत्ति मदनुग्रहे योग्यतीति भावः यद्वा तत्त्वतः इति

ल्यश्लोपेपंचमी तत्त्वानि भूम्यादिरूपाष्टविधप्रकृतयः तानिसमा
श्रित्यमांपरमेश्वरंवेत्ति प्रत्यक्षीकरोति मत्प्रत्यक्षीकारेणचसर्व
पापक्षयाद्वैकुंठादिलोकप्राप्तेः परमसुखावाप्तिस्तस्यसुलभे
तिभावः ३॥

मधुभाष्य

मनुष्याणामिति प्रतिज्ञातंज्ञानमाह ३

भाषाअनुवाद

हमारी भक्ति विना हमे जानने सके यह अति दुर्लभ है सोई क हते है कि असंख्य जीवों के मध्यमे मनुष्य छोड़ि और किसी की मोक्ष की विषय मेप्रवृत्ति नही होती है और हजार मनु ष्यके वीच्य कोई एक पुन्य के प्रभा व से आत्म ज्ञान के हेतु यत्न करता है ऐसी ही यत्न कारी हजार के मध्य कोई एक अति उत्तम पुन्य् वणात अपने को जानि सके है और ऐसे आ त्मज्ञानी हजार के वीच मे कोई एक मेरी कृपा से परमात्म स्वरूप मुझ यथार्थ रूपसे जाने है सोई अति कठिन ज्ञान ह म तुम से कहेंगे ३ ॥

दोहा

कोउक नर सत्वमें करें यत्नसिद्धिहेत यत्न करत ता सिद्ध में

कोउ तत्वसें मोहिवेत ३॥

16

भूमिरापोनलोवायुः खंमनोबुद्धिरेवच अहंकारइ-
तीयंमेभिन्नाप्रकृतिरष्टधा ४ ॥

शाङ्करभाष्यटीका

अतःश्रोतारंप्ररोचनेनाभिमुखीकृत्याह भूमिरिति भूमिरितिपृथिवी
तन्मात्रमुच्यते नस्थूलाभिन्ना प्रकृतिरष्टधेति वचनात् तथाबाद
योपि तन्मात्राण्येवोच्यंते आपोऽनलोवायुः खंमनोमनइतिमनसः
कारणमहङ्कारोगृह्यते बुद्धिरित्यहङ्कारकारणं महत्तत्वं अहंका
र इत्यविद्यासंयुक्तमव्यक्तं यथा विषसंयुक्तमन्नं विषमुच्यते ए
वमहंकारवासनावदव्यक्तं मूलकारणमहङ्कार इत्युच्यते प्रव
र्तकत्वादहंकारस्याहङ्कार एवहि सर्वस्यप्रवृत्तिबीजं दृष्टंलोके
इतीयंयथोक्ता प्रकृतिर्मे ममैश्वरी मायाशक्तिरष्टधाभिन्ना भे
दमागता ४ ॥

आनन्दगिरीकृतटीका

ज्ञानार्थंप्रयत्नस्य तद्द्वारा ज्ञानलाभस्य तदुभयद्वारेण मुक्तेश्च सु
लभत्वाभिधानस्यश्रोतृप्ररोचनं फलमिति मत्वाह श्रोतारमिति
आत्मनासर्वात्मकत्वेन परिपूर्णत्वमवतारयन्नादावपरां प्रकृति
मुपन्यस्यति आहेति भूमिशब्दस्य व्यवहारयोग्यस्थूलपृथिवी
विषयत्वंव्यावर्तयति भूमिरितीति तत्रहेतुमाह भिन्नेति प्रकृ
तिसमभिव्याहारात् गंधतन्मात्रंस्थूलपृथिवी प्रकृतित्वतरविका
रो भूमिरित्युच्यते नविशेषइत्यर्थः भूमिशब्दवदबादिशब्दानाम
पि सूक्ष्मभूतविषयत्वमाह तथेति तेषामपिप्रकृतिसमानाधि
कृतत्वाविशेषात्तन्मात्राणां पूर्वपूर्वप्रकृतीनामुत्तरोत्तरविकार
णां नविशेषसिद्धिरित्यर्थः मनःशब्दस्य सङ्कल्पविकल्पात्मक
करणविषयत्वमाशंक्याह मनइतीति न खल्वहङ्काराभावे स
ङ्कल्प विकल्पयोरसंभावात्तदात्मकं मनः संभवतीत्यर्थः निश्च
य लक्षणा बुद्धिरित्युपगमाद्बुद्धि शब्दस्य निश्चयात्मककरण

गी॰
टी॰
स॰

17

विषयत्वमाशंक्याह बुद्धिरितीति नहि हिरण्यगर्भसमष्टिबुद्धिरूपमंतरेण व्य-
ष्टिबुद्धिः सिध्यतीत्यर्थः अहंकारस्याभिमानविशेषात्मकत्वेनांतःकरण-
प्रभेदत्वं व्यावर्तयति अहंकारइति अविद्यासंयुक्तमित्यविद्यात्मकमित्यर्थः
कथंमूलकारणस्याहंकारशब्दत्वमित्याशंकोक्तमर्थं दृष्टांतेन स्पष्टयति
यथेत्यादिना मूलकारणस्याहंकारशब्दत्वे हेतुमाह प्रवर्तकत्वादि-
ति तस्य प्रवर्तकत्वं प्रपंचयति अहंकारएवेति सत्येवाहंकारे मम-
कारे भवति तयोश्च भावे सर्वा प्रवृत्तिरिति प्रसिद्धमित्यर्थः उक्तां प्रकृ-
तिमुपसंहरति इतीयमिति इयमित्यपरोक्षा साक्षिदृश्येति याव-
त्येश्वरी तदाश्रया तदैश्वर्योपाधिर्भूत्वा प्रक्रियते महदाद्याकारेणे-
ति प्रकृतिस्त्रिगुणं जगदुपादानं प्रधानमिति मतं व्युदस्यति माये-
ति तस्यास्तत्कार्यकारणपरिणामयोग्यत्वं द्योतयति शक्तिरिति
अष्टधेति अष्टभिः प्रकारैरितियावत् ४ ॥

स्वामिकृतटीका

एवं श्रोतारमभिमुखीकृत्येदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेनेश्वरत्वं
प्रतिज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह भूमिरिति द्वा-
भ्यां भूम्यादिशब्दैः पंचगंधादितन्मात्राण्युच्यंते मनःशब्देन तत्कारण-
भूतोहंकारः बुद्धिशब्देन तत्कारणं महत्तत्वं अहंकारशब्देन तत्कारण-
मविद्या एवमष्टधा भिन्ना यद्वा भूम्यादिशब्दैः पंचभूतानि सूक्ष्मैः सहै-
कीकृत्य गृह्यंते अहंकारशब्देनैवाहंकारः तेनैव तत्कार्याणींद्रिया-
णि गृह्यंते बुद्धिरिति महत्तत्वं मनःशब्देन तु मनसैवोन्नेयमव्यक्त-
स्वरूपं प्रधानं इति अनेन प्रकारेण मे प्रकृतिर्मायाख्या शक्तिरष्टधा
भिन्ना विभागं प्राप्ता चतुर्विंशतिभेदभिन्नाप्यष्टस्वेवांतर्भावविव-
क्षयाष्टधाभिन्नेत्युक्तं तथा च वक्ष्यमाणक्षेत्राध्याये इमामेव प्रकृतिं च-
तुर्विंशतितत्वात्मना प्रपंचयिष्यति महाभूतान्यहंकारो बुद्धिरव्यक्त-
मेवच इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः इति [illegible]
[illegible] ४ ॥

पिशाचभाष्यटीका

श्रोतारं प्ररोचनेनाभिमुखीकृत्याह भूमिर्गंधतन्मात्रं आपो रसतन्मात्रम

तेजोरूपतन्मात्रं वायुःस्पर्शतन्मात्रं खंशब्दतन्मात्रंमनइतिमनसःका
रणमहंकारः बुद्धिर्महान्बुद्धिरित्यहंकारोम हानहंकारोऽव्यक्तम
हंकारइत्यविद्यासंयुक्तमित्यव्यक्तं नन्वयासिद्धंभूम्यादिशब्दैर्महाभू
तानांग्रहणयुक्तंमनःशब्देनापीन्द्रियस्यबुद्ध्यहंकारशब्दाभ्यामध्य
वसायवृत्तेरभिमानवृत्तेश्चग्रहणंनैवमुपपद्यतेप्रकृतिरितिचव
ह्यमाणत्वादितीयं ममेश्वरस्यशक्तिभूताविद्यात्मिकाभिन्नाविभ
क्ताप्रकृतिकारणमष्टप्रकारः ४ ॥

रामानन्दभाष्यटीका

अस्यविचित्रानंतभोग्यभोगोपकरणभोगस्थानरूपेणावस्थितस्यज
गतःप्रकृतिरियंगंधादिगुणकपृथिव्यप्तेजोवाय्वाकाशरूपेणम
नःप्रभृतीन्द्रियरूपेणचमहदहंकाररूपेणचाष्टधाभिन्नामदीयेति
विद्धि ४ ॥

अभिनवगुप्तकृतटीकायाम् अस्य च वक्तुनः सर्वैर योग्यः इत्यनेन दुर्लभत्वाद्धन्दसेव्यतामाह भूमीति स्पष्टार्थं

परमार्थप्रपाटीका

एवंनिरूपणीयार्थेश्रोतारमभिमुखीकृत्येदानींप्रकृतिद्वारेणस्रष्टृत्वादि
कर्तृत्वेनेश्वरतत्त्वंप्रतिज्ञातंनिरूपयितुंपरापरभेदेनप्रकृतिद्वयमा घ१
ह भूमिरितिद्वाभ्यां भूम्यादीनिपंचसूक्ष्माणितन्मात्ररूपाणिभूतानि
मनःशब्देनतत्कारणीभूतोहंकारःबुद्धिशब्देनतत्कारणीभूतंमह
त्तत्त्वं अहंकारशब्देनअव्यक्ताख्यासरूपंतत्कारणमविद्या इत्येवं
प्रकृतिर्मायाअष्टधाऽष्टप्रकारा भिन्नेति त्रयोदशाध्यायेम
हाभूतान्यहंकारइत्यादिचतुर्विंशतितत्त्वात्मनावक्ष्यमाणायाः
प्रकृतेरत्रैवान्तर्भावइत्युक्तं ४ इदानींपरापरत्वविभागमाह अ
परेयमिति ॥

वनमालीटीका

सर्वोपसर्गादिकर्तृत्वसर्वनियामकत्वादिरूपनिरूपणयाविर्भावैश्वर्यज्ञा
नयन्प्रतिज्ञातंतदाह भूमिरितिपंचतन्मात्राण्यहंकारोमहान
व्यक्तमित्यष्टप्रकृतयः पंचमहाभूतानिपंचकर्मेन्द्रियाणिपंचज्ञा
नेन्द्रियाणिउभयसाधारणंमनश्चेतिषोडशविकारः एतान्येवचत्व

गी॰ विंशतितत्त्वानि तत्र पृथिव्यप्तेजोवाय्वाकाशाख्यपंचमहाभूतानि सूक्ष्मावस्था
टी॰ रूपाणि गंधरसरूपस्पर्शशब्दात्मकानि पंचतन्मात्राणि भूमिरित्यादिना
सं॰ लक्ष्यंते अथाहंकारेणाहंकारस्तत्कार्याण्येव मनःपदेन चोद्दिष्टमव्यक्तं लक्ष्य
ते प्रकृतिशब्दस्य समानाधिकरणेन स्वार्थहानेरावश्यकत्वाच्च मदी
18 यानंतरूपा प्रकृतिरियं महत्तत्त्वादिरूपेणाष्टधा भिन्नाष्टभिः प्रका
रैर्भेदमागतास्सर्वोपि जडवर्गोऽत्रैवांतर्भवतीत्यर्थः ४ ॥

अस्यामेवैजयंतीटीका

एवं परमात्मब्रह्मश्रीकृष्णभगवत्पदनिर्दिष्टरितिज्ञानादीलब्धगर्भकं
स्वसारथिवचनामृतं निशम्याहो मया किंस्वभं कर्माचरितं यतः ह
रनारायणैरपि दुर्लभं तज्ज्ञानं त्वयमेव मामुपदेष्टुं समुद्यतो भवतीत्यवे
सर्वोत्कृष्टस्वभाग्यं मन्वानमतिशयहर्षोत्फुल्लवदननयनमर्जुनं
श्रोतारमभिमुखीकृत्य चेतनाचेतनात्मकं इदं समस्तं सर्वकार
णात्मकस्वकीयं स्वरूपं वक्तुमादौ परापराभिधेयशक्तिद्वयमाह
द्वाभ्यां भूमिरिति भूमिरापोनलो वायुः खमिति पृथिव्यप्तेजो
वाय्वाकाशरूपाणि महाभूतानि पंच मनो बुद्धिरहंकारश्चेत्यंत
करणानि त्रीणीत्यमुना प्रकारेणायमष्टधा निर्दिष्टानि दिष्टचे
तनरूपामिमम सर्वेश्वरास्मे शरीरप्रकृतिर्मायाप्रधानमव्यक्तमजादि
पदवाच्यां सत्त्वादित्रिगुणात्मिकां परिणामभवनस्वभावामघटघट वा॰
नापटीयसीं स्वरूपापरनाम्नीं मायामदिच्छावशेनाष्टधा
ष्टप्रकारेण भिन्नाभेदमापन्नां त्वं पाण्डवावबोधेति शेषः ननु चतुर्विंशति
परिमितानि तत्त्वानि प्रसिद्धानि कपिलादिभिः सर्वैराचार्यैश्चा
ह॰ पि पंचतन्मात्राण्यहंकारो महानव्यक्तमित्यष्टौ प्रकृतयः पंचमहा
भूतानि पंच कर्मेंद्रियाणि पंच ज्ञानेंद्रियाण्युभयसाधारणं मनश्चे
ति षोडश विकारास्त एवमज्ञानि सर्वज्ञैः सर्वेश्वरस्त्वं तु प्रकृतिर
ष्टधा भिन्नेति केनाभिप्रायेणावदसि नह्यं दंति चेत्तत्र सत्कथनाभि
प्रायं शृणु अष्टस्वेव तत्त्वेषु चतुर्विंशतितत्त्वानामंतर्भावः स्यात्
तथाहि भूम्यादिषु पंचमहाभूतेषु गंधादीनां पंचतन्मात्राणामंतर्भा
वः अहंकारे पंचकर्मेंद्रियाणां पंचज्ञानेंद्रियाणां मनसश्चांतर्भा

वः बुद्धिशब्देनमहत्तत्त्वमहं मनःशब्देनमनोगम्यमव्यक्तरूपंप्रधानं
माह भूम्यादिशब्दैः पंचभिःगंधादिशब्दपर्यंतानिपंचतन्मात्रा
णिगृह्यंते अहंकारशब्देनपंचमहाभूतान्येकादशेंद्रियाणिच
महंकारश्चगृह्यंतेबुद्धिशब्देनमहत्तत्त्वंमनःशब्देनाव्यक्तरूपंप्रधा
नंचगृह्यतेइत्याशयः ४ ॥ मधुसूदनीटीका

एवंप्ररोचनेनश्रोतारमभिमुखीकृत्यात्मनःसर्वात्मकत्वेनपरिपूर्णत्वमवतारयन् पंच दावपरांप्रकृतिमुप
न्यस्यति ॥ सांख्यैर्हिपंचतन्मात्राण्यहंकारोमहानव्यक्तमित्यष्टौप्रकृतयः महा
भूतानिपंचकर्मेंद्रियाणि पंचज्ञानेंद्रियाणिउभयसाधारणंमन
श्चेतिषोडशविकाराउच्यंते एतान्येवचतुर्विंशतितत्त्वानि तत्रभू
मिरापोनलोवायुःखमितिपृथिव्यप्तेजोवाय्वाकाशाख्यपंचमहाभू
तसूक्ष्मावस्थारूपाणिगंधरसरूपस्पर्शशब्दात्मिकानिपंचतन्मात्रा
णिलक्ष्यंते अहंकारशब्देनतत्कार्यत्वेवमनःशब्देनपरिशिष्ट च
न मव्यक्तंलक्ष्यते प्रकृतिशब्देसामानाधिकरण्येनतत्कार्यहानेवप्रप रा
कत्वात् मनःशब्देनवास्वकारणमहंकारोलक्ष्यतेपंचतन्मात्र
सन्निकर्षात् बुद्धिशब्दस्त्वहंकारकारणेमहत्तत्त्वेमुख्यवृत्तिरेव
अहंकारशब्देनचसर्ववासनावासितमविद्यात्मकमव्यक्तंलक्ष्यते प्र
वर्तकत्वादसाधारणधर्मयोगाच्च इत्थंप्रकारेणेयमपरोक्षसा
क्षिभास्यत्वात् प्रकृतिर्मायाख्यापारमेश्वरीशक्तिरनिर्वचनीयस्व
भावात्रिगुणात्मिकाष्टधाभिन्ना अष्टभिःप्रकारैर्भेदमागता स
र्वोपिजडवर्गोत्रैवांतर्भवतीत्यर्थः स्वसिद्धांतेचेक्षणसंकल्पात्म
कोमायापरिणाममेवबुद्ध्यहंकारौपंचतन्मात्राणिचापंचीकृत
पंचमहाभूतानीत्यसकृदवोचाम ४ ॥

सदानंदीटीका

एवंप्ररोचनेनाभिमुखीकृत्यार्जुनंहरिः आत्मनःसर्वरूपत्वात्पू
र्णत्वमवतारयन् उपन्यस्यतिद्वेवाक्येसमहाप्रकृतिर्विकां
भूम्यादिपंचभूतानिसूक्ष्मावस्थात्मकानिहि १ तन्मात्राण्येवल
क्ष्यंतेमनोहंकारइष्यते बुद्धिशब्दान्महत्तत्त्वमहंकारस्यकारणं २

19

गी॰ टी॰ स॰

अविद्यात्मकमव्यक्तं वासनानंतवासितं अहंकारपदेनोक्तं सर्वकारा
णकारणं ४ इत्येवमष्टधेत्येवं साहिभास्यतयाष्टधा शक्तिः प्रकृति
धर्माख्यानिर्वाच्यात्रिगुणात्मिका ५ प्रकारैरष्टभिर्भेदमागतापरमे
श्वरी अंतर्भूतोत्र सर्वोपि जडवर्गः प्रपंचगः ६ ॥ ४ ॥

नीलकंठीटीका

एवमेकविज्ञानात्सर्वविज्ञानं प्रतिज्ञाय तदुपपत्तये सर्वस्य जडाजड
प्रपंचस्य ज्ञानात्मकब्रह्मप्रभवत्वमाह त्रिभिः भूमिरिति अत्र भूम्यादि
पदैस्तत्तत्कारणान्येव गृह्यंते प्रकृतिरित्यधिकारात् स्थूलभूम्यादे
रविकृतिमात्रत्वात् तथाच भूमिरिति गंधतन्मात्रं आप इति रसत
न्मात्रं अनल इति रूपतन्मात्रं वायुरिति स्पर्शतन्मात्रं खमिति श
ब्दतन्मात्रं मन इति तत्कारणमहंकारः बुद्धिरिति समष्टिबुद्धिर्म
हत्तत्वं अहंकार इति तद्धेतुरहंकारो मूलप्रकृतिः कारणब्रह्मोऽज्ञा
त्वा नं भवेत्पथगत्या बाजलकान्तेहाप्य इयंमेमतः अभिन्ना अष्टधा कु
सिद्धाशुक्तिशाकालादिवरजतं अष्टधा अष्टप्रकारा प्रकृतिर्जडप्रप
चोपादानभूता यद्वा नात्राव्यक्तमहदहंकारपंचतन्मात्राण्येवा
ष्टौ सांख्याभिमता एव प्रकृतयो ग्राह्या इति नियमोस्ति मनसोपि
वपष्टत्वे मनसाष्टणीतीति मनस इंद्रियांतरप्रकृतित्वश्रवणात
संततवापि प्रकृतयः तथा चैवं योज्यं इयं मे मदभिन्ना प्रकृतिर
व्याकृताख्या भूम्यादिभेदेनाष्टधेति मूलप्रकृतेरत्र भूम्यादिभिः स
हपाठाजन्यत्वमवगम्यते तासां सांख्यानामिवाजन्यत्वं तस्मादव्या
कृतमुत्पन्नं त्रिगुणं द्विजसत्तमेति अव्यक्तं पुरुषे ब्रह्मन्निष्कले प्रवि
लीयत इति वचनस्याप्युभयप्रभवप्रलययोस्मरणात् ४ ॥

धानन्दीटीका

व्यक्ताव्यक्तात्मकत्वमेव लक्षयति इयमव्यक्तादीनि भूतानि व्यक्त
मध्यानि भारतेति द्वितीयाध्यायोद्दिष्टां अजामेकां लोहितशुक्ल
कृष्णामित्यादिश्रुतिस्मृतिप्रसिद्धां मे परमेश्वरस्य प्रकृतिः सत्वरज

स्तमसां साम्यावस्था विश्वस्य मूलकारणं कार्यकारणकर्तृत्वप्रकारा-
त्मिका पारमेश्वर्य शक्तिर्वह्नेर्दाहकतादिरिव परमेश्वरादभिन्ना अस्या
मूलप्रकृतिरपि महदाद्याः प्रकृतिविकृतयः सप्तेति शास्त्रमनाद्यक्ता
व्यक्तत्वेनाष्टप्रकारा सती भूमिरापोनलो वायुरिति भिन्ना भेदं प्राप्ता प्र-
कृतेर्महांस्ततोहंकारस्तस्मादपि गणः षोडशकः तस्मादपि षोड-
शात्पंचभ्यः तथाहि स्थूलचराणि आदीनि सूक्ष्मात्मनीयत इति न्याया-
त्क्रमेण तद्दर्शयति भूमिर्गंधतन्मात्रस्य प्रकृतेर्विकृतिः आपो रसत-
न्मात्रस्य प्रकृतेर्विकृतिः खं शब्दतन्मात्रस्य प्रकृतेर्विकृतिर्मनः अ-
भिमानोहंकारः तस्माद्द्विविधः प्रवर्तते सर्गः ऐंद्रियएत भूतादेस्त-
न्मात्रः स तामसः तैजसादुभयं अहंकारस्य प्रकृतेर्विकृतिः बुद्धिरध्य-
वसायरूपं महत्तत्त्वं मूलप्रकृतेर्विकृतिः अहंकारोभिमानरूपः बु-
द्धेर्महत्तत्त्वस्य प्रकृतेर्विकृतिः भेदः मनः शब्दो नैकादशेंद्रियवर्गः
इंद्रियसाहचर्यात्तन्मात्राणि चेत्यहंकारस्य विकृतिः भेदः बुद्धिर्म-
हत्तत्त्वमव्यक्तस्य विकृतिः भेदः अहंकारो महतो विकृतिः ४ ॥

रामकंठी टीका

जगत्स्वरूपप्रतिपादनपूर्वकमुपदेष्टुमाह योहं सततचिन्मात्रस्वरू-
पः अच्युत एवाचिंत्यनिजमायाशक्तिमाहात्म्यजडचेतनविभागेन
द्विरूप इवावभासमानो जगत्क्रीडामिमां निवर्तयामि तस्य मे सुखदुः-
खमोहात्मकतया सर्वभावानुगतसत्त्वादिगुणत्रयरूपा जडाया प्र-
कृतिरथिष्टा अष्टाभिः प्रकारैर्भिन्ना विभागं प्राप्ता के ते प्रकारा भूमि-
रित्यादि तत्र भूम्यादिभिः पंचभिरप्ययक्रमनिर्दिष्टैः प्रकारैः कारण-
भूतानि सूक्ष्माणि निर्दिष्टानि वेदितव्यानि तेषु कार्यभूतानि पृथि-
व्यादीनि पंचस्थूलभेदान्येकैकापायपंचादिगुणानि संग्रहीतानि बु-
द्धिकर्मेंद्रियवर्गश्च दशसंख्य इति भूम्यादिभिः पंचभिस्तत्त्वविंशति-
रात्मिका मनसश्च सर्वेंद्रियनायकं बुद्धिर्निश्चयात्मिका अहंकारो
देहादिष्वनात्मसु तेष्वात्मप्रत्ययः इति त्रिविधमंतःकरणमिति त्र-
योविंशतिसंख्यः कार्यकारणवर्गस्तदनुगुणं चैत्रेगुण्यात्मकं प्र-

गी. धानंकारणमिति तत्वचतुर्विंशतिरूपाचजडत्वेनावभासमानाप्र
टी. कृतिरियंचापरावक्ष्यमाणजीवभूतप्रकृत्यपेक्षयाऽस्थूला यतोऽसौज
स. डावेद्यापरतंत्राविनश्वरीसतीचेतनाद्देदकात्मतेयान्नित्याच्चजीवत
त्वादपकृष्टा ४ ॥

लासिकी टीका

२० तदेवेश्वररूपंसर्वात्मकत्वेनपरिपूर्णमवतारयिष्यन्श्लोकमाह ॥
भूम्यादिशब्दैःपंचतन्मात्राण्युच्यंते शब्दस्पर्शरूपरसगंधाख्यानित
न्मात्राणि मनःसंकल्पात्मकं बुद्धिर्निश्चयात्मिका अहंकारोभिमान
रूपइत्येवंसूक्ष्मदेहात्मकपुर्यष्टकभेदेन तदुक्तं तन्मात्रोदयरूपेण
मनोहंबुद्धिवृत्तिना पुर्यष्टकेनसंरुद्धस्तदुक्तंप्रत्ययोद्भवमिति ममे
श्वरस्यकारणदेहशब्दवाच्यात्रिगुणसाम्यात्मिकाप्रकृतिःस्वस्वरूपा
च्छादनरूपामायाख्याशक्तिः तदुक्तं मायांतुप्रकृतिं विद्यान्मायि
नंतुमहेश्वरमिति तथातिरोधानकरीमायाभिधायुनक्तीति भिन्ना
विभागंप्राप्ता तदुक्तं प्रकृतेर्महांस्ततोहंकारस्तस्माद्गुणश्चषोडश
श्रं कः तस्मादपिषोडशकात्पंचभ्यःपंचभूतानीति इमामेवप्रकृतिंच
तुर्विंशतितत्वात्मनाप्रपंचयिष्यति महाभूतान्यहंकारइत्यादिना
भूम्यादीनांसाक्षाद्ग्रहणंस्थूलदेहस्याप्युपलक्षणार्थं भूतानिपंचवि
राजःपुरुषस्यस्थूलदेहमापन्नानि ४ ॥

पंचोली टीका

श्रोतारंप्ररोचनेनाभिमुखीकृत्वाह भूमिरापइति भूम्यादिपंचतन्मा
त्राणिमनःशब्देनतत्कारणभूतोहंकारःबुद्धिशब्देनतत्कारणंमह
तत्वंअहंकारशब्देनतन्मूलप्रकृति अव्याकृतमिति अष्टधाप्रकृ
तिःक्षेत्ररूपा ४ ॥

गणवीरसमिद्बोधिनी ॥

एवंप्ररोचनेनश्रोतारमभिमुखीकृत्य स्वस्यैवसर्वजगतां सृष्टि
स्थितिसंहारकारणत्वं परेषांहिंसानिमित्ततामभिमानपरिहारेण

षे प्रकृतीरुक्त्वान्यापरभेदेन प्रकृतिद्वयमाह भूमिरित्यादिना त
त्र भूमिशब्देन संग्रामोविताः ऊरुदेशादिरूपप्रदेशमालक्ष्यं-
ते तथाधारत्वसाम्याद्दृश्यादिवाहनलक्षणाच तथा भूमिविष
यविशेषभूतपर्वतादिदैवतास्त्वाणिवोपलक्ष्यंते तथापार्थि
वलोष्टादिनिर्मितघास्त्रादीनि भूमिशब्दलक्षणीयानि आपश्
ब्दशब्देन च जलस्वामिभूतवरुणदैवतास्त्वादिकं लक्ष्यते अ
नलवायुशब्दाभ्यां चाग्नेयवायव्यास्त्रलक्षणा खशब्देन च शून्या
भिधायकेन शून्यताप्रतिपादकप्रस्थापनायस्त्रलक्षणा मनः
शब्देन च स्थिरताविशिष्टंचित्तमभिधीयते बुद्धिशब्देन च निश्च
यात्मिका बुद्धिरभिधीयते अहंकारशब्देन च स्वजात्युचिताभिमा
नः क्रोधोद्दीपक उच्यते इत्यनेनप्रकारेणोपर्यनिर्दिष्टाष्टभिः प्र-
कारैर्भिन्ना परस्परं भेदवती मे मम संबंधिनी रतीयार्थे षष्ठी
वा मया व्यवस्थापिता प्रकृतिः कार्यकारणोपचारात्प्रकृष्टायाः
कृतेः प्रयत्नस्य स्वजात्युचितस्य युद्धादिव्यापारस्य साधनभूते
त्यर्थः रथादिभिः पार्वतीयाद्यैन्द्रायसादिप्रहरणैः शास्त्रा वा-
यौपदिष्टैर्स्थिरचेतस्कतया निश्चयेन रिपुकृततमादृशा विप्रका
रामर्दननिमित्तेन क्रोधे विनाभिमानेन चैन्यष्टभिर्युद्धव्यापारे
क्षत्रियः प्रेर्यते इति तात्पर्यं ४॥

मधुभाष्य

भूमिरित्यादिना महतोऽहंकारपर्यंतभावः अपराप्रकृतमा
वक्ष्यमाणमपेक्ष्य जीवभूताञ्जीवानां प्राणधारिणीचिद्रू
पाभूता सर्वदा सती यतन्महद्भुतमिश्रुतेः जगादव प्रकृती
हेतुर्दैवस्य जडाचेवाजडा तथा अव्यक्ताख्या जडासा च स्त्र्याष्ट
भिन्नाष्टधा पुनः महान्बुद्धिर्मनश्चैव पंचभूतानि चेतिरं अपरामा

नउक्तंश्रीश्वपरेश्वर्यार्पितेयया चिद्रूपासावनंताचअनादिनित्यना
परा यत्नमंत्रप्रियंकिंचिन्नास्तिविष्णोःपरात्मनः नारायणा
स्यमहिषीमतासाब्रह्मणोपिहि ताभ्यामिदंजगत्सर्वंहरिःस
जतिभूतराडितिनारदीये नकेवलंजडाजडात्मकंतीमहयो
र्त्येतावन्मदैश्वर्यमित्याद अहमिति प्रभवादेःसतामतीत्या
दिकारणत्वात्तद्धोत्रत्वाबप्रभवइत्यादि श्राहच सदृशापाता
वसंहर्तानियंताचप्रकाशिता यतःसर्वस्यतेनाहंसर्वोस्मीत्य
चिभिस्वतः स्वरूपस्यभोक्तत्वान्नतसर्वस्वरूपतः प्रागभि
व्यक्तस्वंचापितत्वात्स्येवमदापित तथाप्यचिंत्यशक्तिवा
ज्ञातंस्वरूपमतीवचेति नारदीये अहमेवपरंतत्वः मत्तोन्यत
तत्वंनकिंचिदपि इदंज्ञानं रसोहमित्यादिविज्ञानं प्रवादयो
पितत्तएव तथापिरसादिस्वभावानांसारांशंचस्वभाववैच
विशेषतोपिनियामकः नत्ववादिनियमनवत्तु रसादिकं
सारत्वादिश्चेतिदर्शयति अप्सुरसइत्यादिविशेषणंहि भोग
स्वविशेषतोरसादेरितिच उपासनार्थंच उक्तंचगीताकल्पे
रसादीनांरसादित्वेस्वभावत्वेतथैवच सारत्वेसर्वधर्मेषुवि
शेषेणापिकारणं सारभोक्ताचसर्वत्रयतोतोजगदीश्वरः
रसादिमानिनांदेहेसर्वसर्वव्यवस्थितः प्रवादयःपार्षदायेध्ये
यःसज्ञानिनांहरिः रसादिसंपत्यान्यषांवा स्वदेवोजगत्पति
रितिस्वभावोजीवएवच सर्वत्स्वभावोनियतस्तेनैव किमुताप
रं नतदस्तिविनामत्स्यान्मयाभूतंचराचरमितिच धर्माविरु
द्धःकामरागविवर्जितमित्याद्युपासनार्थं उक्तंचगीताकल्पे
धर्माविरुद्धकामोसावुपास्यःकाममिच्छता विहीनेकामरागा
देर्बलेचबलमिच्छता ध्यातव्यस्तत्तन्निष्ठहीनमेवददाति

सइत्यादि पुण्योपभोगं यइति भोगापेक्षया तथा च श्रुतिः इष्टाप
मेवामुं गच्छंति न हवै देवान्यापं गच्छति एतं पिवंतो सुकृत
स्य लोके इत्यादिका एतं सत्यं तथा धर्मः सुकृतं वाभिधीयते
इत्यभिधानात् एतं सुमानसो धर्मः सत्यं स्यात्सप्रयोगगइ
तिच नवानमनन्यो ऽभिचाकशीति अन्यो नित्यभोपि बले
न भूयानित्यादि विरोधिः स्थूलान प्राणोक्तेः प्राहच सूक्ष्माप्रान
प्रविविक्ताहारतरइवैव भवत्यस्माच्छरीरादात्मनः नचात्र जी
व उच्यते शारीरादात्मन इति भेदाभिधानात् स्वप्नादिषु शारीर
एव शारीरस्तु द्विधाभिन्नो जाग्रदादिषु वास्थितेरिति वचनात् आ
रुढे अस्मादिति ईश्वरव्याहत्यर्थं शारीरौ तावुभौ ज्ञेयौ जीवश्चे
श्वरसंज्ञितः अनादिबंधनस्त्वेको नित्यमुक्तस्तथा परइति
वचनान्नारदीये भेदश्रुतेश्च सति गत्यंतरे उत्कृष्टभेद एव कं
स्यो न सर्वस्याभेदः प्राहच प्रविविक्तभुग्यतो स्माच्छरीरा
त्पुरुषोत्तमः अतो ऽभोक्ता च भोक्ता च स्थूलाभोगात्सदैवति
ति गीताकल्पे न तद्वृंते श्रितिनिदनाधारत्वमुच्यते अंकंच
तदाश्रितं जगत्सर्वं नासोऽन्यत्र विदाश्रित इति गीताकल्पे न
हि कथमेवं न्याय सइत्यत आह ४ ॥

22

भाषाअनुवाद

इन बातो से श्रोता अर्जुन को उत्साह युक्त करके अब प्रकृति जो
माया जिस के द्वारा सृष्टि आदि का कर्तृत्व जो अङ्गीकार किया
है ईश्वरत्व उसका निरूपण उत्तम प्रथम भेद क्रम से दो श्लोक
से कहते है कि भूमि आदि पंचभूत और मन शब्द से मनका का
रण रूप अहङ्कार तथा बुद्धिका कारण महत् तत्व औ अहंकार
की कारणभूत जो अविद्या कहे अज्ञान इस प्रकार से मेरी प्रकृ
ति माया आठ प्रकार की है अथवा पंचभूत तेरूपादि मात्रा
और अहङ्कार से कार्यरूप इंद्री औ मन बुद्धि ये आठ प्रकार जा
नो यद्यपि इहां चौविष भेदो को इन आठ के अन्तर्भूत करि मा
या के आठही प्रकार कहा तोभी देत्रध्याय जोतेरहवां तहां
प्रकृति के चौविश ही तत्वरूप विभाग कहैगे ४ ॥

दोहा

अनल भूमि जल वायु नभ औ मन बुद्धि जोय हंकार यह मोहि
की प्रकृति भिन्नाष्ट विध सोय ४॥

23

अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां जीवभूतांमहा
वाहोययेदंधार्यतेजगत ५ ॥

शांकरभाष्यटीका

अपरेति अपरानपरानिकृष्टाअशुद्धानर्थकरी संसारबन्धनात्मि
केयमितोन्यायथोक्तायास्तु अन्यांविशुद्धां प्रकृतिंममात्मभूतांवि
द्धिमेपरांप्रकृष्टांजीवभूतांक्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां
हेमहावाहोयया प्रकृत्याइदं धार्यतेजगदंतःप्रविष्टया ५ ॥

आनंदगिरिकृतटीका

अचेतनवर्गमेकीकर्त्तुं प्रकृतेरष्टधापरिणाममभिधाय विकारा
वाछिन्नकार्यकल्पं चेतनवर्गमेकीकर्त्तुं ब्रह्मणश्चेतनस्यावि
द्याद्यवछिन्नस्यापि प्रकृतित्वं कथयितुमुक्तांप्रकृतिमनूद्य
र्शयति अपरेति निकृष्टत्वं स्पष्टयति अनर्थकरीति अनर्थकरत्वमे
व स्फोरयति संसारेति कथञ्चिदप्यनतन्त्रत्वव्यावृत्त्यर्थंतत्पदाहः अ
न्यामत्यंतविलक्षणामिति यावत्अन्यत्वमेव स्पष्टयति विशुद्धा
मिति प्रकृतिशब्दस्यात्र प्रयुक्तस्यार्थांतरमाह ममेतिप्रकृष्टमेव
भोक्तृत्वेन स्पष्टयति जीवभूतामिति प्रकृत्यंतरादस्याः प्रकृतेर
वांतरविशेषमाह ययेति नहिजीवरहितं जगद्धारयितुं शक्यमि
त्याशयेनाह अंतरिति ५ ॥

स्वामिकृतटीका

अपरामिमांप्रकृतिमुपसंहरन् परांप्रकृतिमाह ॥

अष्टधोक्तायाप्रकृतिः इयमपरानिकृष्टाजडत्वात् परार्थत्वाच्च इतः
सकाशात्परांप्रकृष्टामन्यांजीवभूतांमेप्रकृतिंजानीहि परत्वेहेतुः जीवस्वरूपां
ययाचेतनयाक्षेत्रज्ञरूपयास्वकर्मद्वारेणेदंजगद्धार्यते [illegible]
[illegible] ५ ॥

पैशाचभाष्यटीका

अपरानिकृष्टाअशुद्धावंधात्मिकेत्यर्थः यथोक्ताइतअस्मादन्यामंा
नरामांतरभूतांमेममेश्वरस्यपरांप्रकृष्टांजीवभूतामात्मभूतांमहा
वाहोययेदंधार्यतेअंतःप्रविष्टयाजगत ५ ॥

रामानुजभाष्यटीका

अपरेयमिति इयंममापराप्रकृतिः इतस्त्वन्यामितो चेतनतायाः चेतनभो
ग्यभूतायाः प्रकृतेर्विजानीयाकारांजीवभूतांपरांतस्याभोक्तृत्वेनप्रधा
नभूतांचेतनरूपांमदीयांप्रकृतिंविद्धिययेदमचेतनंकृत्स्नंजगद्धार्य
ते ५ ॥

अभिनगुप्तकृतटीका

येत्वयमितिग्रन्थेनयासंसारावस्थायांसर्वजनपरिदृश्यमानासाचे
कैवसतीप्रकाराष्टकेनभिद्यतेइत्येकप्रक्रमावष्टम्भत्वादेकमेवविश्वा
मितिप्रकृतिवादेप्युक्तंप्रदर्शितं सैवजीवत्वंपुरुषत्वंप्राप्तापरा
स्व सापिममैवनान्यंचसोभयरूपावेद्यवेदकात्मकप्रपंचोपरचनवि
चित्रा ततएवस्वात्मविमलमकुरतलाकलितसकलभावभूमिः
स्वस्वभावात्मिकासङ्गतमव्यभिचारिणीप्रकृतिः सोहमित्यनेनप्र
कृतिःपुरुषपुरुषोत्तमेभ्योव्यतिरिक्तोपीश्वरः सर्वथासर्वानुगत
त्वेनस्थितइतिसांख्ययोगयोर्नास्तिभेदवादइतिप्रदर्शितम् इदं
जगद्रूपादि ५ ॥

परमार्थप्रपाटीका

इदानींपरापरत्वविभागमाह अपरेयमिति इयमष्टधानिरूपिताप्र
कृतिरपरानिकृष्टाजडत्वात् इतःसकाशात्परामुत्कृष्टामन्यांजी
वभूतांमेप्रकृतिंविद्धिजानीहि परत्वेहेतुः ययाचेतनयादेवदत्तरू
पयात्वकर्मद्वारेयेदंजगद्धार्यते ५ ॥

वनमालीटीका

कुं चिद्रूपांप्रकृतिमाह अपरेति इयमष्टधाभिन्नाजडरूपाप्रकृतिर्दृश्यांण मा ति
वित्प्रकृतिनोपराप्रकृष्टा इतोपराप्रकृतिनोजीवभूतांजीवत्वे
नचिद्रूपत्वेनभूतांसदाविद्यमानां उपेयंप्रकृतिंपरांमत्तोमामदधी
नांत्वंविद्धि ययाचिद्रूपयाजगद्धार्यते चेतनप्रकृत्याधिष्ठिताज
डाप्रकृतिर्हरीच्छयाक्षुब्धाचजगदाकारेणपरिणताभवतीत्यर्थः
यद्वाजीवभूतांजीवस्वरूपांभोग्यजडप्रकृत्यपेक्षयापरांभोक्तृत्वे
नप्रधानभूतांमेमदीयांमदधीनांविद्धियेदंकृत्स्नमचेतनंजग
त्स्वाज्ञितान्हष्टद्वारापार्यतइत्यर्थः कालशक्तिनाभगवताजीवा
दृष्टान्तरोपेनैवतञ्जगतोधारणादिकंनस्वतोनिरपेक्षत्वाद्दासीत

त्वाद्वैतिभावः ५ ॥ हनुमद्वैजयंतीटीका

अचेतनरूपामिमामपरांप्रकृतिमुपसंहरन् चेतनरूपांपरांप्रकृतिमा
ह अपरेयमिति इयंविविक्तानंतभोगाभोगोपकरणभोगस्थानाद्या
कारकतनरूपेणावस्थिताऽपराचेतनरूपायाःप्रकृतेर्निकृष्टा अ
तुच्छरूपत्वाच्चेतनाधीनत्वाच्चमदीयाप्रकृतिरितित्वंविद्धितुशब्दः
पुनरर्थकः एवंसंबंधंवारयतितेनयथादिनिरूर्वभागिनिर्देशात्
हेमहाबाहो अजानन्भजमामज्ञेक्षपुरुषलक्षणसंपन्नेनान्येन
पथ्यपिमनुष्याणामित्यादिनोक्तंशाक्तिहृदयसंपन्नमनस्वरूपज्ञानं
तुदुर्लभंतथापित्वंमत्प्रसादाज्ज्ञानंप्राप्स्यसीतिसूचितंइतोऽचे
तनरूपायाःप्रकृतेःसकाशादन्यांविलक्षणांपरांचेतनरूपांप्र या:
कृतिंउत्कृष्टांचेतनत्वात्ज्ञातृत्वाच्चजीवभूतांप्राणधारणरूपांमे
ममप्रकृतिंशक्तिंविद्धित्वंजानीहिअस्याःपरत्वंज्ञातव्येतयामाह
ययेतिययाचेतनरूपयाप्रकृत्याइदंपरार्थसाधनभूतंस्वार्थशून्यं
जडवर्गरूपंजगद्धार्यतेस्वतोविशीर्यमाणमुत्तभ्यतेशाख्यासना
दिवत्स्वभोगायधृश्यतेवेत्यर्थः ५ ॥

एवंक्षेत्रलक्षणायाःप्रकृतेरपरत्वं वदन् क्षेत्रज्ञलक्षणांपरांप्रकृतिमाह

मधुसूदनीटीका

यामामष्टधाप्रोक्ताप्रकृतिःसर्वाचेतनवर्गरूपासेऽयमपरानिकृष्टा
तार्थता जडत्वात्परार्थत्वात्संसारबंधरूपत्वाच्च इतस्त्वचेतनवर्गरूपायाःक्षेत्रल
क्षणायाः प्रकृतेरन्यांविलक्षणांतुशब्दाध्यथाकथंचिदप्यभेदायो
ग्यांजीवभूतांचेतनात्मिकांक्षेत्रज्ञलक्षणांमेममात्मभूतांविशु
द्धांपरांप्रकृष्टांप्रकृतिंविद्धिहेमहाबाहोययाक्षेत्रज्ञलक्षणयाजी
वभूतयांतरनुप्रविष्टयाप्रकृत्याइदंजगदचेतनजातंधार्यतेस्व द
तोविशीर्यदुत्तभ्यते अनेनजीवात्मनानुप्रविश्यनामरूपेव्या
करवाणीतिश्रुतेर्नहिजीवरहितंधारयितुंशक्यमित्यभिप्रायः
५ ॥ [illegible]
[illegible] ॥

सदानंदीटीका

प्रकृतेःक्षेत्ररूपायाअस्याअपरत्वंविभुर्वदन् क्षेत्रज्ञलक्षणामाहप्रकृतिं

गी॰
टी॰
स॰

25

विद्धतांपरां १ अष्टधोक्तानिकृष्टेयंप्रकृतिर्मिलितात्मना संसारबंधह्
पत्वात्परार्थत्वाज्जडत्वतः १ इतोन्यांप्रकृतिंशुद्धांप्रकृष्टांचेतनात्मि
कां ममात्मभूतांजानीहिपरांक्षेत्रज्ञलक्षणां २ ययाक्षेत्रज्ञरूपिण्या
सर्वस्यांतःप्रविष्टया जगज्जडमिदंसर्वंधार्यतेविशरारुकं ४ ॥ ५

नीलकंठीटीका

ति एवंक्षेत्रात्मिकांप्रकृतिमुक्त्वाक्षेत्रज्ञात्मिकांतामाह अपरेयमिति इ
यंप्रागुक्तासाअपराअश्रेष्ठाजडत्वात् इतस्तुविलक्षणामन्यांपरां
चेतनत्वेनमदनन्यत्वात्उत्कृष्टां मेममसंबंधिनीप्रकृतिंजीवभू
तांप्राणधारणनिमित्तभूतांक्षेत्रज्ञाख्यांविद्धिजानीहिहेमहाबा
हो ययाप्रकृत्यांतःप्रविष्टयाइदंजगत्स्थावरजंगमशरीरात्म
कंधार्यते ५ ॥

आनंदीटीका

२ अस्यांसंहांतरेण स्वरूपमाह

२ अपरेयम् इयमुक्तप्रकाराप्रकृतिरपरावक्ष्यमाणायाः परप्रकृतेरन्यावि
लक्षणाजडापरतंत्राभोग्याकालतःपरिणामिनीचेत्यर्थः इतस्त्वन्यां
प्रकृतिंविद्धिमेपरां तुपुनर्व्यतिरेके इतोस्याःप्रोक्तायाअपरायाः प्र
कृतेरन्यांविशिष्टांचेतनांभोक्त्रीस्वतंत्रांनित्यांपरांसर्वतत्त्वप्रेरिकां
मेप्रकृतिंजीवभूतांकालरूपेणपुरुषरूपेणचक्षेत्रज्ञतांप्राप्तांविद्धि
ययापरयाप्रकृत्याकर्त्र्याइदंसकलंतत्त्वमयंजगद्धार्यतेकालप्रेरित
जीवनिबद्धाहिसकलजगत्पदार्थस्थितिः तथाचोक्तं स्वदेहस्था
त्रिकंचेतनत्सर्वंयस्मात्स्वचेष्टितं ह्यात्मनाधिष्ठितःकायोलब्धत्य
वह्निलोष्टवत् ५ ॥

रामकंठीटीका

अतएवाह इतउक्तायाःप्रकृतेःपुनरन्यांविलक्षणांपरांप्र
कृष्टांजीवभूतांमायावशादन्योन्यभिन्नत्वेनावभासमानक्षेत्र
ज्ञत्वप्राप्तांविद्धि कीदृशीययाकर्तृभूतयेदंयथोक्ततत्त्वप्रात
मयंजगद्धार्यते जीवलक्षणपरप्रकृतिनिबद्धाजगत्पदार्थ
स्थितिः एवंमायावभासितपरापरभेदेनजडचेतनेद्वेप्रकृ २
ती ५ ॥ ५ ॥ ५ ॥ ॥

लासिकी टीका

किंच इयं संसारावस्थायां प्रत्यक्षेण परिदृश्यमानाष्टधोक्ता प्र
कृतिरपरा निकृष्टा वेद्यतया स्थूलत्वाज्जडत्वात्परार्थत्वाच्च ततः प
रांतरे इतः अस्याष्टकात्मना परिणतायाः प्रकृतेः सकाशात्परमा
र्थतोऽन्यां विलक्षणां तादात्म्यमनापन्नां परां चेतनतया प्रकृष्टां मम
स्वस्य प्रकृतिं स्वरूपविस्मरणमापन्नं स्वभावभूतं चिदंशं जीवभू
तां क्षेत्रज्ञलक्षणां जानीहि ननु स्वभावभूतस्य चिदंशस्य कथं जीव
त्वप्राप्तिरित्यत आह ययेति यया जीवभूतया प्रकृत्या इदं जगत्स्व
ष्टिकादिरूपं तदनुप्रवेशात् धार्यते इदमहमिति स्वस्वरूपविस्म
रणे इति पूर्वं तादात्म्याध्यासेन परामृश्यते तदुक्तं विरूपाक्षपंचा
शिकायां ग्राहकमेकं त्वजडं जडमन्यद्ग्राह्यमनयोर्मध्ये मनुते माया
विमोहितात्मा बोधः सोऽयं भवी सद्भिरिति तथा च श्रुतिः तदेव
सृष्ट्वा तदेवानुप्राविशदिति अनेन जीवेनात्मनानुप्रविश्य नामरू
पे व्याकरवाणीति च स्मृतिरपि कथंत्विदं साम्निदेहं महतेस्मादि
तीक्ष्णा विदार्य मूर्द्धसीमानं प्रविष्टः संसरत्ययमिति ययेत्येक
वचननिर्देशेन श्रुतस्य बहुत्वं निरस्तमिति तथा च श्रुतिः एक
एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते ज
लचंद्रवदिति ५ ॥

पंचोली टीका

अपरां प्रकृतिमुपसंहरन्परां प्रकृतिमाह अपरेति हे महाबाहो
त्वं तु इयं प्रकृतिः अपरा न परा निकृष्टा अशुद्धा अनर्थकारि
णी बंधनात्मिका इतः अस्याः यथोक्तायाः प्रकृतेः सकाशादन्यां
विशुद्धां परां प्रकृष्टां जीवभूतां चेतनात्मिकां क्षेत्रज्ञलक्षणां वि
द्धि यया अंतः प्रविष्टया इदं जगद्धार्यते तां मम परां प्रकृतिं वि
द्धि ५ ॥

अपरेयमिति अयं भूम्याद्यष्टप्रकारा प्रकृतिरपरा कर्दमंशादिसा
पेक्षत्वेनास्वतंत्रानुत्कृष्टा च अतोस्याः प्रकाशात्परां निरपेक्षां स्वतं
त्रामुत्कृष्टां चान्यां द्वितीयां प्रकृतिं प्रकृष्टायाः स्वजात्युचितत्वेन प्र
कृष्टफलायाः कृतेर्युद्धादिव्यापारस्य साधनभूतां विद्धि जानीहि
तां च स्वरूपेणाकथयति जीवभूतामिति कर्तृस्वरूपामधिकारि
रूपामित्यर्थः अथवापरां पूर्वापेक्षयाश्रेष्ठां जीवभूतां जीवंत्यनेने
ति व्युत्पत्त्या जीवपदार्थेन वृत्तिरभिधीयते सा च प्रक्रांतत्वात्क्षत्रि
याणां धनुर्वेदेन सिद्धेति तथा च स्मृतिः ब्राह्मणस्याध्ययनं भिक्षा
क्षत्रियस्य धनुः वैश्यस्य कृषिवाणिज्यं शूद्रे सेवा प्रकीर्ति
तेति एवं च जीवो जीविकाभूतो धनुर्वेदस्तत्स्वरूपां धनुर्वेदप्र
तिपाद्यामिति यावत् तस्याश्चापरत्वे हेतुकथनाय तां विशिन
ष्टि ययेति यया च धनुर्वेदप्रतिपाद्यया प्रकृष्टया युद्धादिव्यापार
रूपकृत्येदं जगद्धार्यते धनुर्वेदस्यैव जगद्धारणहेतुत्वमन्वारू
वंतीत्यत्र व्याख्यातं तत एवावधार्यमिति ५॥

मधुभाष्य

५॥

भाषाअनुवाद

अपर कहे आठ प्रकार निकृष्ट प्रकृति कहिके अब पर कहे उत्कृ
ष्ट प्रकृति को कहते है कि हे महाबाहो यह एई कहो जो अ
ष्ट प्रकार की प्रकृति सो अपर कहे निकृष्ट है क्यों कि वह
जड औ उत्तम प्रकृति के अधीन है किंतु और पर कहे उत्कृष्ट
मेरी प्रकृति व्यवहारिक जीव स्वरूप इस प्रकृति से भिन्न जा
नो जो इस जगत को धारण करती है अर्था त इस के उत्कृष्ट
ता मे कारण यह कि देवरूप हुए वही चेतन्य शक्ति कर्तृक
स्वकर्म द्वारा इह संसार स्थित है ५ ॥

दोहा

जानहु अपरा यह प्रकृति को यासें दूसरी जोय महाबाहो यह जग
तको जीव स्वरूपता कहि सोय ५॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय अहं कृत्स्न
स्य जगतः प्रभवः प्रलयस्तथा ६ ॥

शंकरभाष्यटीका

एतदिति एतद्योनीन्येते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी
येषां भूतानां तान्येतद्योनीनि भूतानि सर्वाणीत्येवमुपधारय जा
नीहि यस्मान्मम प्रकृती योनिः कारणं सर्वभूतानां अतोहं कृत्
स्नस्य समस्तस्य जगतः प्रभवः उत्पत्तिः प्रलयो विनाशस्तथा प्रकृ
तिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः ६ ॥

आनंदगिरीकृतटीका

उक्तप्रकृतिद्वयेकार्यलिंगकमनुमानं प्रमाणयति एतद्योनीनीति
प्रकृतिद्वयस्य जगत्कारणत्वे कथमीश्वरस्य जगत्कारणत्वं न
ह्युपगतमित्याशंक्याह अहमिति एतद्योनीत्युक्ते समनंतरप्रकृत
जीवभूतप्रकृतावेवं ग्राह्यस्याव्यवधानात् प्रकृतिमात्रेक्य व्याक
रोति एतदिति सर्वाणि चेतनाचेतनानि जनिमंतीत्यर्थः सर्व
भूतकारणत्वेन प्रकृतिद्वयमंगीकृतं चेत् कथमहमित्युक्त
मित्याशंक्याह यस्मादिति ममप्रकृतीपरमेश्वरस्योपाधितया
स्थिते इत्यर्थः नहिप्रकृतिद्वयं कारणमीश्वरश्चेति जगतोने
कविधकारणांगीकरणं स्यादित्याशंक्याह प्रकृतीति अपरप्र
कृतेरचेतनत्वात् परप्रकृतेश्चेतनत्वेपि किंचिज्ज्ञत्वात् ईश्व
रस्यैव सर्वज्ञस्य सर्वकारणत्वं युक्तमित्याह सर्वज्ञेति ६ ॥

अनयोः प्रकृतित्वं दर्शयन् स्वस्य तत्त्वा स्वामिकृतटीका

रात्मत्वादिकार एतद्योनीनीति एते क्षेत्रक्षेत्रज्ञरूपे प्रकृती योनी कारणभूते ये
णत्वमाह ॥ षां तान्येतद्योनीनि स्थावरजंगमात्मकानि सर्वाणि भूतानीत्युपधा
रय तत्र ह्यस्य तत्र जडाप्रकृतिर्देहरूपेण परिणमते चेतना तु मदं
शभूता भोक्तृत्वेन देहेषु प्रविश्य स्वकर्मणा तानि धारयति ते च
मदीये प्रकृती मत्तः संभूते अतोहमेव कृत्स्नस्य सप्रकृतिकस्य ज
गतः प्रभवः प्रकर्षेण भवत्यस्मादिति प्रभवः परमकारणं संहर

एषां भूतानां येषां परापरत्वेन विभक्ता प्रकृतिर्योनिः कारणं येषां तानि एतद्योनीनि भूतानि सर्वाणीत्युपधारय अवगच्छ अतः परं प्रकृति
रूपेण स्थितोऽहं विश्वस्य जगतः प्रभव उत्पत्तिस्थानं प्रलयस्तथा ६

गी॰ त्यर्थः तथा प्रलीयतेऽनेनेति प्रलयः संहर्ता अहमेव इत्यर्थः ६ [illegible]

टी॰ पिशाचभाष्यटीका

स॰ [illegible] ६ ॥

रामानुजभाष्यटीका

एतच्चेतनाचेतनसमष्टिरूपमदीयप्रकृतिद्वययोनीनि ब्रह्मादिस्तंबपर्यं
तानि उच्चावचभावेनावस्थितानि चिदचिन्मिश्राणि सर्वाणि भूतानि म
दीयानीत्युपधारय मदीयप्रकृतिद्वययोनीनि हि तानि मदीयान्येव
तथा प्रकृतिद्वययोनित्वेन कृत्स्नस्य जगतः तयोर्द्वयोरपि मद्योनित्वेन
मदीयत्वेन च कृत्स्नस्य जगतोऽहमेव प्रभवः [illegible] अहमे
व शेषीत्युपधारय एतयोश्चिदचित्समष्टिभूतयोः प्रकृतिपुरुषयोर
पि परमपुरुषयोनित्वं श्रुतिस्मृतिसिद्धं महानव्यक्ते लीयते अव्यक्त
मक्षरे लीयते तमः परे देव एकीभवति विष्णोः स्वरूपात्परतोदिते द्वे
रूपे प्रधानं पुरुषश्च विप्र प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः पर
मेश्वरः विष्णुनामा स वेदेषु वेदान्तेषु च गीयते इत्यादिका हि श्रुतिस्मृ
[illegible] तयः ६ ॥

अभिनवगुप्तकृतटीका

उपधारय अभ्यासाहितानुभवक्रमेणात्मसमीपे कुरु ६ ॥

परमार्थप्रपाटीका

अथ तदेवाह एतद्योनीनीति एतत्परापरनामकं प्रकृतिद्वयमेव यो
निः कारणं येषां तानि सर्वाणि स्थावराणि जंगमात्मकानि भूतानीति
अवधारय बुध्यस्व तत्र जडा प्रकृतिर्देहरूपेण परिणमते चेतना तु म
दंशभूता भोक्तृत्वेन देहेषु प्रविश्य स्वकर्मणा तानि धारयति ते च मदीये
प्रकृती मम संभूते अतोऽहमेव कृत्स्नस्य सप्रकृतिकस्य जगतः प्रभवः
प्रकर्षेण भवत्यस्मादिति प्रभवः परमकारणमहमित्यर्थः तथा प्र
लीयतेऽनेनेति प्रलयः संहर्ता अहमेव अत्र [illegible] श्रुति
रपि यस्माद्विश्वं भवनानि जज्ञुः [illegible] नान्यमीदतिनातः सप्रा

ऽपिघाइविशामिक्रमानः प्रथमकृद्देवताविवेशेतिभाष्यं ईयंमेतिद्वयोदः
यंर्चंतृतृक्तैवेत्सकर्मदैवस्यंचेहृभमितितर्वानक्रमः यइमेति योविश्वकर्मा
परमेश्वरः इमाइमानिविश्वाभूतानिजुह्वत प्रलयकालेपातेष्टथिव्या
दीनिमान्सप्तलोकान्स्वात्मान्याज्ञतिप्रदेयवन्संहरन्नृषिरेतोद्रि
यार्थदृष्टासर्वस्तोहोनासंहाररूपस्यहोमस्यकर्तानोस्माकंपिताजन
नकोतिषस्मादस्वरूपेणाश्यितवान् लोकान्संहृत्यस्वयमेकप
वासीत् आत्मावाइदमग्रएकएवासीत्सदेवसोम्येदमग्रआसीत्
इत्यादिश्रुतीश्चसतताहृपाः परमेश्वरः आशिषाबजूस्पाप्रजायेये
त्येवंरूपयाश्रुनःसिसृक्षयाऽऽविशामिक्रमानः धनोपिलक्षितंज
गञ्जगनाकांक्षमाणः प्रथमकृत्प्रथमंमहाव्यक्तिः प्रपंचयारमा
र्थिकंरूपमाच्छादयन्स्वपन्त्स्वसृष्टान्प्राणिहृदयवेशनाविवे
शाजीवरूपेणाविष्टवान् अत्रसृष्टिकालेप्रथमकृत्पदेनभूतेषा
त्मानंजजुह्वामीनिवामीतिवाजसनेयब्राह्मणोर्पोदर्शितः ब्राह्मणं
च हंताहंभूतेषात्मानंजजवामिभूतान्यात्मनीनितत्सर्वेषुभू
तेष्वात्मानंजजुह्वामीनिवाजसनेयब्राह्मणोर्पोदर्शितः ब्राह्मणं
च हूवेति ततादेवंनत्यात् स्नाहति ५ ॥

वनमालीटीका

एतद्योनीनिकारणकंकृत्स्नंजगदित्याह एतदितिएतेपरापर
प्रकृतीयोनीयेषांतानिभूतानिभवनधर्मकानिसर्वाणिचेतना
चेतनात्मकानिनिखिलानीत्युपधारय ननुप्रथमेपरोदेवश्चिदः
चिदात्मकप्रकृतिद्वयपरिणामरूपमिदंविश्वंद्वितीयेप्रहृष्टहाराजीवाधि
ष्ठितत्वेनापरप्रकृतेरेवपरिणामत्वंसर्वेश्वरस्यात्रकोपयोगस्तत्राह
अहमिति यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्र
यंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेत्यादिश्रुतेरहंकृत्स्नस्य
स्यजगतः प्रभवः प्रकर्षेणभवत्यस्मादितिप्रभवः उत्पादकः प्रकर्षे
णलीयतेस्मिन्नितिप्रलयः प्रकर्षस्तूभयत्रस्वातंत्र्यप्रकृतिरुपा
दानमहंतस्याभीक्षणाख्यवीर्यप्रायकः क्षोभकः कार्यकारणयोरनः
प्रविश्यधारकश्चस्वतंत्रः कर्तानिर्विकारोचिंत्यशक्तिर्जगज्जन्मादि

गी॰
टी॰
स॰

29

हेतुत्वाद्यनंतमहिमविशिष्टोमम तत्त्वंज्ञेयइतिभावः नचनिमित्तहेतोर्लयो
नदृष्टइतिजगल्लयस्यानित्यत्वेननस्योपादानत्वमितिवाच्यं निमित्तहेतो
र्लूतायांतंतूनांलयदर्शनात् नचलूतोपादानंतंतूनामितिवाच्यं न
स्यनाशेपितंतूनामवस्थानात् उपादानत्वेब्रह्मणोविकारापत्तेः
नचासमसत्ताकोतात्त्विकोन्यथाभावरूपोविवर्तनपदप्रपंचोब्रह्म
णइतिवाच्यंअन्यथाभावोऽन्यथाभवनमन्यथाभानमात्रंवाआद्य
द्येविकारित्वापत्तिः द्वितीयेविवर्तद्रष्टुरधिष्ठानातिरिक्तस्याविव
र्तरूपस्याभावेनविवर्तासंभवात् विवर्तस्यमायिकस्यमायामोहं
विनापरोक्षासंभवेनचरस्य तत्पालकत्वासंभवात् विवर्तकस्यमा
यिकस्यमायामोहंविनापरोक्षासंभवेनचरस्यतत्पालकत्वासंभ
वात् सतपोतप्यत सतपस्तप्त्वासर्वमसृजत तत्सृष्ट्वातदेवानुप्रावि
शदित्यादिश्रुत्यालोचनपूर्वकस्रष्टृप्रवेशाद्यनुपपत्तेः नहिकुंभकारी
दृणपूर्वकंरूपंसृजतितत्रानुप्रविशतिच अतोबहुमकर्तृत्वादिनाका व
र्यकारणात्मकादितनियमकत्वसत्ताप्रदत्वाद्यनंतगुणविशि
ष्टोममतत्त्वंज्ञेयइतिसिद्धम् ६ ॥

उक्तमेवेजयंतीटीका

एवंपरापरात्मकंप्रकृतिद्वयंनिरूप्येदानीमनयोःप्रकृतिरूपत्वंदर्शय
न्नद्वारैवस्वस्याखिलजगत्कारणमाह एतद्योनीनीति एतेचे
तनाचेतनरूपेउभेप्रकृतीयोनीप्रकृतीयेषांतानितथासर्वाणिस
मस्तानिस्थिरजंगमानिभूतानिब्रह्मादिस्थावरांतानिरूपाणितत्राचेत
नप्रकृतिर्ब्रह्मादिस्थावरांतोजीवावर्चदेहाद्याकारेणदेहरूपेणस्थि
ताचेतनरूपानन्तरचेतनरूपान्देहेंद्रियादीनवष्टभ्यदेहस्थरूपेणा
वस्थितापवंमत्प्रकृतिद्वयोद्भूतानिभूतानिभवंतीत्येवंप्रकारेणत्व
मवधारयनत्वचेतनचेतनरूपंतत्त्वप्रकृतिद्वयमेवदेहदेहरूप
णसर्वेषांस्थिरचररूपाणांभूतानांयद्योनिरूपंस्यात्तर्हिदेहबीज
योरिवतयोरेवजगत्कारणत्वंसिद्धंपरमेश्वरस्यतेवत्तुनास्तीतिवदे
तंप्रत्येवंमत्तःस्वयमेवाहमेवसर्वेषांजगतांकारणंभवामीत्याह अह
मिति अहमहमर्थाभिन्नस्वरूपःसर्वकारणकारणंसर्वेश्वरः

कृत्स्नस्य समस्तस्य चेतनाचेतनात्मकप्रकृतिद्वयसहितस्य जगतः प्रभवः
प्रभवत्यस्मादिति प्रभव उत्पत्तिकर्ता भवामि तथा तेनैव प्रकारेण प्रलयः
प्रलीयतेऽस्मिन्निति प्रलयस्तेनेनेति वा मृत्युत्वेन संहारकर्ताहमेव भवा
मि इत्येवं प्रकृतिद्वयरूपयोः सर्वभूतयोनित्वं परमकारणस्य तत्त्वयोर्यो
नित्वं च प्रकृतिः स्वतन्त्रयोऽप्याज्ञः महानव्यक्ते लीयते व्यक्तं महति लीयते
तत्त्वं तमसि लीयते तमः परे देवे एकीभवति विष्णोः स्वरूपात्परतो दि
ते हेतुरूपे प्रधानं पुरुषश्च [illegible] प्रकृतिर्यामयाख्याता व्यक्ताव्यक्तस्वरू
पिणी पुरुषश्चाप्युभावेतौ लीयते परमात्मनि परमात्मा च सर्वेषा
माधारः परमेश्वरः विष्णुनामा स वेदेषु वेदान्तेषु च गीयते इत्यादयः
नन्वजामेकां लोहितशुक्लकृष्णां अजो ह्येको जुषमाणोऽनुशेते त्व
यमणुकं च अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरी
रे अविनाशि तु [illegible] तद्विद्धि जात[illegible]स्याहि ध्रुवो मृत्युर्ध्रुवं जन्म मृत
स्य चेत्यादिश्रुतिस्मृतिभिः प्रकृतिद्वयस्याजत्वमविनाशित्वं च प्र
तिपादितं स्यात्तत्कथं तद्द्वयात्मकस्य जगतः प्रभवः प्रलयश्च भगवान् क
थं भवति यतोऽजस्याविनाशिनो वस्तुनो जन्मनाशसंभव इति चेन्न स श्रीः
त्येनयोरजत्वे विनाशित्वे तस्यापि आविर्भावतिरोभावमात्रमेव जन्म
नाशशब्दार्थौ चातेन तत्त्वविकारसत्त्वावतो अचेतनरूपायाः प्र
कृतेर्विकाररूपत्वादनित्यत्वात्परिणामस्वभावता चेतनस्यापि तत्त्वि
नाशाश्रयस्य देहाद्याकारेण संभवत्येव चेतनरूपा प्रकृति
स्तु निर्विकारत्वेन तथाप्यस्वरूपेण कर्तृत्वभोक्तृत्वादिरूपेणाति
हति अतः परमेश्वरादजयोरनयोः प्रकृतिद्वयोस्तदात्मका
स्य तद्रूपस्य जगतश्च जन्मादिकं संभवत्येव नासंभवशंकागन्ध
लेशोऽपि सत्कार्यवादस्तु नासतो विद्यते भाव इत्यस्मिन् श्लोके स्प
ष्टतरेणोक्तस्तत्रैव द्रष्टव्यः संदिग्धचित्तैरित्यर्थः ६ ॥

उक्तप्रकृतिद्वयैककार्यलिंगकमनुमानं मधुसूदनीटीका प्रमाणयन्नुक्तस्य तद्द्वाधाजगत्स्रष्टृत्वादिकारणत्वं दर्शयति ॥

देव यतो यत्त्वेनापरत्वेन च प्रागुक्ते द्वे तत्त्वलक्षणे प्रकृती योनिर्येषां तान्ये
तद्योनीनि भूतानि भवनधर्मकाणि सर्वाणि चेतनाचेतनात्मकानि
नित्यमनित्यानि निखिलानीत्येवमवधारय जानीहि कार्याणां चिदचि
द्ग्रन्थिरूपत्वात्तत्कारणमपि चिदचिद्ग्रन्थिरूपमनुमि[illegible]नित्यर्थः

एवंक्षेत्रक्षेत्रज्ञलक्षणे ममोपाधिभूते यतः प्रकृती जगतः ततस्तद्द्वाराहंस
र्वज्ञः सर्वेश्वरोऽनंतशक्तिर्मायोपाधिः कृत्स्नस्य चराचरात्मकस्य जगतः
सर्वस्य कार्यवर्गस्य प्रभव उत्पत्तिकारणं प्रलयस्तथा विनाशकारणं स्वाप्नि
कस्येव प्रपंचस्य मायाश्रयत्वविषयत्वाभ्यां मायाव्यहमेवोपादानं द्रष्टा
चेत्यर्थः ६ [illegible]
[illegible] ॥

सदानंदीटीका

एते परापरे प्रोक्ते क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनिरुत्पत्तिर्येषामेतद्योनीनि
तानि वै १ चराचराणि सर्वाणि भूतानीत्युपधारय एवं चोपाधिभूते मे
क्षेत्रक्षेत्रज्ञलक्षणे २ जगतः प्रकृती यस्मात्तद्द्वाराहं ततो हरिः सर्व
ज्ञोऽनंतशक्तिश्च मायोपाधिरधीश्वरः सर्वस्य कार्यवर्गस्य जगतो जन्म
कारणं विनाशकारणं तद्वत्स्थिरजंगमरूपिणः स्वाप्निकस्येव विश्व
स्य मायकस्यास्य सर्वतः उपादानं तथा द्रष्टा मायावित्वादहं हरिः ५॥६

नीलकंठीटीका

एतदिति एते परापरे क्षेत्रक्षेत्रज्ञरूपे प्रकृती योनिः उत्पत्तिलयस्थानं
येषां भूतानां तानि एतद्योनीनि भूतानि चतुर्विधानि इत्येतदुपधार
य सम्यग्जानीहि किंपानजलानामिव एते प्रकृती ईश्वरादन्ये इत्या
शंक्याह अहमिति कृत्स्नस्य सर्वस्य प्रकृतिसहितस्य जगतो जडा
जडरूपस्य प्रभवः प्रभवत्यस्मादिति प्रभव उत्पत्तिकारणं तथा प्रली
यतेऽस्मिन्नित्यप्रलयः लयस्थानं च अतस्ते उभे अपि प्रकृती मत्तो ना
तिरिच्येते ६ ॥

आनंदीटीका

एते मदीये परापरी प्रकृती योनिरुत्पत्तिकारणं येषामीदृशानि सर्वाणि
भूतानि भूमिरापोऽनलेति प्रोक्तानि संतीत्युपधारयस्व अहं सर्वस्य ज
गतः प्रकृतिविकृतिरूपेण परिणामं गच्छतस्तत्त्ववर्गस्याहं परमे
श्वर एव प्रभवस्तथा प्रलयश्च अतः परमकारणात्सर्वं प्रादुर्भवति मय्ये
व सर्वं लीयते चेत्यर्थः दर्शितानाचात्र चाज्ञानस्पष्टनिरस्तनिप्रमा
णोपपत्तिरूपोऽज्ञाने यथास्य प्रकृतिविकृतिवर्गस्योत्पत्तिरात्मापेक्षा
तथा नमाक्षकारणमात्मापेक्षेत्यनात्मनिर्व्याह ६ ॥

रामकंठीटीका

एतेयथाप्रतिपादितस्वरूपेमदीयेप्रकृतीयोनिरुत्पत्तिकारणमेषांता
दृशानिसर्वाणिभूतानीत्युपधारयबुद्ध्यानिश्चयेन जीवभूताहिप्रकृ
तिश्चित्स्वरूपत्वाऽव्यभिचारात् वस्तुतः परमकारणत्वेमात्मनो
मत्तः परमेश्वरादभिन्नापिमन्मायावशादेवद्भिन्नेवाऽपत्वाजडयाप्र
कृत्याऽनादित्वेनसंबद्धातनीतामेवगुणात्मिकांप्रकृतिमहदादि
भावेनपरिणतामात्मत्वेनाऽभिमन्यमानासत्त्वादिसाधनभावेनचे
तनाऽचेतननानाभावरूपंविषयमपेक्षितइत्यादिप्रकृतिद्वय
संबंधेजगतःकारणमित्येतेप्रकृतीसर्वभूतानांयोनिरित्युक्तं त
थाचववक्ष्यति यावत्किंचित्संभवतिसत्त्वंस्थावरजंगमम् क्षेत्रक्षेत्र
ज्ञसंयोगात्तद्विद्धिभरतर्षभेति एवंजगत्कारणभूतयोरेतयोर्मत्स
ंबंधित्वोः प्रकृत्योर्मन्मायैवेऽवमवभासनेकारणमिति कृत्स्नस्य
सर्वस्यनिरवधिकचराचरभूतभेदमयस्यजगतःप्रभवःप्रलयश्चाह
मत्तएवैतत्सं भवति मय्येवैतल्लीयतइत्यर्थः मत्संकल्पमा
त्रोज्जाविनयामाययेवतेजडाजडेप्रकृतीआभासयेते तान्निबंधनौ
चसर्गसंहारावित्येतयोर्जगत्प्रभवप्रलययोरहमेवमूलकारण
मित्यर्थः

६ ॥

लौकिकी व[illegible]टीका

एवंमायावभासितेपरापरभेदभिन्नेजडचेतने द्वेप्रकृतीजगत्का
रणमितिकार्यलिंगानुमानेनप्रमाणयति ॥ एतेपरापरेप्रकृती
योनिरुत्पत्तिकारणंयेषांतान्येतद्योनीनिसर्वाणिचतुर्दशविधा
निभूतानि स्थावरजंगमात्मकानि इत्युपधारयनिश्चयेनबुद्ध्या
त्व कार्यलिंगेनसामान्यतोदृष्टेनानुमिनुहीत्यर्थः तत्रजडाप्रकृ
तिर्देहरूपेणपरिणमते चेतनानमदंशाभूतःभोक्तृत्वेनदेहेषुप्र
विश्यस्वकर्मणातानिधारयतीत्यर्थः तेचमदीयप्रकृतीमत्तएवा
विर्भूतेइतिस्वस्यापितामाह अहमिति अहमीश्वरः कृत्स्नस्यज

गी॰
टी॰
स॰

31

प्रकृतिकस्यजगतस्थावरचभेदभिन्नस्य मयिमहदंडरसन्यायेनअभेदे
नसतएव तदुक्तं स्वामिनस्त्वात्मसंस्थस्वभावजातस्याभासनम् अ
स्येवनविनातस्मादिच्छामणेःप्रवर्ततेइति प्रभवःसेच्छयाअभेदेन
आविर्भाविकः अहमिदमितीदंतोद्रेकेण प्रलयस्तिरोभावकश्च इ
दमहमिति अहंतोद्रेकेण मत्संकल्पमात्रेणैव यया मायया हि प्रकृ ते
तीआभासेने तन्निबंधनौच सर्गसंहारौ इत्यतोहमेवमूलकार
मै णमित्यर्थः यथोक्तंविज्ञानरवे जलस्यैवोर्मयोवह्नेर्ज्वालाभयः
प्रभारवेः ममैवभैरवस्यैताविश्वभंगाविनिर्गता इति विरूपाक्ष
पंचाशिकायां स्वांगेविश्वगतात्मनिजमयोदनिभेस्वशक्तिलह
रीणां संभेदविभेदाभ्यांसृजतिध्वंसयतिचैवजगादिति ६ ॥

पंचोलीटीका

नो

अनयोःप्रकृतित्वंदर्शयन्स्वस्यतत्द्वारासृष्ट्यादिकारणतामा
ह एतदिति हेअर्जुनसर्वाणिभूतानिएतद्योनीनिएतेपरापरेहे
अक्षेत्रज्ञलक्षणेप्रकृतीयोनिर्येषांभूतानांतानिएतद्योनीनिइतिउप
धारयअवधारययस्मात्ममप्रकृतीःसर्वभूतानांकारणंअतअहं
कृत्स्नस्यजगतःप्रभवःप्रलयोविनाशश्चभवामि ६

तत्वदीपिकाटी·

एतेपरापरेप्रकृतीयोनिरुत्पत्तिकारणंयेषांतान्येतद्योनीनिसर्वाणि
चतुर्दशविधानिभूतानिस्थावरजंगमात्मकानीत्युपधारयनिश्च
येनतुःअस्यकार्यलिंगेनशास्त्रात्मनोरदृष्टैतानुमिनुमिमर्णःतत्रजडा
प्रकृतिर्देहरूपेणपरिणमतेदेवनात्मदंशभूताभोक्तातेनदेहेषु
प्रविश्यस्वकर्मणातानिधारयतीत्यर्थःएवंमदीयेप्रकृतीमत्तआवि
र्भूतेइतिमत्तस्सर्वाभूतामाह अहमिति अहमीश्वरःकृत्स्नस्यप्रकृति
जस्यजगतस्थावरभेदभिन्नस्य मयिमहदंडरसन्यायेनअभेदेनसत
एव तदुक्तं स्वामिनस्त्वात्मसंस्थस्वभावजातस्याभासनं अस्येवन
विनातस्मादिच्छामणेःप्रवर्ततेइति प्रभवःस्वेच्छयाभेदेनआविर्भाव

एतदेवस्फुटयति एतद्योनीनीत्यर्थेन एते पूर्वोक्ते द्विविधे
प्रकृतीयोनीपरम्परयाकारणभूतेयेषां तादृशानि सर्वाणि
भूतानिभवंतीत्युपधारयबुद्ध्यस्वपरम्परयावान्नाद्भवंतीत्ययं
प्रतिपादिता एतेचप्रकृतीमत्तःसंभूते अतोहमेवास्यकृत्स्न
स्यसकलस्य यद्वा क्रियतेइतिकृतं कर्माणिकिं कृतिक
र्माणिस्वातीतिकृत्स्नाःकर्माधिकारी तस्यभोग्यादित्वाद्विषयरू
पस्यजगतोजंगमवर्गस्यवा प्रभवउत्पत्तिकारणंप्रलयःसं
हारकारणंचास्मीति मय्येवैते संह्रियंते निमित्तमात्रंत्वंमा
स्वधर्मान्निवर्तस्वेतिभावः ६ ॥

मधुभाष्य

६ ॥

32

भाषाअनुवाद

प्रकृति के पर औ अपर ये दो भेद देखाय कै अब प्रकृति के द्वारा
सृष्टि आदि की आप ही कारण है सो कारणत्व कहते है कि
हे धनंजय क्षेत्र कहे शरीर औ क्षेत्रज्ञ कहे जीव यह जो दो प्र
कारकी प्रकृति है योनि कहे कारण जिनका ऐसे स्थावर जं
गमयावत भूत इसी कारण से उत्पन्न है यह जानो और विशे
ष यही है कि जडरूप निकृष्ट प्रकृति देहरूप अनेक रूप पाव
ती है और मेरा अंश जो चैतन्य सो भोक्तारूप शरीरमे प्रवेश
करके अपने कर्मके अनुसार अनेक देह धारण करता रहना
है और यह प्रकृति हमी से उत्पन्न है इस कारण संपूर्ण जग
तके प्रभव कहे उत्पन्न करणेवाले औ प्रलय कहे संहार कर्ता
भी हमही है ६ ॥

दोहा

यासें होते जीवसभ हे अर्जुन यह जान मेहीं यासभजगतको प्र
लय उत्पतिस्थान ६॥

मत्तःपरतरंनान्यत्किञ्चिदस्तिधनंजय मयिसर्व मिदंप्रोतंसूत्रेमणिगणाइव ७ ॥

शांकरभाष्य

यस्मादेतत्तः मत्तःइति मत्तःपरमेश्वरात् परतरंअन्यत् कारणान्तरं किञ्चिन्नास्तिनविद्यतेअहमेव जगत्कारणमित्यर्थः हेधनंजय यस्मा देवं तस्मान्मयिपरमेश्वरे सर्वाणिभूतानिसर्वमिदंजगत् प्रोतमनुः स्यूतमनुगतमनुविद्धं ग्रथितमित्यर्थः दीर्घतन्तुषु पटवत्सूत्रेच मणिगणाइव ७ ॥

आनंदगिरीकृतटीका

प्रधानापरैनोःत्वात् पुरुषवत् परमात्मनोपि यदन्यत् परंस्या दित्याशंक्यप्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वरस्योक्तं नयजीव्य परिहरति यस्मादिति नान्यदस्ति परमित्यत्र हेतुमाह मयीति पर तरणाद्यार्थमाह अन्यदिति स्वातन्त्र्यव्यावृत्त्यर्थमंतरणादः निषेध फलंकथयति अहमेवेति सर्वजगत्कारणत्वेन सिद्धमर्थं द्विती यार्द्धव्याख्यानेन विशदयति यस्मादिति ओतोदीर्घेषु तिर्यक्चप टवदितिषु तंतुषुपटस्यानुगतिरवगम्यते तद्वन्मय्येवानुगतं जग दित्याह दीर्घेति यथाचमणयः सूत्रेऽनुस्यूतास्तेनैव धीयंते तद भावे विप्रकीर्यंते तथामय्यात्मभूतेनसर्वंव्याप्तं ततोनिष्कृष्टं विनष्टमेव स्यादिति श्लोकोक्तं दृष्टान्तमाह सूत्रेइति ७ ॥७ ॥

स्वामिकृतटीका

यस्मादेवंतस्मात् ॥

मत्तःसकाशात्परतरंश्रेष्ठंजगतःसृष्टिसंहारयोःस्वतंत्रंकारणंकिंचि दपिनास्ति किंतुअहमेवेत्याह मयीति किंत्वहमेवत्याह मयिसर्वमिदंजगत् प्रोतंग्रथितंआश्रि तमित्यर्थः दृष्टांतःस्पष्टः [illegible] ७ ॥

पिशाचभाष्यटीका

मत्तःपरमेश्वरात्परमन्यत्किंचिन्नास्तिधनंजय मयि[illegible]सर्वाधारे सर्वमिदंप्रोतंस्यूतंसूत्रेमणिगणाइव ७ ॥

रामानुजभाष्यटीका

गी॰ टी॰ स॰ यथा सर्वकारणस्यापि प्रकृतिद्वयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणस्त्वेन
तस्यापि शेषित्वेन कारणतया शेषितया वाहं परस्तथा ज्ञानशक्तिबला
दिगुणयोगेन चाहमेव परतरः मत्तो व्यतिरिक्तं मत्प्रिज्ञानबलादिगुणान
न:^ रयोगि परतरं नास्ति सर्वमिदं चिदचिद्वस्तुजातं कार्यावस्थं कारणा
वस्थं च मच्छरीरभूतं सूत्रे मणिगणवदात्मतयावस्थिते मयि प्रोक्तमा
34 श्रितं यस्य पृथिवी शरीरं यस्यात्मा शरीरं एवं सर्वभूतान्तरात्मा अपहत
पाप्मा दिव्यो देव एको नारायण इत्यात्मशरीरभावेनावस्थानं जगद्ब्रह्मणो नां^
णा^ नर्यामिब्राह्मणादिषु प्रसिद्धं ७ ॥

अभिनवशङ्करकृतटीका ७ मत्तः परतरं नान्य

दित्यारभ्य मोहितं नाभिजानाति मामेभ्यः परमव्ययम् इत्यन्तम्

परमार्थप्रपाटीका

दिदं वं न स्यात् मत्त इति^ मत्तः मत्कारणात् परतरमुत्कृष्टमन्यत् किंचिदपि नास्ति यद्वा सतेनतद्व
रमेव सर्वप्रभवप्रलयनिमित्तमहमेवास्मीत्युक्तमिदानीं स्थितिनिमित्त भि^
महमेवास्मीत्याह मयीति सर्वं विचित्रभूतजातं मयि प्रोतं किमि
व सूत्रे मणिगणा इव गुणग्रथितविचित्रवर्णप्रमाणकृतयो मणयः
कस्मिन् सूत्रे प्रोता आस्तिष्ठंति तद्वत् ७ ॥

वनमालीटीका

जगज्जन्मस्थितिकर्तृत्वं स्वनेतृत्वस्योक्तं तदुपपादयति मत्त इति यथा
सर्वकारणभूतायाः प्रकृतेर्बद्धाबद्धजीवजातस्य च नियामकत्वेन तथा र
क्षकत्वेन कार्यमात्रोत्पादकत्वेनाहं परस्तथाचिन्त्यशक्तिज्ञानबलैश्वर्य
वीर्यवैभवयोगेनाहमेव परतरोऽतिश्रेष्ठो मत्तोऽन्यत् किंचित् परतरं नास्ति य
द्यपि मत्तोऽन्यत् परं किंचिन्नास्त्येवेति वाच्यं न तु तस्याभ्यधिकः कुतोऽन्यत्पर मा^
तिवक्ष्यमाणत्वेन समाधिकमात्रस्य निषेधसिद्धान्तरमन्यथा वार्थः स यू^
मस्याधिकस्य कस्यचित् सत्वे हानिर्यथाधिक एव निषिद्धस्तद्धर्थका
र^ त्वेन तन्मार्थकस्यात्तथापि सर्वाज्ञमानेनत्राणवत्त्वेनात्र मन्नास्तिद्धाविपित
नोपकृष्टस्य कर्मकरणसंप्रदानापादानाधिकरणैर्देर्विश्वस्य स्रष्टा पुपत्त णा^
त्रस्य जलालकर्तृकवरादिस्रष्टा मरुदादेरिव स्वातंत्र्यं काप्यात्रन्निरा
सायनरपूप्रत्ययः आह भगवान् तदनन्यत्वमारम्भणशब्दादिभ्यः यद्य
पि जलालादिकर्तृकास्तहिः स्वतन्त्रबहुसाधनापेक्षत्वाद्दृष्टानन्तया पितर

बृहत्त्वंतेन ब्रह्मणः सृष्टिस्थानकल्पा किंतु स्वतंत्रसाधनस्य
तदनन्यत्वमनन्यत्वाभावः स्वतंत्रसाधनेनास्तीत्यर्थः किं॰
स्विदासीदधिष्ठानमारंभणं कतमत्स्विदिति स्वतंत्राधिष्ठा
नाद्याक्षेपकारंभणशब्दादिभ्य आरभ्यते नेत्यारंभणं सा
धनं अधिष्ठानमधिकरणं अग्रेऽन्तराभावात्प्रश्नार्थकः
किंस्विदिति शब्दः किंत्वाक्षेपार्थकमेव नच स्वरूपेणैवान्य
स्य निषेधोऽस्तु संकोचे मानाभावादिति वाच्यं सत्त्वाद्यावर
स्येति सूत्रेण तम आसीत्तमसा गूढमग्रेऽप्रकेतं अस्मान्मा
यी सृज्यते विश्वमेतदिति श्रुत्या च अवरस्येश्वराधीनस्य स
त्त्वबोधनात् असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषा
दिति सूत्रेण सृष्टेः प्रागसदेवेदमग्र आसीदिति सत्त्वमाशं
क्य धर्मांतरेणैव निषेध उक्तः नैवेह किंचनाग्र आसीत् मि
षदिति वाक्यशेषमिषत्वेन विकासितत्वेनैव हि निषेधः॰
स्वरूपेणैव निषेधांगीकारे मतेनानन्यदित्येतावतैव सि॰
द्या परतरमिति वैयर्थ्यापत्तेः भिन्ननिषेधस्यापि भिन्नत्वेन भि
न्नमात्रनिषेधस्याहतत्वाच्च नकेवलं विशेषादपादिकर्तृ
त्वेनैव परोपितसर्वाधारकत्वेनापीत्याह मयीति यथा
मणिगणाः सूत्रे प्रोतास्तिष्ठन्ति तथेदं बद्धमुक्तजीवजडा
त्मकं विश्वं सकलश्रुतिप्रतिपाद्येचिंत्यानंतशक्तिमपि मा॰
त्रप्रोतं मदधीनसत्ताकं तिष्ठति द्युभ्वाद्यायतनं स्वशब्दा
दिति सूत्रेण यस्मिन्द्यौः पृथिवी चेत्यादिनोक्तं द्युभ्वाद्यायतनं॰
नेतमेवैकं जानथ आत्मानमिति स्वस्य ब्रह्मणैवावका॰
त्मशब्दप्रयोगात् द्युभ्वाद्यायतनं परं ब्रह्मैवेत्यर्थः केन वा
युना गौतम सूत्रेणायं लोकः परलोकश्च सर्वाणि भूता॰
नि संचारणानि भवंति सर्वो वा वपते प्राणाश्च प्राणिनश्च
देवाश्च दिव्यानिश्च लोकाश्च लोकिनश्च विश्वावेवोता
श्च प्रोताश्च कृत्या पत्रोतमेतत्प्रोतं च विश्वमक्षरसंज्ञके
आधार सर्वभूतस्य समप्रसीदत्वमेहरिरिति वेदत्वेन यस्मि

त्रिस्थितनेनंतेहष्टेस्वगिवतिष्टति सदसद्ग्रथितंविश्वंविश्वा
गेविश्वकर्मणि यस्मिंविश्वानिभूतानितिष्टंतिचविशंति॰
च गुणभूतानिभूतेशसूत्रेमणिगणाइव बुद्धिर्मनामह
ह्याप्तस्तेजोभिःखंमहीचया चतुर्विधंचयद्भूतंसर्वंत्वस्मि
प्रतिष्टितं चतुर्विधानांभूतानांत्रिषुलोकेषुमानवः प्र
भवस्तेवसर्वेषांनियतं
चैवयुधिष्ठिरेतिमहाभा
रत नचसर्वथारकत्वे
नभुभुक्षेयस्यसर्वे
तत्तंसिद्धम् १ ॥

[illegible]

[illegible] २ ॥

उत्तमवैजयंतीटीका

नत्वकालोभवायभूतानामभवायचपाण्डव कालमूलमितिज्ञा
त्वाभवस्थैर्यंधरोर्जुनतत्त्वष्टाकालेनकालेनपुनर्यास्यन्तिसंयमंका
लात्मकमिदंसर्वंज्ञात्वाशममवाप्नुहीतिमत्स्यत्वेतिवाक्यात्कालस्यक
र्मणाज्ञायतेजैनः कर्मणैवविलीयतेइतिवचनात्कर्मणश्चस्वभा
वमेकेकवयोवदन्तीतिवचनात्स्वभावस्यचगौरनायन्तवतीजनि
त्रीभूतभाविनीत्रिगुणेनजगतोनिरन्तादिप्रभवाप्ययमित्यादिवाक्या
त्प्रधानस्यच जीवाद्भवंतिभूतानिजीवेतिष्ठंतिचंचलाः जीवेप्रल
यमिच्छंतितज्जीवात्कारणंपरमितिश्रुतिवाक्याज्जीवस्यचहिर
ण्यगर्भःसमवर्त्तताग्रे आदिकर्त्तासभूतानांब्रह्माग्रेसमवर्त्ततब्रह्मा
देवानांप्रथमःसंबभूवविश्वस्यकर्त्ताभुवनस्यगोप्तेतिश्रुतिवाक्य
हिरण्यगर्भस्यच नसत्तचासच्छिवएवकेवलइतिश्रुतिवाक्या
च्छिवस्यापिजगज्जन्मादिकारणत्वेप्राप्तेसति अहमेवसर्वजगतः
प्रभवःप्रलयस्तथाभवामीतितवोक्तिरघटितेवमेभातीत्याशंक्यस्व
स्यसर्वकारणपरत्वमाह मत्तःपरतरमिति हेधनंजयपाण्डुप्राण
धनंजयकर्त्तेइत्यनेनयथात्वंसकलभूर्जलेश्वर्यवीर्यादिकं नि
१८ रस्यस्वबलेनजसातिष्ठसितथाहमपिस्वैश्वर्यबलेनयत्किंचिद्धत्व
कारणत्वेनदृश्यमानानपिकालदेवादीन्निरस्याचिन्त्यानन्तगुण
गणाकैवैभवत्वेनातिदैर्घ्यः संलिष्ठामीतिसूचितमतः सर्वेश्वरेश्वा
रात्सकलकारणकारणात्कंसारेस्त्वमात् [illegible] लेयात्क
स्मात्परतरंनिरतिशयाचिन्त्यानन्तगुणगणैश्वर्यादिकत्वेनोत्य
न्तपरमुत्कृष्ट मतिशयसाम्यशून्यंसर्वकारणमन्यदपरंकालक
र्मामरादिवस्तुजातंकिंचित्स्वल्पमपिनास्तिभूतभविष्यतोरप्युप
लक्षणं अनादौभूतकालेपिनासीत्अनागतेनभविष्यत्कालेपि

गी॰
टी॰
म॰

36

न भविष्यतीत्यर्थः यद्वा मत्तोऽन्यत् मद्व्यतिरिक्तं परतरं निरतिशयपाल
कं स्रष्टृ वा किंचिदपि वस्तुजातं नास्ति किं त्वहमेव मातृपित्रादेरप्यतिशु
यवात्सल्यया सर्वेषां जगतां पालकोऽथवा येन तावेन तवत्त्वं सर्वे
ष्वन्तरात्मस्वरूपत्वेन परिदृष्टोऽस्मि सद्दृष्टांतेन तत्सर्वगतत्वमेव दर्श
यति मयीति मयि सर्वकारणात्मके सर्वाधिष्ठानस्वरूपे सर्वेश्वरे सर्वे
चराचरात्मकं ब्रह्मेशादिस्थावरान्तमिदं विश्वं प्रोतं ग्रथितं तत्र दृष्टा
न्तः यथैकस्मिन्नेव दृढे तन्तौ सूत्रेऽविपर्येण नाममणिगणा मणिसमूहाः
ग्रथिताः संतस्तदाधारमवलंब्य तिष्ठंति तथैवाधारभूतं मामाश्रि
त्य सर्वं चिदचिद्वस्तुमात्रं तिष्ठतीत्यर्थः इत्यनेन स्वरूपोऽधिष्ठानं स्व
रूपस्यैव चिदचिन्मयस्य जगतश्चोपियत्वं सूचितं एवं यथा स्व मे
व भगवता स्वस्य सर्वकारणत्वं सर्वपरत्वं च स्वमुखेनैव प्रतिपादि
तं तथा श्रुतिस्मृत्यादिवाक्यैरपि तथा हि यतो वा इमानि भूतानि जा
यन्ते यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः
स कारणं करणाधिपाधिपः न कस्य कश्चिज्जनिता न चाधिपः प्रधा
न पुरुषाव्यक्तकालानां कारणं हि यत्तत्पदं पश्यन्ति सूरयो नित्यं न हि सोः
परमं पदं अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते न सोऽस्ति प्र
त्ययो लोके यत्र कालो न भासते ज्ञः कालकालो गुणी सर्वविद्यः
इत्यादिकैः कालादिकारणत्वप्रतिपादकानां वाक्यानामपि पर
मेश्वरकारणप्रतिपादनपरत्वमेव स्यात् तदन्तर्भिन्नत्वेन तेषां कार
णत्वं संभवति तथा हि केवलः कालो जगत्कारणं न स्यात् यतः का
लं तथान्ये परिमृग्यमाना इति श्रुत्या कालवादिनां भ्रांतित्वश्रवणा
त् ज्ञः कालकालो गुणी सर्वविद्यः इति श्रुत्या च सर्वेषां सेश्वरनिय
म्यत्वादीश्वरशक्तित्वादचेतनत्वाच्च कालो भवायेत्यादीनि वाक्यानि
तत्तन्नाम्ना तदयुक्तं परमेश्वरं कारणं वदंति कालः कलयतामहं का
लोऽस्मि लोकक्षयकृत्प्रवृद्धः इत्यादि वक्ष्यमाणस्ववचनस्वारस्यात्
केवलस्य कर्मणोऽपि जगत्कारणत्वं न स्यात् जडस्वरूपत्वात् अविद्या
कर्मसंज्ञान्या तृतीया शक्तिरिष्यते इति वाक्यात्परमेश्वरशक्तित्वेन
तन्नियम्यत्वाच्च वाक्यानि तत्तत्प्रेरकत्वेन तत्तन्नाम्ना ईश्वरस्यैव कारण

त्वेवदंतिनामानि सर्वाणि यमाविशंन्ति सर्वनामं सर्वकर्मेत्यादिवाक्यप्रा
माण्यात् स्वभावस्यापि जगत्कारणता नास्ति अचेतनत्वात् तथाहि
तन्मते च न कारणसापेक्षकार्यमपि तत्स्वतएव तत्र एकत्वाने स्वाभावि
कं जगदिति प्रतिज्ञाया तत्साधको हेतुरस्ति तेवेति भावपक्षे स्वभाववा
दहानिः यत्तत्र साधकं हेत्वन्तरं तदेव तत्र मुख्यकारणं तस्यैवोपचारत्वा
पत्तेः द्वितीयहेत्वन्तराभावपक्षे मूकतापत्याप्रतिज्ञाभंगान्न स्वभाव
वादसिद्धिः वाक्यानान्तु अयमर्थः स्वस्यासौ भावश्च स्वभावः स्वस्तत्पद
पदस्यार्थः यद्वा भावो जन्म संसारो वा भव एव भावः स्वार्थे णप्रत्ययः
स्वेनैव स्वेच्छयैव भावो जन्म यस्य सतथा स्वस्मिन्भावः संसारो यस्य सतन
था स्वे स्वीयाश्रासाधारणा स्वाभाविका वा गुणादयो यस्य सतथेत्यादि
समासैर्वा तस्यापि तद्वाचकत्वात् स्वाभाविकी ज्ञानबलक्रिया चेति श्रु
तेः अन्यकल्पनायामङ्गदोषागौरवादद्यटनोक्तिवैत्यर्थः अभा
वोपि न जगद्धेतुः यतः स्वतोभावस्य गगनकुसुमायमानस्य भावात्म
ककार्योत्पादने कथमपि सामंजस्यान्नहि शशविषाणादीनां का
र्योत्पादनं अत्रापि हि हि श्रुतिगोचरं स्यात् वाक्ययोस्त्वमर्थः अत्र ख५
स्मेति श्रुतेः अक्षराणामकारोस्मीति वक्ष्यमाणाच्च अव्याप्तौ स्वेनिक
मेधारयसमासेन अकारवाच्यस्वरूपं ब्रह्मेति सिद्धं किमभावस्यानुपवा
चकत्वात् अव्याप्तौ कश्चेति वा स्वदेव स्वरूपोऽन्य इत्यर्थः एवं शून्यवाद
स्यापि नैव कारणता सदेव सौम्येदमग्र आसीत् ब्रह्म वा इदमेकमे
वाग्र आसीदेको ह वै नारायण आसीन्न विरिञ्चिस्तदासीद्धरिरेव निष्कल
इत्यादि श्रुतिकदंबेन शून्यवादस्य शून्यत्वप्रापितं स्यात् केवलस्य
प्रधानस्यापि जगत्कारणत्वं न संभवति मृत्स्नवर्णादिवत्परतन्त्रत्वा
त्वादचेतनत्वाच्च यथा मृत्स्नवर्णादयो घटकुण्डलादयो न यो पि कु
म्भकारस्वर्णकारादिकं विना घटकुण्डलादिकार्योत्पादने समर्थाः
स्तत्वेयं प्रकृतिः सर्वभूतयोनिभूतापि मद्व्यतिरेकेण समर्था स्यात्
मदीक्षणेनैव कार्यमुत्पादयत्यन्यथा न तदेतनवजस्मा इत्युक्तेन तथा
हमिति श्रुतिस्तत्र प्रामाण्यात् मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधा
म्यहमित्यत्रैवोक्तत्वाच्च एवं जीवस्यापि जगत्कारणत्वं न घटते सदेव सौ

गी॰ टी॰ स॰

37

म्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेत्यादिना कारणस्यैकत्वप्रतिपादनात्
चेतनश्चेतनानामित्यादिना ग्रंथेनानात्वव्यपदेशादित्यादिना च जीवाना
मनन्तत्वोक्तेर्जीवकारणवादे बहुत्वप्रसंगाच्च वाक्यं तु जीवयति प्राण
यतीति व्युत्पत्त्या जीवपदेन परमात्मानं वदति अन्यथाय आत्मनम
न्तरो यमयतीत्यादिश्रुतीनां जीवस्य नियम्यत्वप्रतिपादकानां व्याघा
कोपप्रसङ्गः स्यात् एवं च हिरण्यगर्भस्यापि जगत्कारणता न स्यात् न
सन्न चासच्छिव एव केवलः हिरण्यगर्भं पश्यति जायमानमित्यादि
वाक्येभ्यस्तस्य पूर्ववर्तित्वाभावात् वाक्यानि तु हिरण्यानि हिरण्यम
यानि ब्रह्माण्डानि गर्भे यस्येति समासेन हिरण्यगर्भशब्दकं परमात्मा
नं वदंति अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ईदृशानां तथा
तत्र कोटिकोटिशतानि चेति पराशरवचनात् एवं ब्रह्मादिशब्दोपि
परमेश्वरवाचकः बृहि बृंहि वृद्धावित्यस्माद्धातोरौणादिकमनप्रत्य
यसिद्धो बृहत्त्वात् बृंहणत्वाच्चेति निर्वचनात् एवं च शिवस्यापि जगत्का
रणत्वं न स्यात् यतस्तस्यापि कालादिपारतंत्र्यश्रवणात् ममापि
कालो ग्रसतेऽज्ञः अजरसायनमित्यादिना स्कंदस्य पुत्रं प्रति स्वयमेव
त्रिलोचनेनोक्तत्वात् वाक्यं तु शिवपदेनानंदवाचकेन तं परमात्मा
नं वदति विज्ञानमानंदं ब्रह्मेति श्रुतेः इतरथा एको ह वै नारायण
आसीन्न ब्रह्मा नेशानः नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते
यस्माद्ब्रह्मा न धाता हि ब्रह्मरुद्रेंद्रमरुदश्विनः वसवश्च महादित्यैरित्या
दिश्रुतिस्मृतिविरोधादित्यलं विस्तरेण ७ ॥

यस्मादहमेव मायया सर्वस्य जगतो जन्म **मधुसूदनी टीका** स्थितिभंगहेतुः तस्मात्परमार्थतः ॥

निखिलप्रपंचाकारपरिणतमायाधिष्ठानात्सर्वावभासकात्मनः सद्रू
पेण च स्फुरणरूपेण च सर्वानुस्यूतात् स्वप्रकाशपरमानंदचैतन्या
त्परमार्थसत्यात् स्वप्नदृगिव स्वाप्निकं मायावीव मायिकं शु
क्तिकावच्छिन्नचैतन्यादिव तदत्तानुकल्पितं रजतं मत्तः परतरं
परमार्थसत्यमन्यत् किंचिदपि नास्ति हे धनंजय मयि कल्पितं प
रमार्थतो मत्तो न भिद्यत इत्यर्थः तदनन्यत्वमारंभणशब्दादिभ्य इति
न्यायात् व्यवहारदृष्ट्या तु मयि सद्रूपे स्फुरणरूपे च सर्वमिदं जगत्

न

तेषुतेषुप्रोतं मत्सत्तयासदिव मत्स्फुरणेन स्फुरदिव व्यवहारायमायाम
यायकल्पते सर्वस्यचैतन्यप्रोतत्वमात्रे दृष्टांतः सूत्रेमणिगणाइव अथ
वासूत्रेतैजसात्मनिहिरण्यगर्भत्वमहंहिस्वप्नग्रामामणिगणाइवेति
सर्वांशेपिदृष्टांतोव्याख्येयः अन्येतुपरमतस्थेनानुमानसंबंधप्रपंचे भेद
णेभाइतिसूत्रोक्तस्यसर्वपदस्योत्तरत्वेनश्लोकमिमंव्याचक्षते मत्तः
सर्वज्ञात्सर्वशक्तेः सर्वकारणात्परतरंप्रधानस्यतरंसर्वस्यजगतःसृ
ष्टिसंहारयोःस्वतंत्रंकारणमन्यन्नास्तिहेधनंजय यस्मादेवंतस्मात्म
यिसर्वकारणेसर्वमिदंकार्यजातंप्रोतं प्रथितंनान्यत्र सूत्रेमणिगणा
इवेति दृष्टांतस्तुग्रथितत्वमात्रेणानुकारणत्वेनकनकेकुंडलादिवदितित दिव
योग्योदृष्टांतः ७ ॥ [illegible]
[illegible]
[illegible] ॥

सदानंदीटीका

यतोहंसर्वजगतोजन्मस्थित्यादिकारणं ततोमत्तोमहामायाधिष्ठाना
जगदीशात् १ सत्तास्फुरणरूपेणानुस्यूतात्स्वप्रकाशतः वस्तुसत्य
त्रि परंकिंचिन्नान्यदस्तिधनंजय २ नमय्यारोपितंमत्तोभिद्यतेपरमार्थतः
व्यवहारदृशासर्वंसच्चिद्रूपेमयीश्वरे ३ जडज्ञानमिदंसर्वंप्रोतंमत्स्वरूपा त्त
नतं प्रोतत्वमात्रेदृष्टांतःसूत्रेमणिगणाइति ४ स्वामिकामणयोयद्व
त्स्वमहष्टिकल्पिताः सूत्रेतैजसरूपेतुसर्वेलोकानिदर्शने ५ ॥७

नीलकंठीटीका

एवमेकविज्ञानात्सर्वविज्ञानंप्रकृतंआत्मनोजगदुपादानत्वेनोपपा
द्यतेनैवात्मनोनिर्विकारत्वहानेप्रामेत्याह मत्तइति कारणात्सदा
देःपरंश्रेष्ठभूतंघटादि व्यवहारेतयोर्भेदानुभवात् परतरंत्वगवाच्या
दि सदनुपादनकत्वात् एवंब्रह्मणःपरतरंनद्द्रनुपादनकंकिंचिद
पिनास्तिहेधनंजय एवंप्रपंचेब्रह्माव्यतिरेकंप्रदर्श्यब्रह्मणिप्रपंचव्य
तिरेकंसदृष्टांतमाह मयीति मयिसद्रूपेणस्फुरणरूपेणचसूत्रवत्
सर्वत्रानुस्यूते यदिदंसर्वंमणिवत्परस्परव्यावृत्तंतन्नाते नेनव्यावृत्ते
भ्योऽनुवृत्तंभिन्नमितिन्यायेनप्रपंचात्मनोहमतोनममविकारित्व
मित्यर्थः ७ ॥

यथास्य प्रकृतिविकृतिवर्गस्येतरोत्तरापेक्षा तथात्र ममात्रकारणान्तरापेक्षा नास्तीत्याह

गी॰
टी॰
स॰

38

आनंदीटीका

येनेदं समस्तं जगतः प्रोक्तक्रमेण कर्त्ता संहर्त्ता च अतो हेतोर्मत्तः वासुदेवा
त्परब्रह्मणः परतरमन्यत् श्रेष्ठतमं प्रेरकं तत्त्वं च किंचिन्नास्ति अत एव मयि
सर्वगते सर्वजगत्कारणे सर्वाधिष्ठाने सर्वमिदं तत्त्वजातं प्रोतं स्यूतं
ग्रथितं यथातिविततेसूत्रे मणिगणाः अन्योन्यविलक्षणाः पृथग्भूताः
एकत्र स्थितिमनुभवंति तथा प्रकृतिविकृततामापन्ना नानारूपेण वि
लक्षणा अपि तत्त्वसंघाताः मयि परमात्मनि जीवात्मनि चानुस्यूता इत्य
र्थः अत्र ह्यात्मनः सूत्रस्य च सर्वेषामेकत्र योजनसंहरणमात्रसाध विस्तरण
र्म्येणोपमेयं ७ ॥

रामकंठीटीका

अत एवमेवमेव परमकारणत्वात्स्वरूप लाभे कारणान्तरापेक्षा नास्तीत्याह ॥

जडा प्रकृतिरपरेत्युक्तानन्दपेक्षया जीवभूता परेत्येते ये उक्तकारणभू
ते ताहं परतर इति मत्तोऽन्यत्किंचित्स्वतंत्रं तत्त्वं संभवति यस्मात्कारणेन
तत्परतमस्याद्दहस्यामेव कारणे निहत्यरमित्यर्थः यत इदं सर्वं
भावजातं मयि सर्वाश्रयभूते प्रोतमनुस्यूतं कथमेकस्मिंस्तत्रो य
था परस्परपृथग्भूता अपि मणिगणा सूत्रे स्थितिमनुभवंति तथा
मन्मायोपाधिविनाऽन्योन्यभेदा अपि चराचराभावा मय्येवैकस्मिन्नाश्रये
तिष्ठन्तीत्यर्थः नन्वभिप्रेतेन जडाजडे मम प्रकृती प्रकृतिश्च स्वभाव उ
च्यते तत्कथमहं यावित्मात्रस्वरूपस्य जडात्मकत्वादि न स्वरस्येतते
ऽपि परस्पराः वक्ते दार्ना नानारूपस्वभाव उपपद्येते तिवाशंक्य प्रमात्र ह्येते
न प्रतिपादयितुमाह ७ ॥

लासकी [illegible]टीका

यस्मादेवं तस्मात् मत्तः परमेश्वरात्सकाशादन्यद्द्वाघभ्युपगतं प्रधा
नपरमाण्वादि परतरं श्रेष्ठं जगतः सृष्टिसंहारयोः स्वतंत्रं कारणं कि
चिदपि नास्ति तथा चोक्तं कपिलः प्रधानमाह इत्यादीकुणाभुग
णविश्वस्य कालं कारणमेके स्वभावमपरे परे जगुः कर्मेति । न
नु मास्तु परमाण्वादीनां निमित्तकारणत्वं समवायिकारणत्वं चा
स्तीत्याह मयीति मयि अहंतापन्ने परमेश्वरे सर्वमिदं इदंताव
पार्यं स्थूलरूपेण परिणतं जगत्प्रोतं अहमिदमिदमहमिति सम
प्रोततुलापटन्यायेनानुस्यूतं तंतुषु पट इव सूतमेवेति अहमेव स
मवायिकारणं मयीत्यर्थः उक्तं ह्यागमरहस्ये यथा पीसुवर्ण्य पदिणा

ति निमित्तहेतुंतैरर्पितातिलजलांजलिरीशानाये अन्यांगतोप
नयनेनवशीकृतस्यकामीश्वरस्येतिममीवतसंगिरेतेइतिय।
थासूत्रेमणिगणाअनुस्यूताः यथातंतुरनाधियमानरूपोप्यंत
र्लीनतयाविशरणस्वभावस्यमणिगणस्यग्रंथिरूपतयाचास्थितः
एवमहंसर्वत्र ७ ॥

पंचोली टीका

यस्मादेवंतस्मात् मत्तइति हेधनंजययस्मात्मत्तःपरमेश्वरात्पर
तरंश्रेष्ठतरमन्यत्कारणंतरं किंचिन्नास्ति इदंसर्वंमयिविषयेप्रो
तंग्रथितंसूत्रेमणिगणाइव यथासूत्रेमणिगणाःप्रोतास्तथेदं
सर्वंजगन्मयिप्रोतमित्यर्थः ७ ॥

रसावीरसमिद्धोधिनी ॥

किंबहुनासारमेतदेवार्जुनजानीहीत्याह मत्तइतिमत्तःसका
शात्परतरंश्रेष्ठतरमन्यत्किंचिन्नास्ति अहमेवास्यजगतःसृष्टि
संहारयोःस्वतंत्रःकर्तेतिभावः मय्येवैतत्स्थितमपीत्याह मयी^
ति इदंभूम्यादिकंसर्वंमयिसर्वेश्वरेप्रोतंग्रथितमाश्रितमित्यर्थः
अत्रदृष्टांतः सूत्रेमणिगणाइवेति यथामणिगणाःसूत्रेस्थिता
एवंमयीदंजगत्स्थितमित्यर्थः ७ ॥

मधुभाष्य

७॥

39

भाषाअनुवाद

सो हे धनञ्जय इसी से हम से और कोई भी जगत की सृष्टि औ संहारका औह स्वतंत्र कारण नहीं है और स्थिति के भी हेतु हम है यह कहते है कि मेरे हो मे समस्त जगत ग्रथित है जैसे सूत मे मणि गण पोहे रहते औ कपडे मे सूत ओत प्रोत रहते है ७ ॥

दोहा॥

मोसे औरनदे कछु अधिक धनंजय सोय मोमेदिसमग्रथितज्यों
सूत्रमणीगण होय ७॥

40

रसोऽहमप्सु कौंतेय प्रभाऽस्मि शशिसूर्ययोः प्रण
वः सर्ववेदेषु शब्दः खे पौरुषं नृषु ८ ॥

शांकरभाष्यं

केन केन धर्मेणाविशिष्टे त्वयि सर्वमिदं प्रोतमित्युच्यते रसइति रसोऽहम
प्सु यः सारः रसस्तस्मिन् रसभूते मय्यापः प्रोता इत्यर्थः एवं सर्वत्र यथा
हमप्सु रस एवं प्रभास्मि शशिसूर्ययोः प्रणवः ओंकारः सर्ववेदेषु
तस्मिन्प्रणवभूते मयि सर्वे वेदाः प्रोतास्तथा खे आकाशे शब्दः सार
भूतः तस्मिन्मयि खं प्रोतं तथा पौरुषं पुरुषस्य भावः पौरुषं यतः पुंबु
द्धिर्नृषु तस्मिन्मयि पुरुषाः प्रोताः ८ ॥

आनन्दगिरिकृतटीका

अपादीनां रसादिषु प्रोतत्वप्रतीतेस्त्वय्येव सर्वं प्रोतमित्ययुक्तमिति
मत्वा पृच्छति केनेति तत्रोत्तरमुत्तरग्रन्थेन दर्शयति उच्यत इति
सारो मधुरो हेतुरिति यावत् रसोऽहमिति कथं तत्राह तस्मिन्निति
अप्सु योरसः सारस्तस्मिन्नपि मधुररसे कारणभूते प्रोता आप इति
वक्तव्ये सर्वत्र व्याख्यानं कर्तव्यमित्याह एवमिति उक्तमर्थं दृष्टां
तं कृत्वा प्रभास्मीत्यादि व्याचष्टे यथेति चंद्रादित्ययोर्या प्रभा तद्भू
ते मयि तौ प्रोतावित्यर्थः तत्र वाक्यार्थं कथयति तस्मिन्निति प्रण
वभूते तस्मिन् वेदानां प्रोतत्ववदाकाशे यः सारभूतः शब्दस्तद्रूपे
परमेश्वरे प्रोतमाकाशमित्याह तथेति पौरुषं नृष्विति भागं दृष्टं
विभजते तथेत्यादिना पुरुषत्वमेव विपादयति यत इति पुं
स्त्वसामान्यात्मके परस्मिन्नीश्वरे प्रोतास्तद्विशेषास्तदुपादानत्वे
न तत्स्वभावत्वादित्यर्थः ८ ॥

जगत्स्थितिहेतुत्वमेव प्रपंचयति ॥ स्वामिकृतटीका

रसोऽहमिति पंचभिः अप्सु रसोऽहं रसतन्मात्ररूपया विभूत्या तदाश्रय
त्वेनाप्सु स्थितोऽहमित्यर्थः तथा शशिसूर्ययोः प्रभास्मि चंद्रार्कयोः प्र
भारूपया विभूत्या तदाश्रयत्वेन स्थितोऽहमित्यर्थः एवमुत्तरत्रा
पि द्रष्टव्यं सर्वेषु वेदेषु वैखरीरूपेषु तन्मूलभूतः प्रणवः ओंकारो

स्मि खे शब्दाकारेणाकाशतन्मात्ररूपोस्मि नृषु पुरुषेषु पौरुषं उद्यमोस्मि उद्यमे हि पुरुषाः स्थिता इति ८ ॥

पिशाचभाष्यटीका

रस इति रसो माधुर्यं अहं अप्सु कौंतेय प्रभा प्रकाशः अस्मि अहं भवामि शशिसूर्ययोः प्रणव ॐकारः सर्ववेदेषु शब्दः शब्दाकारः पौरुषं सत्त्वं शक्तिर्नृषु पुरुषेषु ८ ॥

रामानुजभाष्यटीका

अतः सर्वस्य परमपुरुषशरीरतया तदात्मभूतः परमपुरुष एव सर्वप्रकारः परमपुरुष एवावस्थित इति सर्वैः शब्दैः स एवाभिधीयत इति तत्सामानाधिकरण्येनाह ८ रसोहमिति चतुर्भिः ॥

श्रीअभिनवगुप्तकृतटीका ८

परमार्थप्रपाटीका

अथ जगत्स्थितिहेतुत्वमाह रसोहमिति पंचभिः अप्सु उदकेषु रसोहमस्मि रसतन्मात्रतया विभूत्या आश्रयत्वेन स्थितोस्मि तथा शशिसूर्ययोः प्रभास्मि चंद्रेऽर्के वा प्रकाशरूपया विभूत्यास्मि एवमुत्तरत्रापि द्रष्टव्यं सर्ववेदेषु वैखरीरूपेण प्रणवो वाग्ज ॐकारोस्मि खे शब्दाकारेण तन्मात्ररूपो नृषु पुरुषेषु पौरुषं उद्योगरूपोस्मि ८ ॥

वनमालीटीका

सर्वनियामकत्वेनानंतविभूतिमत्त्वेन सर्वव्यापकत्वेन च चिंतयितुमशक्तानामारंभभक्तानां चिंतनार्थं कतिचिद्विभूतीराह रस इत्यादि चतुर्भिः रसादिव्यापकत्वान्नियामकत्वाद्विभूतिमत्त्वाच्च रसादिपदवाच्योहमेव सर्वं समाप्नोषि ततोसि सर्व इति वक्ष्यमाणत्वात् सर्वव्यापकत्वेनाहं तान्नमया व्याप्त इत्यादि रसादिव्यापकत्वेनैव ज्ञेय इत्यर्थः अपां सूक्ष्मावस्थानं तन्मात्ररूपा शशिसूर्ययोः प्रभा भास्वरशुक्लरूपं तद्गुणकं सर्ववेदेषु वेदमूलं प्रणवः खे शब्दस्तन्मात्ररूपः नृषु पौरुषं अहं ८ ॥

ज्ञसमेवजयंतीटीका

एवं स्वस्य सर्वपरत्वं सर्वकारणत्वं चोक्तमिदानीं केन प्रकारेण त्वं सर्वपरः सर्वकारणं च त्वं भवसि न हि दृष्टं यदा यो तत्प्रकारं दर्शयन्स्वस्य सर्वात्मत्वमाह पंचभिः रसोहमिति हे कौंतेय कुंतीपुत्र अप्सु

जलेषु रसो रसतन्मात्ररूपोऽहमेवास्मि स्वविभूत्यात्मकेन रसतन्मात्ररू
रूपेण जलाधारभूतेनाद्यं कारणरूपेणाप्सुः परस्वरूपेण ताः पालयन् स्थि
तो भवामीत्यर्थः शशिसूर्ययोः शशिनि सकलौषधिनक्षत्रादी
नां पत्यौ सूर्ये सकलग्रहदिवसपर्जन्यादीनां पत्यौ च प्रभा नघोस्मा
रभूता महद्विभूतिरूपिकाहमस्मि तया तौ पालयन् तत्तदाधारत्वेनत
त्तदात्मनेन च तयोरहं स्थितोस्मीत्यर्थः सर्ववेदेषु सर्वेषु ऋग्यजुःसा
माथर्वाख्येषु चतुर्ष्वपि वेदेषु प्रणवः ॐकारस्तेषां कारणभूतोऽहमस्मि
तेन महद्विभूतिरूपेणाधारभूतेन वाङ्मानन्तान्विधृत्य तिष्ठामीत्यर्थः
यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वागिति श्रु
तेः खे आकाशे शब्दः शब्दतन्मात्रात दाधारभूतां कारणरूपोऽहमस्मि
तया महद्विभूतिरूपया तमाकाशं विधृत्य तिष्ठाम्यहमित्यर्थः नृषु म
नुष्येषु पौरुषं पुरुषस्य भावः पौरुषमुद्यमोऽहमस्मि यस्मिन् विभूति
रूपे उद्यमे नष्टे अयं पुरुषः नास्तीति तेन रूपेण तान्पालयन्नहं ति
ष्ठामीत्यर्थः ८ ॥

मधुसूदनीटीका

प्रबादीनां रसादिषु प्रोतत्वप्रतीतेः कथं सर्वमिदं त्वयि प्रोतमिति वचनशंकां रसादिरूपेण ममैवावस्थि

पंचभिः॥ रसः पुण्यो मधुरस्तन्मात्ररूपः सर्वासामपां सारः कारणभूतो योऽप्सु स त्वादित्याह॥
र्वासु तत्त्वगतः सोऽहं हे कौन्तेय तद्रूपे मयि सर्वा आपः प्रोता इत्यर्थः एवं स
र्वेषु पर्यायेषु व्याख्यानं द्रष्टव्यं विभूतिराध्यानायोपदिश्यन्त इति नातीवा
भिनिवेष्टव्यं तथा प्रभा प्रकाशः शशिसूर्ययोरहमस्मि प्रकाशसामा
न्यरूपे मयि शशिसूर्यौ प्रोतावित्यर्थः तथा प्रणव ओंकारः सर्ववेदेषु
नुस्यूतोऽहं तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा
वागिति श्रुतेः संतृण्णा निग्रथिता निखिला वाक्सर्वे वेदा इत्यर्थः श
ब्दः गुणः खे तन्मात्ररूपः खे आकाशे नुस्यूतोऽहं पौरुषं पुरुषत्वसामान्यं
नृषु पुरुषेषु यदनुस्यूतं तदहं सामान्यरूपे मयि सर्वे विशेषाः प्रोताः श्रु
तेर्दुंदुभ्यादिदृष्टांतैरिति सर्वत्र द्रष्टव्यं ८ ॥

सदानंदीटीका

रसादिषु जलादीनां ग्रथितत्वप्रतीतेः त्वयि सर्वं कथं प्रोतमिति शंकां
ऊनः श्लोकः ५ रसोऽप्स्वहमपां सारभागः प्रोता रसे मयि इन्द्वर्कयोः प्रभा
सारः प्रभारूपे च तौ मयि ५ प्रोतौ तथैव वेदेष्वोंकारो निष्कृष्टः सारः प्रोतं

शब्दात्मनि खेऽमममयी पौरुषं सर्वकरणे ३॥ ८

नीलकंठीटीका

नन्वेवं प्रपंचपरमात्मनोर्मणिसूत्रवदुपादानोपादेयभावोपि न स्यात् न
हि उपादानं च घटं तद्रूपं चेति घटते रज्जुदण्डादावदर्पणादित्याशंक्य स्व
ममायेंद्रजालरज्जूरगतुल्यत्वं प्रपंचस्योपपाद्योभयमप्यविरुद्धमित्यु
पदिष्टं चेदयमकस्माद्धि प्रोभविष्यतीति मत्वा दृष्टांतांतरैरेवानुवृत्ति
व्यावृत्तिं चिज्जडयोर्दर्शयति रसइति यथा रसोऽप्सु एकमपि परमाणु
मपरित्यज्यानुस्यूतोऽहमप्सु तेऽनेकरसरूपे मयि आपः प्रोताः एवं प्रभायां चं
द्रसूर्यौ प्रोताः प्रणवे सर्ववेदाः प्रोताः तद्यथा शंकुना सर्वाणि पर्णानि सं
तृण्णानि एवमोंकारेण सर्वा वाक् संतृण्णा इति वाक्यात्प्रणवात्स्मृति
श्रवणात् संतृण्णानि संग्रथितानि एवमाकाशे शब्दः सारभूतस्तस्मिन्न
पि खं प्रोतं सर्वपुरुषेषु सारं पौरुषं शौर्यधैर्यादिरूपं तत्र पुरुषाः प्रोताः
एवमग्रेपि द्रष्टव्यम् ८ ॥

आनंदीटीका

एतत्सर्वं योगेन तं स्वात्मनि दर्शयति ॥ तदेतत्सर्वमेवासीद्व्यक्ताव्यक्त
स्वरूपश्चादिति पुराणोपदेशेन विस्तरेण सर्वं योनिः प्रकृतिरिति प्राग्
हे कौंतेय अप्सु विकृतिषु रसस्तन्मात्ररूपा प्रकृतिरहं वा तद्देव एव
शशिसूर्ययोः प्रकाशविकारयोः प्रकृतिरूपः प्रकाशोऽहमेव मय्येव
तत्प्रोतमित्यर्थः तथा च श्रुतिः तस्य भासा सर्वमिदं विभातीति एवमन्य
त्रापि प्रोतत्वं व्याख्येयं सर्वेषु वेदेषु वाङ्मयेषु प्रणव ओंकारोऽहं यथावि
तं हि इदं प्रपंचसारे शब्दब्रह्मेति यत्प्रोक्तं तदेहेषामयं चोक्ते शब्दब्र
ह्मेति शब्दावगम्यमर्थं विदुर्बुधाः स्वतोर्थानवबोधत्वात्प्रोक्तो नैतादृ
शो रवः सतु सर्वत्र संस्यूतो जातो भूताकरेषु ततः आविर्भवति देहेषु प्रा
णिनाम अतिविस्तरतः प्रकृतौ कालतत्त्वायां गुणांतःकरणात्मनीति
नादो श्वासप्रपंचे हकारः पुरुषः प्रोक्तः सइति प्रकृतिस्मृता ग्रजप
यं तथा प्रोक्तिमेतदाद्दक्षिणावामतः बिंदुर्दक्षिणभागस्तु विसर्गो वाम
भागतः तौ च दक्षिणवामाख्यौ भागौ पुंस्त्री विशेषितौ बिंदुः पुरुष
इत्युक्तो विसर्गः प्रकृतिः स्मृता पुंप्रकृत्यात्मको हंसस्तदात्मक

मिदं जगत् । गुणप्रकृत्यन्तसंस्थानात्सोहंभावमुपागतः सकारं च ह
कारं च लोपयित्वा प्रयोजयेत् संधिं तु पूर्वरूपाख्यां ततोसौ प्रणवो
भवेत् इत्यादि चतुर्थपटले एवं चाहं तन्मात्ररूप आकाशे योऽह
संवृत्तस्वप्रजननसामर्थ्यं तत्स्वरूपप्रकाशनं तिष्ठ ८ ॥

रामकंठीटीका

संवेद्यमानतः संतः सर्वे भावास्तत्त्वमात्मानं लभन्ते संवेद्यमानताव्य
तिरिक्तेन प्रकारान्तरेण कस्यचिद्वस्तुनो केनाप्यनुपलंभात्
इष्टं वा सर्व एवं संवेदितासंविदन्वे वस्तुजाति ततो भावरू ऽहभावंत
पसंवेदितत्वे व पाक्षिविं लभते नान्यतत्तद्व्यतिरिक्तं किंचिदिदं
यतः परापरे मे प्रकृती स्वभावभूते इति स्वतः सिद्धं प्रमातृत्वे तेन ग
भीकृत्यायक्रमय एव यदुक्तं तत्र सोहमित्यादिना श्लोकेन तत्तदृये ऽव
नोपपादयति तत्र योयस्य प्राधान्येन वर्तते गुणः स एव तस्यात्मे
ति अपारस एवात्मा स चाहं यतऽत्रान्वायेन रस्यमानतया संवे
द्यमानतया संवेद्यमाना अपार स्वरूपमात्मानं लभते ततो रसस्यापि
तदेवरसात्मिकाणि इमिमेव वा नम्र वित्त्वलक्षणस्वभावाव्य
भिचारात् समर्पितत्वे ततोऽप्यहं रसरूपत्वमुक्तं यथाऽहं रसस्तात्म
त्वेन व्यवस्थित एवं स्पर्शरूपगंधः पार्थिव विभावस्ततो लक्षण
भूतभेदस्य प्रकाशस्तेजः स्पर्शाभिहितो रूपगुण आत्मत्वेन व्य
वस्थितस्तथा विपाद्गुणः एवं वायुस्पर्शगुणोऽन्यत्रापि संख्ये
य इति भूतपंचके गंधादिप्रधानगुणात्मना पूर्वोक्तन्यायेनाहं
व्यवस्थित इति पूर्वोक्तविभागेन भूतपंचकसंगृहीतं ततो विषा
तिरूपज उपप्रकृतिविभागममस्वभाव इत्युपपादितं ८ ॥

लासिकी [illegible]टीका

ननूक्तेन तदृष्टान्तेन न तु वेश्वरस्य समवायिकारणत्वं नानुमीयते इ
त्याशंकानिराकरणायाह ॥ यद्वत्तन्मात्रसृष्टं सद्रूपतया प
रिणमंते तद्वदहमेव स्वरसस्यार्थः समवायकारणमहमेवेत्ये
वं सर्वत्र वोद्धव्य तदुक्तं तन्मात्राण्यविशेषास्तेभ्यो भूतानि पं

गी॰ स॰ टी॰

त्वं पंचभ्यः एतेस्तत्वाविशेषाः यांशास्तेष्वाश्रयभूतत्वेनास्मीति तथा तेजोवि
शेषयोः शशिसूर्ययोः प्रभास्वरूपत्वचंडत्वादिरहितः प्रकाशतन्मा
त्रोस्मि सर्वेषु वेदेषु ब्रह्मणो निःश्वासतयोत्पवनभेदेषु तन्मू
लभूतः प्रणव ओंकारो नरूपनामयो ब्रह्मसंस्पर्शलक्षणोहं ॥
विश्वाकाशे शब्दतन्मात्रोस्मि जीवभूतेषु तत्पृक्तदभिमानेष्वहंका
रजीवितभूतं यो हं येन तेजसा पुरुषोहमिति सार्वभौमं प्रतिप
द्यते ८ ॥

पंचोलीटीका

केनकेन धर्मेण विशिष्टे त्वयि सर्वं प्रोतमित्याह रसोहमिति
हे अर्जुन अप्सु अपां यः सारभूतो रसः सोहं तस्मिन् मयि आपः
प्रोता इत्यर्थः एवं सर्वत्र शशिसूर्ययोः प्रभा प्रकाशः अहमस्मि
सर्ववेदेषु प्रणवः वेदमूलभूतः ओंकारः अहं विश्वाकाशे शब्द
तन्मात्रः रूपः नृषु मनुष्येषु पौरुषं उद्यमः अहं ८

[illegible]

एवं तन्मात्रेष्वहं मद[illegible]ततः
सत[illegible]मेवेति सर्वयत्नोयं [illegible]
[illegible]
[illegible]
[illegible]
[illegible]ओंकारो नरस्वरूप
नामरूपो ब्रह्मसंस्पर्शलक्षणोहं विश्वाकाशे[illegible]
जीवभेदेषु तत्पृक्तदभिमानेष्वहंकारजीवितभूतं पौरुषं येन ते
जसा पुरुषोहमिति सार्वभौमं प्रतिपद्यते किंच ८

रत्नदीपसमिद्धोधिनी

ननु कथं भूम्यादयो भवत्संस्थापित प्रकृष्टफलकस्वस्वजात्युचि
तगुणादिरूपप्रयत्नात्मकप्रकृतिसाधनभूताः शक्तिमंतो भवंति
त्यर्जुनाभिप्रायमाशंक्य मदंशानुस्यूतत्वात्तेषां स्वस्वकार्यसाध

ने प्राप्तिरित्याह रसोहमिति हे कौंतेय अंत्याप्रपत्यत्वेन स्वकीय
स्यैव तत्वार्थेहं पारहस्यमनुभाव्यते इति संबंधनाभिप्रायः अप्सु
जलाधिदेवतेषु वारुणाख्यन्नेषु विषयेहं रसो जलरूपेणास्थि
तोस्मि येन परकीयं सैन्यं सकलमाप्लाव्यते परप्रयुक्ताग्नेयाय
स्त्रजालं वा विफलीक्रियते इति शशिसूर्ययोरेतद्देवतयोरस्त्रयोर
हं प्रभास्मि प्रकाशरूपेणास्थितोस्मि यया प्रभया परप्रयुक्तसंतमः
सायमस्त्रजालं विफलीकृत्य स्वीयपरकीयादिविवेको विजृंभते इ
ति सर्ववेदेषु वेदशाह्येष्व प्रक्रांतत्वाद्धनुर्वेदपरः बहुवचनं च मंत्रा
नंत्यापेक्षं तथा च सर्वेषु सर्वदैवतेषु यावत्सु कारेषु च वेदेषु यत्र
वेदप्रतिपादितमंत्रेषु अहं प्रणवः ओंकारध्वनिः येनाद्यवसानयोरुच्चा
रितेन संपुटीकृतो मंत्रो विनियोगसाधको भवतीति शब्दः खे इति
खे शून्यतासंपादके प्रस्वापनायस्त्रे हं शब्दः स्तस्मः कलध्वनिः
यं श्रुत्वैव रिपवो लसी भूता निद्रयाभिभूयंते इति अथवा खे खवच्छ
हृश्यत्वेन शब्दवेधि निवारणे शब्दोहमस्मि येनान्वितं तच्छ
ब्दमेवान्वेषत इति नृषु वीरेषु अहं पौरुषमहंकारः पराक्रमरूपो
व्यापाररूपो वास्मि येन करणभूतेन शस्त्रादिप्रयोगः संपाद्यते
इति ८॥

मधुभाष्य

44

भाषाअनुवाद

इस श्लोक से ले कर पांच श्लोक तक जगत की स्थिति का कारण विस्तार करि कहते हैं कि हे कुंतीपुत्र अर्जुन जलमे रसरूप औ चंद्र सूर्य मे प्रकाशरूप और वेद मे मूलभूत प्रणव ओंकार रूप मैंहीं हूं तथा आकाश मे शब्द रूप औ पुरुषों मे पौरुष कहे उद्यमरूप भी मैंहों यह जानो ८ ॥

दोहा

हों कौंतेय रसजल विषें रवि शशिमें द्युतिभास मे ओंकार सभवेद
में नर नभ पौरुष शब्द निवास ८॥

45

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ जी
वनं सर्वभूतेषु तपश्चास्मि तपस्विषु ९ ॥

शंकरभाष्यं

पुण्य इति पुण्यः सुरभिर्गन्धः पृथिव्यां चाहं तस्मिन्मयि गन्धभूते पृ
थिवी प्रोता पुण्यत्वं गन्धस्य स्वभावत एव पृथिव्यां दर्शितमबादिषु
रसादेः पुण्यत्वोपलक्षणार्थम् अपुण्यत्वं तु गन्धादीनामविद्याधर्माद्य
पेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति तेजो दीप्तिश्चास्मि
तपस्विषु तस्मिन्तपसि मयि तपस्विनः प्रोताः ९ ॥

विभावसावग्नौ तथा जीवनं सर्वभूतेषु येन जीवन्ति सर्वाणि भूतानि तज्जीवनं तपश्चास्मि

आनंदगिरिकृतटीका

मयि सर्वमिदं प्रोतमित्यस्यैव परिपूरणार्थं प्रकारान्तरमाह पुण्य इ
ति पृथिव्यां पुण्यो ह्यविकृतो यः सुरभिर्गन्धः सोऽहमस्मीत्यत्र वाक्यार्थं
कथयति तस्मिन्निति कथं पृथिव्यां गन्धस्य पुण्यत्वं तत्राह पुण्यत्व
मिति यत्तु पृथिव्यां गन्धस्य स्वाभाविकं पुण्यत्वं दर्शितं तदबादिषु
रसादेः स्वाभाविकपुण्यत्वस्योपलक्षणार्थमित्याह पृथिव्यामिति
प्रथमोत्पन्नाः पंचापि गुणाः पुण्या एव सिद्धादिभिरेव भोग्यत्वादि
ति भावः कथं तर्हि गंधादीनामपुण्यत्वप्रतिभानं तत्राह अपुण्यत्व
त्विति तदेव स्फुटयति संसारिणामिति गंधादयः स्वकार्यैर्भूतैः
सह परिणममानाः प्राणिनां पापादिवशादपुण्याः संपद्यन्त
इत्यर्थः यच्चाग्नौ तेजः तद्भूते मयि प्रोतोऽग्निरित्याह तेनेति जी
वनभूते च मयि सर्वाणि भूतानि प्रोतानीत्याह तथेति जीवनशब्दा
र्थमाह येनेति अन्नरसेनामृतनाम्नेत्यर्थः तपश्चास्मीत्यादि ता
त्पर्यमाह तस्मिन्निति चित्तैकाग्र्यमनाशकादि वा तपस्तदात्मनी
श्वरे प्रोतास्तपस्विनो विशेषणाभावे विशिष्टस्य वस्तुनोऽभावादित्य
र्थः ९

स्वामिकृतटीका

किंच पुण्य इति पुण्योऽविकृतो गंधः गंधतन्मात्रं पृथिव्या आश्रयभूतमहमित्यर्थः
यद्वा विभूतिरूपेणाश्रयत्वस्याविवक्षितत्वात् सुरभिर्गंधस्योत्कृष्ट
या विभूतित्वात् पुण्यो गंध इत्युक्तं तथा विभावसावग्नौ यत्तेजः स

गी. टी. स.

46

त्वदीप्तिः तदहं सर्वभूतेषु जीवनं प्राणधारणं आयुरहमित्यर्थः तपस्विषु वानप्रस्थादिषु द्वंद्वसहनरूपं तपोस्मि ९ ॥

पैशाचभाष्यटीका

पुण्यो गंधः सुरभिः पृथिव्यां च तेजो दीप्तिश्चास्मि विभावसौ वह्नौ जीवनं प्राणः सर्वभूतेषु तपश्च स्वधर्मं चास्मि तपस्विषु ९ ॥

रामानुजभाष्यटीका व्याख्यातं ९ स्पष्टार्थम्

अभिनवगुप्तकृतटीका व्याख्यातं ९

परमार्थप्रपाटीका

किंच पुण्यो विकृतो गंधः गंधतन्मात्रं पृथिव्यामहमस्मि [illegible] विभावसौ वह्नौ यद्दीप्तं तेजस्तदहं सर्वभूतेषु जीवनं प्राणधारणमायुरहमित्यर्थः तपस्विषु वानप्रस्थादिषु तपः द्वंद्वसहिष्णुत्वरूपेणाहमस्मि श्रुतिरपि यजुः संहितास्थ वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोसि विश्वधा असि परमेण धाम्नेति भाष्यं वसोः विराजपुरुषरूपस्य चोक्तभूतविग्रहत्वं पवित्रं वाह्यांतः शोधकमतएवमसि पवित्रमपि यानधारमित्युक्तत्वात् द्यौरंतरिक्षाकाशोसि तथा पृथिव्यसि मातरिश्वनो वायोः सकाशात् घर्मः तेजोसि वायोरग्निरिति श्रुतत्वात् वायोः शोषकत्वरूपेणांतर्गतेनेत्यर्थः अथ पार्थिवेन कियद्वाच्यं अत आह विश्वधासीति विश्वप्रकारेणावर्तमानेन व्यापकेन परमेण धाम्ना नतत्सामर्थ्यदानधारणेन रसादितन्मात्ररूपेण धाम्ना तेजो विशिष्टोसीत्यर्थः ९ ॥

वनमालीटीका

पृथिव्यां पुण्यो गंधः सौरभः विभावसौ वह्नौ तेजः सर्वभूतेषु जीवनं प्राणधारणं तपस्विषु तपश्चाहं ९ ॥

उत्तमवैजयंतीटीका

किंच पुण्य इति पृथिव्यां चराचराकारेण स्थितायां मह्यां पुण्यः श्रेष्ठः गंधः गंधतन्मात्राख्योऽहमस्मि यस्मिन्कारणरूपे महिभूत्यात्मके पृथि

वीनिष्टतितेनैवरूपेणास्तांनिष्टतांपालयामीत्यर्थः चपुण्योवायौयास्पर्श
तन्मात्रासाप्यहमेवास्मियथामद्विभूत्यारूपयापृथिवीतोयस्पर्शव्याप्तलाना
जनानांसुखप्रदंदत्तसंस्थितिष्टामीतियोनयतिविभावसौपावकेयत्ते
जःसकलवस्तुदहनप्रकाशनात्मरूपंतदहमस्मिसर्वभूतेषुचराचरेषु
तज्जीवनमायुरहमेवास्मियेनमद्विभूतिरूपेणायुषाब्रह्मादिस्थावरांता
नांसर्वेषांजीवानांस्थितिर्भवति तपश्चास्मितपस्विषुसर्वेषुयतयः सुखदुःखा
दिद्वंद्वसहनंतत्तपस्तदहमेवास्मि चकारेणगंधादीनांपंचतन्मात्राणां
पंचमहाभूतकारणत्वात्पुण्यत्वमस्तिगंधादीनांपंचविषयाणांतुपं
चभूतगुणत्वादपुण्यत्वमपितत्तद्रूपेणस्वविभूतित्वेनाधाराधेयरूपे
णस्थितानामपितेषांमायापारत्वेनतत्तद्रूपेणपालयेतेषुतेष्वहमेवस्थि
तोस्मीतिसूचितम् यद्वाविभावसुस्तपणरूपेतेजसःकार्यत्वात्तयोरभेद
विवक्षयातेजसाहेतोर्व्याप्तेतेजसारूपतन्मात्रायाःकार्यत्वादभेद
विवक्षयारूपतन्मात्रोव्याप्तेनेनविभावसौतेजस्तियत्तेजःरूपतन्मात्रंसा
प्यहमेवास्मिसर्वभूतेषुसर्वेषुभूतरूपेषुपंचकोनपंचपणात्सरूपकेषु
वायुषुयज्जीवनंतेषामात्मरूपंकारणस्पर्शतन्मात्ररूपमहमेवास्मि
वायोःसर्वगतत्वात्जगत्प्राणत्वाच्चसर्वभूतत्वस्यनासंभवः आकार
भेदात्प्राणादिनामादिरूपनामगुणभेदास्थानभेदाच्चतस्यवहुत्वोक्ति
रप्युपपन्नैवतत्त्वकौशदोगे:प्राणसंवादेनवैवाचोनचक्षूंषिनश्रोत्रा
णिनमनांसीत्याचक्षतेप्राणाहीवैतानिसर्वाणिभवन्तीत्यादिनेतिप्र
थमस्यचशब्दस्याभिप्रायः द्वितीयस्यतरसादिषु वतुरस्तेषुत
न्मात्रासुपुण्यत्वसमुच्चायकत्वेनचारितार्थ्य त्वमित्यर्थः ९ ॥

मधुसूदनीटीका

पुण्यःसुरभिरविकृतोगंधःसर्वपृथिवीसामान्यरूपस्तन्मात्राख्यःपृ
थिव्यामहमस्मीतिचकाराद्रसादीनामपिपुण्यत्वसमुच्चयार्थः शब्दस्प
र्शरूपरसगंधानांहिस्वभावतःपुण्यत्वंअविकृतत्वंप्राणिनामधर्म
विशेषात्तेषामपुण्यत्वंनतुस्वभावतइतिद्रष्टव्यंतथाविभावसौव
ह्नौयत्तेजःसर्वदहनप्रकाशनसामर्थ्यरूपमुष्णस्पर्शसहितंसितभा
स्वररूपंपुण्यंतदहमस्मिचकाराद्वायौपुण्यः उष्णस्पर्शानाणाम

गी॰
टी॰
स॰

47

सर्वेषु प्राणिषु

ध्यायकः पीतस्यर्णः सोऽहमिति इत्युक्तं सर्वेषु भूतेषु जीवनं प्राणधारण
मायुरहमस्मि तद्रूपे मयि सर्वे प्राणिनः प्रोता इत्यर्थः तपश्चास्मि तपस्विषु नित्यं तपो
युक्तेषु वानप्रस्थादिषु यत्तपः शीतोष्णद्वन्द्वसहनसामर्थ्यरू
पं तदहमस्मि तद्रूपे मयि तपस्विनः प्रोता विशेषणाभावे विशिष्टाभावा
त् तपश्चेति चकारेण चित्तैकाग्र्यमांतरं नियमोपस्थादिति ग्रहलक्षणं
वाह्यं च सर्वं तपः समुच्चीयते ९ [illegible]
[illegible] ॥

सदानंदटीका

गंधोऽहं पावनो भूमौ गंधभूते महीमयि प्रोता गंधस्य गुणत्वं स्वभावादे
व संमतं १ चगुणत्वं रसादीनां स्वभावादेव ताम्यतां गंधादीनामगुण
त्वं प्राणिनामयुक्तोचितः १ तेजः प्रकाशरूपं यत्सितं भास्वरमग्निगं तद
हं मयि तद्रूपे ग्रथितोऽसौ विभावसुः ३ चकारात्पावनः स्पर्शो यो वायोः
सोऽप्यहं हरिः प्राणधारणमायुर्यत्सर्वप्राणिषु जीवनं ४ तदहं मयि
तद्रूपे संप्रोताः प्राणिनोऽखिलाः तपोऽहं हस्तहित्स्त्वमहमस्मि तपस्वि
षु तपोरूपे मयि प्रोताः युक्तचित्तास्तपस्विनः ८ ९

नीलकंठटीका

गुण इति रसादिष्वपि द्रष्टव्यं अगुणस्य सर्वस्याविषमात्रविलस्य
त्वात् विभावसौ वह्नौ तेजः दहनशक्तिः जीवनं येनेति जीवनमन्न
विराजं तत्र हि सर्वाणि भूतानि प्रोतानीति अन्यत्र जीवनं प्रायुरितिव्या
चष्टे तपश्चेति तपो धर्मस्तद्रूपे मयि तपस्विनः प्रोताः ९ ॥

आनंदटीका

गुणो निर्विकारो गंधतन्मात्रं विभावसौ वह्नौ तेजस्तन्मात्रं जीवनं प्राण
तेयद्वायोः प्रधानं रूपं सर्वेषु भूतेषु प्राणिषु वर्णानां नियतं कर्म तद्वेवा
भिहितं तप इति स्वतेः सर्वेषां वर्णाश्रमिणां स्वस्वधर्मानुष्ठाने क्रिया
पाति रहमेवेत्यर्थः ९ ॥

रामकंठटीका

गुणपदं हश्यात्रप्राधान्यापेक्षया सर्वगुणेषु विशेषणत्वेनाऽनुवर्तनीयः

एवंभूतेषु प्राणिषु धर्माऽविरुद्धः कामः संकल्पो मनोऽहं तथान्तेषु
जीवेषु पौरुषकारात्मकं पुरुषत्वमहमेव ९ ॥

लासिकी टीका

किंच पुण्यो विकृतो गंधो गंधतन्मात्रं पृथिव्यामहं विभावसावग्नौ
तेजोरूपतन्मात्रमस्मि सर्वेषु भूतेषु जीवनमंतःकरणत्रयस्य प्रा-
णधारणलक्षणा सामान्यावृत्तिः यथाभूतानां जीवसंज्ञः सम्भ-
वः सोऽहं तदुक्तं सामान्यकरणवृत्तिः प्राणाद्या वायवः पंचेति
तपस्विषु वानप्रस्थादिषु तयो मनःसंकल्पनिमित्तं द्वंद्वसहनरू-
पमहं एवं यदीयं भूम्यादीनां सूक्ष्मं तन्मात्रादिरूपं तदहं स्थूलं
तु प्राकृतं ९ ॥

पंचोली टीका ।

किंच पुण्य इति च पुनः पृथिव्यां यः पुण्योऽविकारी स्वाभाविकः
गंधतन्मात्रं सोऽहं च पुनः विभावसौ वैश्वानरे तेजः दीप्तिरहमः
स्मि सर्वभूतेषु जीवनं प्राणधारणमायुः सोऽहं तपस्विषु शीता-
ष्णादिद्वंद्वसहनरूपं तपः अहम् ९ ॥

रणवीरसमिद्योतिनी ॥

पुण्य इति न सत्यात्परमो धर्म इति स्मृतेः पुण्यं सत्यं प्रधानो ध-
र्मः तद्विशिष्टो गंधः लेशोऽपि गंधस्य अनृतस्पर्शनानर्हः सोऽहं अतः तत्स्व-
रूपेणावाहं पृथिव्यां भूमिरापः इत्यत्र पूर्वव्याख्यानस्वरूपेऽपि विशेषो वि-
तेऽरुद्देशादिप्रदेशोऽस्मि यस्मात् तस्येन देशांतराणि विष्टायतनैव
समेत्य योधनानरतावीरपुरुषाः पुण्यलोकानासाद्य पर्यंते मम सा-
युज्यं गच्छंतीति यद्वा पृथिव्यां पूर्वव्याख्यानुसारेणैव प्रतिपादि-
तस्वरूपे पार्वती याद्यसज्जालेऽहं पुण्यो गंधः सूक्ष्मतरेण सत्यस्व-
रूपेणात्मनास्थितोऽस्मीति येनांशेनाधिष्ठितानि तान्यसत्स्वरूपाणि

प्रादुर्भूते समर्थानि भवंतीति केनचिदनाघ्रियमाणं हि पार्थिवं व
स्तु लब्धस्थितिकं सत् स्वकार्यसाधने शक्तिमद्भवतीति सिद्धं
सत्यस्याथाध्यासत्ये लोका प्रतिष्ठिता इति स्मृतेः प्रसिद्धं तथा वि
भावसौ सूर्ये वह्नौ विभावसूरिति कोशात् सूर्ये तद्देवते स्वे तेजः पर
कीयवत्तः प्रतिघातकमस्मि यदसहिष्णवो रिपवो दग्धप्राया
विह्वलीभूय पलायंते इति यद्वा विभावसौ वह्निदेवतास्वे तेजो
दाहशक्तिरस्मि येन रिपवो दह्यंत इति तथा सर्वभूतेषु सर्वेषु
प्राणिषु युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिष्विति कोशात्स
र्वेषु विद्यादिगुणयुक्तब्राह्मणादौ भूतेषु सर्वदर्शिषु वृक्षादिकादि-
क्षितियावत् स्नेहादिवपाहिमपर्यंतो हिमयोवृद्धान्निवर्तंते
इति न ते तत्रापि क्रियंते इति तेषु जीवनं प्राणोऽस्मि येन युक्तास्ते
विमृत्युत्वं मध्यकंते इति तथा तपस्विषु कायवाङ्मनसां गुणपह्ल
त्वमार्गैकविषयीकरणं तपस्तपस्विषु तपस्तत्त्ववर्तकोऽहमेवा
स्मीति ९॥

मधुभाष

९॥

भाषाअनुवाद

और पवित्र गंधरूप मात्रा पृथिवी मे और तेजरूप अग्निमे तथा जीवनरूप सब भूत कहे प्राणी यों मे और तपस्वियो मे तपरूप मैं हूं अर्थात् मेरी ही विभूति है ९ ॥

दोहा

छिति मह गंध पवित्रहों तेजहों पावकमाहि जीवनहों सब जीवमें तपस्विनमे तपसाहि ९ ॥

49

बीजंमांसर्वभूतानांविद्धिपार्थसनातनं बुद्धिर्बुद्धि
मतामस्मितेजस्तेजस्विनामहं १० ॥

शंकरभाष्य

बीजमिति बीजंप्ररोहकारणं मांविद्धिसर्वभूतानां हेपार्थसनातनं चि
रंतनंकिंच बुद्धिर्विवेकशक्तिरन्तःकरणस्य बुद्धिमतां विवेकशक्ति
मतामस्मि तेजःप्रागल्भ्यं तद्वतांतेजस्विनामहं १० ॥

आनन्दगिरिकृतटीका

ननुसर्वाणिभूतानि स्वकारणेप्रोतानिकथंतेषांत्वयि प्रोतत्वंतत्राह
बीजमिति बीजांतरापेक्षयानवस्थां वारयति सनातनमिति चेत
न्यस्याभिव्यंजकं तत्वनिश्चयसामर्थ्यं बुद्धिस्तद्वतां याबुद्धिस्तद्रूपे
मयिसर्वेबुद्धिमन्तः प्रोताभवंतीत्याह किंचेति प्रागल्भ्यवतां
यत्प्रागल्भ्यं तद्रूपेमयितद्वंतः प्रोताइत्याह तेजइति तद्धिप्रा
गल्भ्यं यत्पराभिभवसामर्थ्यं परैश्चाप्रधृष्यत्वं १० ॥

बीजमिति

स्वामिकृतटीका

किंच सर्वेषांचराचराणांभूतानांबीजंसजातीयकार्योत्पादनसाम
र्थ्यं सनातनंनित्यंउत्तरोत्तरसर्वकार्येष्वनुस्यूतं नदेवबीजमहिभू
हा तिविहितनतुप्रतिव्यक्तिविनश्यत् तथाबुद्धिमतांबुद्धिः प्रज्ञाहम
स्मितेजस्विनांप्रागल्भानांतेजःप्रागल्भ्यमहं १० [illegible] ॥

रिव

पैशाचभाष्यटीका

बीजंप्ररोहणसमर्थंमांसर्वभूतानांविद्धिपार्थसनातनंचिरंतनं बुद्धि
र्बुद्धिमतामस्मितेजःप्रागल्भ्यंतेजस्विनामहं १० ॥

रामानुजभाष्यटीकाउपक्रांतं १० स्पष्टार्थम्

अभिनवगुप्तकृतटीकाउपक्रांतं १०

परमार्थप्रपाटीका

किंचसर्वभूतानांचराचराणांबीजमंकुरोत्पादनसामर्थ्यंसनातनं

नित्यं उत्पत्तिरहितं सर्वकार्येषु अनुस्यूतं तदहमस्मि तथा बुद्धिमतां बुद्धिः प्रज्ञाहमस्मि तेजस्विनां तेजः प्रागल्भ्यमहमेवास्मि १० ॥

वनमालीटीका

सर्वभूतानां चराचरभूतानां बीजं स्वजातीयकार्योत्पादनसामर्थ्यं सनातनं नश्वरोत्तरकार्येषु अनुस्यूतं बुद्धिः प्रज्ञा तेजस्विनां प्रागल्भानां तेजः प्रागल्भ्यम् १०

५०

उत्तमवैजयंतीटीका

किंच बीजमिति हे पार्थ हे पृथापुत्र सर्वभूतानां स्थावरजंगमरूपाणां बीजं प्ररोहकारणं सनातनं नित्यं प्रतिव्यक्तिभिन्नं यद्धात्वान्नादिबीजं मां विद्धि विभूत्यात्मकेन तद्रूपेण तेषु स्थित्वाहं तानि पालयामीति त्वं जानीहीत्यर्थः बुद्धिमतां सारासारविवेकवतां बुद्धिर्व्यवसायात्मिकाहमस्मि यद्यद्विभूतिरूपाया तेषु स्थितेहमत्र च तेभ्यः स्वभोगादिकं प्रदाय तान् पालयामीत्यर्थः तेजस्विनां तेजस्वतां यत्तेजः परैरनभिभूतत्वे सति पराभिभवसामर्थ्यं तदप्यहमेवास्मि मद्विभूतिरूपेण तेजसा तेषु निष्ठन्नहं जीवेभ्यस्तान् रक्षामीत्यर्थः १० ॥

मधुसूदनीटीका

सर्वाणि भूतानि स्वस्वबीजेषु प्रोतानि नतु त्वयीति चेन्नेत्याह ॥

यत्सर्वभूतानां स्थावरजंगमानामेकं बीजं कारणं सनातनं नित्यं बीजांतरनपेक्षं न तु प्रतिव्यक्तिभिन्नमनित्यं वा तदव्याकृताख्यं सर्वबीजं मामेव विद्धि न तु मद्भिन्नं हे पार्थ अतो युक्तमेकस्मिन्नेव मयि सर्वबीजे प्रोतत्वं सर्वेषामित्यर्थः किंच बुद्धिस्तत्त्वातत्त्वविवेकसामर्थ्यं तादृशबुद्धिमतामहमस्मि बुद्धिरूपे मयि बुद्धिमंतः प्रोता विशेषणाभावे विशिष्टाभावस्यावश्यकत्वात् तथा तेजः प्रागल्भ्यं पराभिभवसामर्थ्यं परैश्चानभिभाव्यत्वं तेजस्विनां तथाविधप्रागल्भ्ययुक्तानां यत्तदहमस्मि ते
५३ जोरूपे मयि तेजस्विनः प्रोता इत्यर्थः १० ॥

सदानंदीटीका

प्रा॰

स्वस्वबीजेषु बीजानि प्रोतानि न त्वयीति चेत् आस्थावरांतानां भूतानां यच्चिरंतनं १ बीजमव्याकृताख्यं मां विद्धि प्रोतान्यतो मयि बुद्धिमतां विना बुद्धिं तादृशीं न विवेकिनः १ पराभिभवसामर्थ्यं तेजः प्रागल्भ्यम

च्यते । परेषामभिभावकत्वं यत्तत्तेजस्तेजस्विनामहं तेजस्विनः परिप्रोक्ता स्तेजोरूपे मयीश्वरे ध ॥ १० ॥

नीलकंठीटीका

बीजं कारणं सर्वभूतानां पिंडब्रह्मांडात्मकानां बीजे मयि पिंडादिकं प्रोतं कनककुंडलादिवत् सनातनं नित्यं बीजांतरा[illegible]दनुत्पन्नं बुद्धिरूपे मयि बुद्धिमंतः प्रोताः तेजः प्रागल्भ्यं तद्रूपे मयि प्रागल्भाः प्रोताः १० ॥

आनंदीटीका

अत्र हेतुमाह सनातनं बीजं न तु व्रीह्यादिवद्विनश्वरं बुद्धिमतां विज्ञ षां बुद्धिस्तत्वातत्वविचारः तेजस्विनां राज्ञां तेजः परेषामभिभवे सामर्थ्यं १० ॥

रामकंठीटीका

तथा बुद्धिमतां बुद्धिरहमेवेति मनोहंकारबुद्धिलक्षणमंतःकरणं गुरु णां प्रधानं तथैव त्रयं पूर्वोक्तन्यायेन ताऽहमेवेति त्रिभिरेतैः सहितस्य यो विंशतिभेदः कार्यकारणवर्गश्चतुर्विंशतिः प्रधानेनाऽन्तर्गतो जड प्रकृतिप्रपंचो ममैव स्वभाव इति व्यवहितैः पादैः प्रतिपादितं एव मेव सर्वभूतेषु जीवनं प्राणनं प्रधानं तदप्यहमेव तथा सर्ववेदेषु प्रणव ओंकारः सोऽपि दिताः विकृतं धन्यात्मकोऽहमेव तत्र हि प्रकृतिभू तत्वात्सर्ववेदेषु प्रधानं तस्य विकारभूता हि सर्वे वेदाः १० ॥

लासिकी [illegible]टीका

ननु प्राकृतस्य स्थूलरूपस्य स्फुटतया भासमानत्वात्कथं तव सर्गान्त स्तत्वप्रतीतिः स्यादित्यत आह ॥ स्फुटतया प्राकृतत्वेन भासमा नानां भूतानां बीजं सूक्ष्ममादिकारणं मामीश्वरं जानीहि सनात नं नित्यं न तु प्रतिव्यक्ति विनश्यत् १० ॥ न केवलं जगत्कारणमस्मि वाहंकारणं [illegible] यावदैश्वर्यलाभस्यापीत्याह बुद्धिमतां प्र प्राप्ततोषशालिनां बुद्धिर्बु [illegible] द्धिवृत्तिरहमेव तथा तेजस्विनां मत्प्रमहेश्वराणां सदाशिवभूमिकारूढानां यत्तेजः स्वदत्ताप्रत्येयस्य भा वचक्रस्योन्मीलितमात्र चित्रकल्पमवभासनं तदहम् [illegible]

[illegible]

सर्वेषां चराचरात्मक

पंचोलीटीका

किंच बीजमिति हेपार्थसनातनंनित्यंमांसर्वभूतानांसर्वेषांचा
राचरभूतानांबीजंसजातीयविजातीयकार्य्योत्पादनसामर्थ्य
मद्विभूतिंविद्धिबुद्धिमतांबुद्धिरंतःकरणस्यविवेकशक्तिरहंते
जस्विनांतेजःप्रागल्भ्यमहं १०

गूढदीपिकाटी॰

सर्वेषांचराचरात्मकानांस्फुटतयाप्राकृतत्वेनभासमानानांभूता
नांबीजंमूलमादिकारणंमामीश्वरंजानीहिसनातनंनित्यंनतुप्र
तिसर्गंविनश्यत् नकेवलंजगत्परिणामस्यैवाहंकारणंमावदे
वर्वलाभस्यापीत्याह बुद्धिमतांप्रशान्तबोधशालिनांबुद्धिर्बुद्धिर्वृ
त्तिरूपैव तथातेजस्विनांमध्यमहेश्वराणांसदाशिवभूमिकारूढा
नांयत्तेजःइदंतामप्रत्येयस्वभावकस्फोर्त्तिलितमात्रविवेकत्वमव
भासनंतदहं १०

रणवीरसमिद्धोधिनी ॥

बीजमिति देअर्जुन मां सर्वेश्वरं सर्वभूतानां सर्वेषां भूतानां प्रो
क्तलक्षणानां भूम्यादितत्वानां सनातनं बीजं मूलकारणं विद्धि
जानीहि मय्येवैतानि पूर्वोक्तलक्षणानि भूम्यादीनि व्याख्यातस्व
रूपप्रकृतिसाधनीभूतानि तत्त्रिगुणमर्थस्पष्टानीति मामेवैते
प्रकार्यसाधनशक्तमावसंभावनां कुर्वन्तितात्पर्यं बुद्धिमतां
दृढनिश्चयात्मकधीविशिष्टानां बुद्धिस्ताहमपीधीश्वास्मि तथा
तेजस्विनामिंद्रियपाटववतां तेजस्ताहमेवास्मि १० ॥

मधुभाष्य

१० ॥

भाषाअनुवाद

और हे पार्थ स्थावर जंगम जो कुछ भूतमात्र है उस का सना तन
कहे उत्तरोत्तर समस्त कार्यो मे अनुगत कहे प्राप्त अनाशी वीज
रूप हमे जानो अर्थात् समान जातीय कार्य उत्पादन सामर्थ्य
रूप जो कारण सो भी मेरी ही विभूति जानो परंतु सामान्य बी
ज जैसी अंकुर होने पर नष्ट होते है तैसे मेरा विभूति रूप वी
ज नाश नहीं होता इसीसे सनातनहै और बुद्धि मानो की बुद्धि
कहे विवेक शक्ति मैंहीं हो और तेजस्वियों मे तेज कहे प्रगल्भ
ता प्रताप रूप भी मैंहीं हूं यह जानो १० ॥

दोहा

भूत सभीको वीजमोहि पार्थसनातनजान प्रज्ञावंतमें बुद्धिहों
तेज तेजस्विमे मान १०॥

52

बलंबलवतांचाहंकामरागविवर्जितं धर्माविरुद्धोभूतेषुकामोऽस्मिभरतर्षभ ॥ ११ ॥

शांकरभाष्यं

बलमिति बलंसामर्थ्यमोजो बलवतामहं तच्चबलं कामरागविवर्जितं कामश्चरागश्च कामरागौ कामस्तृष्णा असंनिकृष्टेषु विषयेषुरागोरंजना प्राप्तेषुविषयेषुताभ्यांकामरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलंसत्वमहमस्मि नतुयत् संसारिणां तृष्णारागकारणं किंचधर्माविरुद्धो धर्मेणशास्त्रार्थेन अविरुद्धोयः प्राणिषु भूतेषुकामोयथा देहधारणमात्राद्यर्थोऽशनपानादिविषयः कामोऽस्मि हेभरतर्षभ ॥ ११ ॥

आनन्दकृतटीका

यच्चबलवतां बलंतद्भूते मयित्वेषांप्रोतत्वमित्याह बलमिति कामक्रोधादिसर्वैकस्यापि बलस्यात्मनि वारयतितच्चेति कामरागयोरेकार्थत्वमाशंक्यार्थभेदमावेदयति कामस्तृष्णेत्यादिना विशेषणसामर्थ्यसिद्धं व्यावर्त्यं दर्शयति नत्विति शास्त्रार्थाविरुद्धकामभूते मयि तथाविधकामतां भूतानां प्रोतत्वं विवक्षित्वाह किंचेति धर्माविरुद्धं काममुदाहरति यथेति ॥ ११ ॥

स्वामिकृतटीका

किंचबलमिति कामोऽप्राप्तेवस्तुन्यभिलाषोरजसः रागः पुनरभिलषितेर्थेप्राप्तेपिपुनरधिकेर्थेचित्तरंजनात्मकस्तृष्णापरपर्यायस्तामसः ताभ्यांविवर्जितंबलवतांबलमहमस्मि सात्विकंस्वधर्मानुष्ठानसामर्थ्यमहमित्याह मित्यर्थः स्वधर्मेणाविरुद्धः स्वदारेषुपुत्रोत्पत्तिमात्रोपयोगीकामोहं ॥ ११ ॥

॥ विपराचभाषटीका

बलंबलवतामिति कामरागविवर्जितं कामश्चरागश्चताभ्यांविवर्जितं कामोहष्यमानेषुतृष्णासमृध्यमानेषुरागइतिविशेषः धर्माविरुद्धोभूतेषुप्राणिषुकामोऽस्मिभरतर्षभ ॥ ११ ॥

53

रामानुजभाष्यटीका

यतेसर्वेविलक्षणाभावमत्तएवोत्पन्नाः मच्छेषभूतामच्छरीरतयामय्येवाव
स्थिताः अतस्तत्तत्प्रकारोहमेवावस्थितः किंविशिष्टोभिधीयते ॥

अभिनवगुप्तकृतटीका[illegible] ॥

परमार्थप्रपाटीका

किंचबलवतांकामरागविवर्जितंबलमहमस्मितत्रकामः अप्राप्तेव
स्तुनिअभिलाषोराजसः रागःपुनरभिलषितेर्थेप्राप्तेऽभिरंजनात्म
कस्तृष्णापरपर्यायस्तामसस्ताभ्यांवर्जितं यद्वैबलवतांपुरुषार्थ
वतांवीराणांबलंशौर्यंकामेषुविजयेषुरागःप्रीतिस्ताभ्यांविवर्जितंनिः
संगत्वेनस्वधर्माचरणरूपमित्यर्थः भूतेषुधर्माविरुद्धःस्वदारेषु
पुत्रोत्पत्तिमात्रोपयोगीकामोमदनरूपेणास्मि ॥ ११ ॥

वनमालीटीका

कामादिविवर्जितंबलंधर्माविरुद्धश्चतत्कालिकःप्रजार्थकामश्चा
हं यद्वारसयतिरसंप्रेरयतिसृजतिचेत्यादेरसइत्युच्यते प्रतिपदि
काद्वात्वर्थेबहुलमिष्ठवच्चेतिसूत्रेणणिचप्रत्ययेकृतेततोधातु
संज्ञायामच्प्रत्ययेसतिणिचोलोपेनरसइतिभवति एवंप्रभासना
त्प्रभाप्रेरकत्वाच्चेतिप्रभा प्रणौतिस्तौतिस्तवकंप्रेरयतिस्वयंव
क्ति वाहंप्रेरयतिचेतिप्रणवःशब्दःपुण्यःशब्दःपुण्यंगंधंकरोतितदा च पुंड्र
तिपुण्योगंधः तेजयतितेजः प्रेरयतिवातेजः जीवनंकरोतिप्रेर
यतिवाजीवनंतपतितपः प्रेरयतिचेतितपः वीजंकरोतितदाचेष्टे
प्रेरयतिवावीजं स्वयंबुद्धत्वाद्बुद्धिप्रेरकत्वाच्चबुद्धिः भोगनिरपेक्षं
बलयत्यर्थीकामविवर्जितंबलं अप्राप्तेप्रयुज्यमानत्वाद्रागवर्जि
ज॰४ तंबलं रागिणोप्राप्तेबलंप्रयुंक्तेएवंसमन्वयाद्ध्येयोज्ञरीत्यासक
लवैदिकशब्दवाच्योभगवोलक्ष्यात्तमणाच्छब्देनातिपयशब्द
वाच्यत्वेनचिंत्यइतिभावः ११ ॥

ऊहमैवेजयंतीटोका

किंच बलमिति बलवतांबलिष्ठानांपुरुषाणांयद्बलंसामर्थ्यमोज

सामर्थ्यमोजस्तदहमस्मिकीदृशंकामरागविवर्जितंअप्राप्तेषुविषयेषु
त्सलारूपःकामःप्राप्तेषुविषयेषुपुनस्ततोऽधिकप्राप्त्यभिलाषोरंजन
रूपोरागःकामश्चरागश्चकामरागौताभ्यांविवर्जितंविशेषणराजसता
मसरूपाभ्यांकामरागाभ्यांवर्जितंकेवलंदेहेंद्रियादिधारणमात्रार्थ
कंसात्त्विकरूपंबलमहमस्मिनतुसंसारिणांत्सलारागकारिणंन
दित्यर्थःकिंचहेभरतर्षभभरतश्रेष्ठेत्यनेनत्वमपिपूर्वैलोक्यविजयसा
मर्थ्यमस्तितदप्यहमेवास्मिअतोभारतविजयेसंसारविजयेचत्वंसंदे
हंमाकुरुसर्वमहमेवत्वांकारयिष्यामीति सूचितम् भूतेषुप्राणिमा
त्रेषुयःकामःधनपुत्रकलत्रादिविषयाभिलाषःसोप्यहमेवास्मिकी
दृशःसःधर्माविरुद्धःधर्मशास्त्रेनात्रप्रतिपाद्यप्रतिपादकयोरभेदविव
क्षयातत्प्रतिपादकंशास्त्रमुच्यते धर्मोद्दशमादिधर्मप्रतिपादक
शास्त्रदविरुद्धः अप्रतिकूलः यद्वाधर्मात् सद्धर्मात् अविरुद्धः अप्र
तिकूलः सद्धर्मकामस्यसात्त्विकत्वेनसंसारनिवर्तकत्वात् मोक्षहे
तुत्वम् अन्यधर्मकानांतुराजसतामसत्वेनसंसारप्राप्तिकारत्वाद्बंधन
हेतुत्वमतःसर्वेभ्योमदितरदेवोपासनादिरूपधर्मकामेभ्योमद्धर्मका
मएवश्रेष्ठतरःसतुममैवविभूतिरूपस्यादित्यभिप्रायः ११ ॥

मधुसूदनीटीका

अप्राप्तोविषयःप्राप्तिकारणाभावेपिप्राप्यतामित्याकारः चित्तवृत्ति
विशेषःकामःप्राप्तोविषयःक्षयकारणेसत्यपिनक्षीयतामित्येवमा
कारःचित्तवृत्तिविशेषःरंजनात्मारागः ताभ्यांविशेषेणवर्जितंसर्व
थातदकारणंरजस्तमोविरहितंयत्स्वधर्मानुष्ठानायदेहेंद्रियादि
धारणसामर्थ्यंसात्त्विकंबलंबलवतांनाहंतथासात्त्विकबलयुक्तानांसं
सारपराङ्मुखानांतदहमस्मितद्रूपेमयिसर्वेबलवंतःप्रोताइत्यर्थः
प कामरागविवर्जितमेवबलमद्रूपत्वेनध्येयंनतुसंसारिणांकामराग
कारिणंबलमित्यर्थः चशब्दस्तुशब्दार्थोभिन्नक्रमःक्रोधाद्यर्थोवारा
गशब्दोव्याख्येयः धर्मोधर्मशास्त्रंतेनाविरुद्धोप्रतिषिद्धोधर्मानुकू
लोवायोभूतेषुप्राणिषुकामःशास्त्रानुमतजायापुत्रवित्तादिविष
योभिलाषःसोहमस्मि हेभरतर्षभशास्त्राविरुद्धकामभूतेमयितथा

गी॰
टी॰
स॰

54

विषकामयुक्तानांभूतानांयोनत्वमित्यर्थः ॥ [illegible] ॥

सदानंदीटीका

आमिसामस्थ्यभावेपिप्राप्युन्नामितिवांछनं आप्राप्तविषयेकामोरागः
प्राप्तेलिरंजना १ नहीयनामीतिंक्षास्यात्स्त्यपित्वयकारणे नाभ्यावि
वर्जितनस्वीयधर्मानुष्ठानसिद्धये २ वलेदेहेंद्रियादीनांसामर्थ्यंपञ्चधा
रणे नद्रूपेमयिसंयोनावलवंतःशरीरिणः ३ धर्मशास्त्रेविरुद्धोयः
कामःप्राणिषुधर्महन्त शरीरयात्रासिद्ध्यर्थंकामोवाभोजनादिषुध
सोहंतस्मिन्मयियोनाःकामिनोधर्मतत्पराः ॥ ११ ॥

नीलकंटीटीका

वलरूपेमयिबलवंतःयोनाः कामरागविवर्जितं कामस्तस्या रागः
रंजना नैतद्विष्यविषयेकौ अतोनिरवद्यस्यवलंनद्वर्जितं एवंधर्मावि
रुद्धकामरूपेमयिईदृशःकामवंतःयोनाः ॥ ११ ॥

आनंदीटीका

बलंनत्रज्ञारणसामर्थ्यंकामेनविषयाभिलाषेण रागेणतत्रैवासक्त्या
चविवर्जितं नथैवभूतेषुप्राणिषुधर्मेणधर्मशास्त्रेणाविरुद्धोदेश
कालेपेत्वयानिषद्धःकामःकंदर्पोस्मि अथच कामशब्देनसंकल्प
विकल्पात्मकंमनः बुद्धिसाहाट्टेवाकान्त्रगुणोरुपमित्यहंकारस्येनद
नःकरणत्रयमहमेवास्मीत्यर्थः अपिचात्रोतमाजगत्स्थितिहेतवः
परमेश्वरैवयात्मपापेत्वयापरमेश्वरानुस्मृतावर्णिताः विभूत्याप्यायेत
कारणत्वाकारणत्वानपेक्षयासामान्यतउक्तानिमत्वानिदर्शने
इतितात्पर्यं ॥ ११ ॥

रामकंटीटीका

तथासर्वांक्रियास्तनपोमयीक्रियाप्रधानंतत्तस्तपस्विषुवर्तमानंतत्पो
ऽहमेव कामरागविवर्जितंबलंबलवतांप्रधानंतदपिसर्वोक्तन्याये।
नाऽहमेव तथातेजस्विनांप्रभावातिशयप्रयुक्तानंतेजःप्रभावोस्
स्यिस्तदप्यहमेव एवमनेनक्रमेणसर्वभूतानांबीजंहेतुरहमेवे
ति तदुक्तेनतभेदेनद्विधाप्रकृतिर्ममैवस्वभावःइत्यनेनप्रकारेण

विग्रहरूपसमन्वयैः पदैः प्रतिपादितमेवं रसोहमित्यादिग्रंथान्य
विवहयोपलक्षणमात्रत्वेन प्रतिपादितं परमार्थतस्तु सर्वोक्तन्या
येन तत्पदार्थजातं किंचन न संभवति
११ ॥

तासिकी टीका

नवेदंतमात्यीशामासैवाहंवलमंयावेवर्यवलामस्यापीत्या
ह ॥ बुद्धिमतांबुद्धिरिति बोधशालिनं बुद्धिर्बुद्धिमतामहमेव न
पादेनसर्वलिंगानवसमहेश्वराणां भूमिकावृत्तानांयत्तेज
स्तेजस्विनांसपत्नाभावपराक्रमः तथावदितवाल्याविभास
तेजस्तदहं बलवतां महेश्वराणां ईश्वरभूमिकावृत्तानां यद्बलं प्र
तिबिंबकल्पं तयाभाववर्गपरामर्शित्वं तदहं कीदृशं कामराग
विवर्जितं कामोभिलाषो रागश्चासक्तिस्ताभ्यां विशेषेण निरव
शेषतया वर्जितं तदुक्तं कल्पालोके ज्ञानं प्रशान्तं नवबोधवृत्ति
रैश्वर्यमुग्रप्रसरापरेषां प्रकाशनं प्रत्यपियोगरूपाणां किंव
हिः स्थैर्यं वनीवलं सा उत्पन्नवाह्यप्रसरात्तवीर्यं तेजश्चावाप्तान
वभासयंती सोढिस्थमेकैवतत्त्वबलशक्तिर्वीर्याख्या वमर्शात्तभवेदवि
षेति तथाभूतेषु कामसंज्ञासंविन्मात्ररूपायस्याघटपटादिभि
र्धर्मरूपैर्नास्ति विरोधः सोहं इच्छाशक्तिरूपं भगवच्छक्तितयानुया
यिनी नच्छविछिन्दिरूप्याते धर्मैस्त्वागंतकैर्घटपटादिभिर्भिद्यते
इति तत्रपासकनयाशुद्धसंवित्स्वभावत्वज्ञानिनः उक्तं चवि
बोधप्रनिषदि इच्छायामथवा ज्ञाने जाते चित्तं निवेशयेदिति
ज्ञानेषु वर्तनप्रस्तुते इत्यर्थः एवं व्याख्यानं तत्त्वज्ञायेपरस्पराणां
पद्यानकं त्रिवर्गसेवने इत्याशयेन व्याचक्षते ते संप्रदायक्रम
मजानाना भगवद्रहस्यं च व्याचक्षाणा मनस्कार्याय एव ११ ॥

पंचोलीटीका

किंच बलमिति हे भरतर्षभ मदच्छनः बलवतां तेजस्विनां का
मरागविवर्जितं बलं ऊर्ज्यसामर्थ्यं महं भूतेषु धर्माविरुद्धो यः
कामः स्वदारेषु पुत्रोत्पत्तिमात्रोपयोगी कामोहं ११

गीं
टीं
मं

55

तत्त्वदीपिकायां

तत्त्वबलं मे त्रैस्वर्णामीश्वरं श्रुतिकार्यत्वाद्यस्तत्त्वान्मयि बीज
भूतं तस्य सिद्धत्वया भातत्वेन भासमानस्यापि भावरूपत्वं
बीजैव मतेत्याह ११

रसाबीरसमिद्धोथिनी

तथा बलवतां धीराणां सामर्थ्यवतामहमेव बलमस्मि तच्च ब
लं रागादिवर्षणस्वधर्माद्यादि विषये प्रतिहतं सत् धर्मायैव क
ल्पत इति तत्त्वं निषेधयति कामरागविवर्जितमिति काम्यंत इ
ति कामाः पुत्रमित्रादयस्तेषु विषये यो रागः प्रवृत्तिनिरोधकत्वे
नाधर्मजनकस्तेन वर्जितमित्यर्थः ननु यदि रागो धर्मजनक
स्तत्कृतं स्वर्गादिसेवनं श्रुयुक्तेनशुद्धेनापीत्यत आह धर्माविरु
द्ध इति भूतेषु सर्वेषु पुत्रमित्रसपत्न्यादिषु विषये समदर्शिना
नत्वायितत्वे समानमेव वृद्धतायां प्रयोजकं विचारयतस्तत्तदिय
प्रवर्तेषु विषये यं धर्माविरुद्धः शास्त्रविहितत्वेन धर्मानुसारी
कामः साक्षान्नाद्यभिलाषोऽहमेवास्मि येन देहेनातिघोरेपि
समस्तमार्गे ते प्रवर्तंते इति इंदुममभिमतस्वागतभूतशास्त्रगुरुः
पितृपुत्रादिषु च कामस्तादृशासंकल्पात्मकः शास्त्रनिषिद्ध
त्वेनाधर्मजनक एवेति तस्य धर्मविरुद्धत्वमिति ११

मधुभाष्य

११

भाषाअनुवाद

और काम राग विवर्जित अर्थात् काम कहे अप्राप्त विषय मे
अभिलाष स्वरूप जो रजोगुण का कार्य इच्छा और राग कहे अ
भिलषित अर्थ पायके उस से भी अधिक के अर्थ जो चित्तका
अनुराग कहे तमो गुण का कार्य तृष्णा रूप इच्छा है इन दो
नो को छोड़ि और यावत बल वानो का बल भी मैहों अ
र्थात् सात्विक स्वधर्मानुष्ठान की सामर्थ्य मैहूं और हे भ
रतर्षभ भरत वंशमे श्रेष्ठ अर्जुन धर्म अविरुद्ध अर्थात् स्वभा
र्यामे पुत्र मात्र उत्पन्न के अर्थ उपयोगी जो काम हो भो
ग सो भी मैहीं धर्म अविरुद्ध कहने से वध आदि कामका
निषेध आया ११ ॥

दोहा

मैहोंबलबलवानमे कामरागबिन सोय धर्मअविरोधिभरत
वर कामभूत मैहोय ११॥

56

येचैवसात्विकाभावाराजसास्तामसाश्चये मत्तएवेति
नान्विद्धिनत्वहंतेषुतेमयि १२ ॥

शंकरभाष्यं

किंचयेचैवेति येचैवसात्विकाःसत्वनिर्वृत्ताःभावाःपदार्थाराजसाः
रजोनिर्वृत्तास्तामसास्तमोनिर्वृत्ताश्चये केचित् प्राणिनां स्वकर्म
वशात् जायन्तेभावास्तान् मत्तएवजायमानानितिएवं विद्धिसर्वा
न् समस्तानेव यद्यपितेमत्तोजायंते तथापिनत्वहं तेषु तदधीनः
तद्वशोयथा संसारिणस्ते पुनर्मयि मद्वशामदधीनाः १२ ॥

आनन्दगिरिकृतटीका

चिदानन्दयोरभिव्यंजकानां भावानां ईश्वरात्मत्वाभिधानादन्येषा
मनदात्मत्वप्राप्तावुक्तं किंचेति प्राणिनां त्रैविध्यहेतुं दर्शयन् वा
क्यार्थमाह येकेचिदिति तर्हिपितुरिव पुत्राधीनत्वं ततोजाय
मानानां तदधीनत्वं तवापि स्यादिति विक्रियावत्वहेतुत्वप्रसक्ति
रित्याशंक्याह यद्यपीति ममपरमार्थत्वात्तेषां कल्पितत्वान्न तद्गु
णदोषौ मयिस्यातामित्यर्थः तेषामपि तद्वदेव स्वतन्त्रतासंभवा
त् किमिति कल्पितत्वमित्याशंक्याह तेपुनरिति त्रिविधानां भा
वानां नस्वातंत्र्यमीश्वरकार्यत्वेन तदधीनत्वात्तथा चकल्पितस्याधि
ष्ठानसत्ताप्रतीतिभ्यामेव तद्वत्वात्तन्मात्रत्वसिद्धिरित्यर्थः १२ ॥

स्वामिकृतटीका

किंच येचान्येपिसात्विकाभावाःशमदमादयःराजसाश्चहर्षदर्पाद
यः तामसाश्चयेशोकमोहादयः प्राणिनांस्वकर्मवशाज्जायंतेतान्
सर्वान्मत्तएवजातान्विद्धिमदीयप्रकृतिगुणकार्यत्वात् एवमपितत्ते ऽप्य
षुहंनवर्तेजीववत्तदधीनोहंनभवामीत्यर्थः तेतुमयिमदधीनाःस
तोमयिवर्तन्तइत्यर्थः [illegible]
[illegible] १२ ॥

पिशाचभाष्यटीका

येचैवसात्विकाःसत्वगुणनिर्वृत्ताःभावाःप्राणिनःराजसाःरजोगुणनिर्वृ

त्ता

57

× नेमत्तोजायंते तथापि

स्ता

त्रामसास्तमोगुणानिर्हत्ताश्चयेतेमत्तएवेश्वराज्जातानान्विद्धि यद्यपि तेनत्व
हंतेषुनतहशोहंनभवामितेमयिमद्वशाइत्यर्थः १२ ॥

रामानुजभाष्यटीका

यइति सात्त्विकाराजसास्तामसाश्चजगतोदेहत्वेनेंद्रियत्वेनभोग्य
त्वेन तद्धेतुत्वेनचावस्थिताये भावास्तान्सर्वान्मत्तएवोत्पन्नान्विद्धि
तेमत्शरीरतयामयिस्थिताइतिचनत्वहंतेषु नाहंकदाचिदपितदा
यत्तस्थितिः अन्यत्रात्मायत्तस्थितित्वेपिशरीरस्यशरीरिणात्मनिस्थित्या
पिउपकारोविद्यते ममैतेनंकश्चित्तथाविधउपकारः केवलंलीलैवप्र
योजनमित्यर्थः १२ ॥ अभिनवगुप्तकृतटीकाव्याख्यानं १२

परमार्थप्रपाटीका

किंच येचान्येसात्त्विकाभावाःशमदमादयःराजसाहर्षदर्पादयस्ताम
साःशोकमोहादयःप्राणिनांस्वकर्मवशाज्जायंते तान्सर्वान्मत्तएव
जातान्विद्धि मदीयप्रकृतिगुणकार्यत्वात् अथापितेभ्यस्तेषुप
दार्थेषुकारणात्मनातद्रूपेणवर्तमानोपिअसंगत्वेननिष्ठामीत्या
ह नत्वहमिति तेषुपदार्थेषुनाहंतद्धर्मान्स्पृशामि अथवातेषा
निभासकत्वान्मयिनसंतिशुक्तिकायांरजतमिव १२ ॥

वनमालीटीका

नकेवलंरसादीनायमीणांव्यापकत्वेनप्रेरकत्वेनचतत्तत्पदवाच्यो
हमपितुपृथिव्यादिधर्मिव्यापकत्वादिनातत्तत्पदवाच्योहमित्याह
यइति सात्त्विकामनइंद्रियाधिष्ठातृदेवादयः सात्त्विकोहंकारश्चत
द्धेतुराजसानींद्रियाणिअहंकारस्तद्धेतुस्तामसाभूतमात्रादयः वराहा
नुप्रकृतिमहत्तत्वेनसर्वेभावापदार्थाःमत्तएवनान्विद्धि तेषामुत्पत्तिस्थि
तिलयमत्राधिकंमदधीनंविद्धीत्यर्थः नतुभूभूधरयोरिवानोन्याधीनत्वम
पितदधीनःस्यामित्याहनत्विति तेमय्याधेयत्वेनस्थिताः नत्वहंतेष्वाधे
यत्वेनतिष्ठामि मणिषुसूत्रमिवतत्साक्षात्तयापारयवनजनतोपेयःभक्तास
नविश्रुयमाणोविभर्ति एकोदेवोवजूंषिनिविष्टः तदाश्रितंनगणनासौजुत्र
विधाश्रितइत्यादिश्रुतेः इत्युक्तेः सर्वजगज्जन्यादिकर्तासर्वाधारःसर्वप्रेर
कःसर्वव्यापकउदासीनोभक्तवत्सलःसर्वशास्त्राभिधेयोजायमानोवसुदेवसू
नरद्वितीयोहमितिभावः १२ ॥

नार्वं

नन्वेतेसर्वेभावाः प्रकृतिगुणोद्भूताः सतेनेषांत्वद्विभूतित्वंकथमुपपद्यते योयस्माज्जायते सतस्यैवविभूतिः स्यादितिनियमादितिचेत्तत्रा ह येचैवेतियेएवचसात्विकाः सत्वगुणोत्पन्नामनोबुद्ध्यादिरूपाः श मदमादिरूपाश्चयेचैवराजसारजोगुणोत्पन्नाइंद्रियादिरूपाः हर्ष दर्पादिरूपाश्चयेचैवतामसास्तमोगुणोत्पन्नदेहाद्याकाराः शोकमो हाद्याकाराश्चभावाः पदार्थाः प्राणिकर्मादिवशाज्जायन्तेतान्सर्वा न्मत्तएवेतिमत्तएवपरमेश्वरादेवजायमानान्विद्धित्वंजानीहि ननु यद्येवंतर्हित्वंकिंविकारेणनश्वरश्चेतितत्राह नत्विति नत्वहंतेषु यथा गीतिश्चयेयवातेषुभावेषुतदधीनस्तत्तद्विकारयुक्तश्चभूत्वेतरसंसा रीवाहंवर्तत्रः सर्वेश्वरोनैवनिष्ठामि सत्वतत्रसत्तनाकत्वान्निर्विका रत्वान्निर्लिप्तत्वाच्चकर्मक्लेशविपाकाद्यैरस्पृष्टस्याविलेशिनुरि तिवचनात् मयिपुरुषोत्तमेतेभावावर्तन्तेतेषांमदधीनस्थितिप्र वृत्तिकत्वादित्यर्थः ॥

मधुसूदनीटीका

किमेवपरिगणेन॥

येचान्येपिभावाः चित्तपरिणामाः सात्विकाः शमदमादयः येचराजसा हर्षदर्पादयः येचतामसाश्शोकमोहादयोप्राणिनांविपाककर्मा दिवशाज्जायंतेतान्मत्तएवजायमानानिति अहंकृत्स्नस्यजगतः प्रभवइत्याद्युक्तप्रकारेणविद्धिसमस्तानेव अथवासात्विकाराजसता मसाश्चभावाः सर्वेपिनतद्वर्गोव्याख्येयाविशेषहेत्वभावात् एवका रश्चसमस्तावधारणार्थः एवमपिनत्वहंतेषुमत्तोजातेष्वपितद्वशस्त द्विकारदूषितोजीवइवकल्पितसर्पविकारदूषितोहंनभवामिसं सारीव नत्वभावामयिरज्ज्वामिवसर्पादयः कल्पितामदधीनसत्तास्फू र्तिकामदधीनाइत्यर्थः ॥ [illegible] ७६
भावानेवसात्विकादीनामहमात्मनःसंसारित्वमेवंविधमनन्तरूपा पदार्थानाविदितिवेत् तेष्वयज्ञानइत्याह ॥

सदानंदीटीका

भावाश्चित्तपरीणामाः सात्विकायेशमादयाः राजसाहर्षदर्पाद्यामो हाद्यास्तामसाश्चये १ विपाककर्मादिवशानोजायंतेदेहिनांहितान् मत्तः सर्वेश्वरात्सर्वाञ्जायमानानवेहिभोः २ नत्वहंतेषुभावेषुम

ज्ञातेनैवपिसर्वतः नाहमस्मितदायत्तोमदायत्ताभवंतितेन ३ मत्तः एवउ
त्पन्नेतितेभ्योभिन्नोस्म्यहंसदा रज्जोःसर्पादयोयद्वत्कार्यत्वेपितन्तुमेः
रज्जोर्नास्मिमनागलेपोनयाममनतंतुमेः ५ ॥ १२

नीलकंठेटीका

सात्विकाःधर्मज्ञानवैराग्यैश्वर्यादयःराजसाःलोभप्रवृत्त्यादयःताम
साःनिद्रालस्यादयः तान्सर्वान्मत्तएवरसतन्मात्रादिरूपात्सूत्रात्म
नोनिर्गताइतिविद्धि नन्वेवंत्वत्सर्वजगदात्मनोविकारित्वापत्त्या
कौटस्थ्यहानिरित्याशंक्याह नत्वहंतेषुतेमयीति येष्ववादयः
प्रोतास्तेषुसूत्रावयवभूतेषुरसादिषुअहंतुनतद्रूपेषुबाधितात्मचि
न्मात्ररूपोघटशरावोदंचनादाविवमृत्तन्नास्मि अतएवतस्यास्यसत्तास्फु
रणेप्रवस्वकीयेप्रयच्छामिनत्वहंतानाभवामीत्यर्थः तेतुमय्यवा
ध्यस्तामदनन्याः यथारज्ज्वा मध्यस्ताःसर्पादयोरज्ज्वनन्याः नच
नन्यत्वमारंभणशब्दादिभ्यःइतिन्यायात् अनन्यत्वव्यतिरेकेणाभा
वः नत्वल्पनन्यत्वमितिभेदभ्रमः किंतुभेदंनिषेधामः कुतःआ
रंभणशब्दात् वाचारंभणंविकारोनामधेयमितिविकारस्यवाग्मा
त्रत्वेनस्वप्नमायेंद्रजालिकविषयसाम्यश्रुतेः नह्यात्मनोवि
चित्रप्रपंचात्मत्वेनमयीत्यंशाविरोधोपिनत्वहंतेष्वित्यंशेनविरोध
परिहारोयुज्यते कार्यस्यकारणात्मकत्वावश्यंभावात् तस्माद्विव
र्तवादाश्रयणेनैवब्रह्मणोजगदुपादानत्वंकूटस्थत्वंनिर्वहतइति
साधूक्तंनत्वहंतेषुतेमयीति १२ ॥

व॰

आनन्दीटीका

गुणैरेवतदुपसंहरति ॥ तदेवंप्रोक्तक्रमेणपरमेश्वरात्संभूताःप्रकृतिवि
कृतिरूपाःसात्विकादयोभावाःपरीक्षापर्वणिवक्ष्यमाणाःयेभावाः
सर्गेस्मिन्वर्तंते अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथेतीदंपूर्वोक्ता
त्सर्वात्मत्वात्तद्देवाद्देवजाता इतिविद्धितेषुतदहंपरमेश्वरस्तेषु
भावेषुनास्मि स्वतंत्रत्वादहंतदधीनप्रवृत्तिर्नास्मीत्यर्थः तेमयिम
दाश्रितामदधीनप्रवृत्तयएवते अपिच भावाभवंतीतिवक्ष्यमाणासा
त्त्विकादेवादयो राजसामनुष्यादयः तामसाःसरीसृपास्थावरादयः

इतिसर्वोजीववर्गोमत्तएवसंभूतः तस्यजनतोहंतेष्वाश्रितोस्मितेनमयि
तेत्रप्रलयेमय्येवलीयंते तथायोगाभ्यासात्तत्त्वशुद्धिक्रमेणमत्सा
युज्यंचयांतीत्यर्थः अत्रायंवाक्यार्थः यथाघटशरावादयः परम
कारणात्मृदःसंभूताअधस्तात्मृदेवभवंति वर्तमानानांचतेषांभि
न्नाकाराणांभिन्नवर्णानांघणाघणपलिमानां संबाधितत्राकाशा
देःसंबंधः परमकारणीभूतायांमृत्तिकायांनास्ति तथासर्वेषांपरम
कारणस्यापीश्वरस्यजीववर्गसंबंधिकर्मफलादिसंबंधोनास्तीति
११ ॥ यत्राहमितिप्रतिपादयितुमाह ॥ रामकंठीटीका
अपर्यंतेभावप्रपंचेप्रकृतिपरिणामरूपत्वात्सर्वभावस्य त्रैगुण्येपि
तेकेचित्सत्त्वप्रधानागुणीभूतरजस्तमस्काः केचिदेवमेवरजःप्रधा
नाः केचित्तमःप्रधानाइत्येतावतएवभेदानंत्यमनपेक्ष्यत्रैविध्येन
संगृहीतः इतियेकेचनसर्वेभावास्त्रिधासंभवंतितान्सर्वानेकत्या
येनमत्तएवप्रकाशरूपाज्जातान्जानीहि किंतुतेषुमत्कार्येत्ते
यद्रूपतयालब्धात्मकेषुभावेषुसत्सुतन्नाहंभवामि ततस्तद्वाधी
नसद्भावतामम स्वभावसिद्धनित्योपलब्धिमात्रधर्मकस्यविद्यते
तेतत्रतथारूपामयिसत्तिभवंति उक्तोपपत्त्यामत्सत्ताधीनसद्भावा
भावाःसर्वएवेत्यर्थः [illegible]
[illegible]
[illegible]
[illegible] ११ ॥

लासिकी [illegible]टीका

एवंसर्वान्तस्मृतात्वान्मयिबीजभूतेसत्यपिस्फुटतयाप्राकृतत्वेन
भासमानस्यापिभाववर्गस्यमदधीनैवसत्तेत्याह ॥ येचैवेतिसा
त्विकाभावाजडभावाश्चशमादयःस्वभावावा पामदमादयः राज
साभावा वाह्याहंकारदर्पादयश्च तामसाभूम्यादयः शोकमोहादय
श्च तान्सर्वान्मत्तएवजातानितिविद्धि मदीयप्रकृतिगुणकार्यत्वात्
एवमपितेष्वहंनवर्ते जीववत्तदधीनोनभवामि तेतुमदायत्तस्फू
र्तितयामदधीनाःसंतः मय्यपिवर्तंतेसत्तांलभंते तत्रांतंस्पदे

गी॰ टी॰ स॰

59

गुणादिस्पंदनैः छंदाः सामान्यस्पंदसंश्रयात् लब्धात्मलाभाः सततं
स्वर्त्तीस्यापरिपंथिनः अप्रबुद्धधियस्तेन त्वयि तिष्ठागतो यतः
पातयंति उरुहज्जारे घोरे संसारवर्त्मनि अत एव भगवन्मयः सर्वं भ
गवद्भावेन संवेदयते न तु नानाविधपदार्थविज्ञाननिष्ठो भगव
त्तत्त्वं प्रतिपद्यते इति सकलमानसावर्जकपद्यक्रमः अनेनैवाश
येन वक्ष्यति वासुदेवः सर्वमिति ज्ञानेन यो वक्रजन्मोपभोगज
नितकर्मसमतासमनंतरसमुत्पन्नपरपाकिपातानुगृहीतांतः
करणो सौ प्रतिपद्यते भगवत्तत्त्वं सर्वं वासुदेव इति स्वात्मसमहा
त्मा सचदुर्लभ इति ॥ १२ ॥

पंचोलीटीका

किंच ये चैवेति च ये ऽन्येपि सात्त्विका भावाः सत्त्वनिष्पन्नाः श
मदमादयः यथा राजसा रजोनिष्पन्नाः हर्षदर्पादयः तथा ता
मसास्तमोगुणनिष्पन्नाः शोकमोहादयः तान्मत्त एव विद्धि त
थाप्यहं न तेषु वर्त्तेन तदधीनः ते तु पुनः मयि मदधीनाः १२

तत्त्वदीपिकाटी

ये चैवेति ये चान्ये सात्त्विका भावा जडभावा अप्रमादयः स्वभावा वा शमद
मादयः राजसा भावा वा बाधादयो हर्षदर्पादयश्च तामसाश्च प्रमादयः
शोकमोहादयश्च तान् सर्वान् मत्त एव जातानिति विद्धि मदीयप्रकृ
तिगुणकार्यत्वात् एवमपि तेष्वहं न वर्त्ते जीववत् तदधीनो न भवामि
किंतु मदावर्त्त स्फूर्तितया मदधीनाः संतो मय्याधारे वर्त्तंते सत्ता लभ
न्ते तदुक्तं गुणादिस्पंदनैः छंदाः सामान्यस्पंदसंश्रयात् ल
ब्धात्मलाभाः सततं स्वर्त्तीस्यापरिपंथिनः अप्रबुद्धधियस्तेन त्व
यि तिष्ठागतो यतः पातयंति उरुहज्जारे घोरे संसारवर्त्मनि इति अत
एव भगवन्मयः सर्वं भगवद्भावेन संवेदयते न तु नानाविधपदार्थ
विज्ञाननिष्ठो भगवत्तत्त्वं प्रतिपद्यते इति सकलमानसावर्जकपद्यक्र
मः अनेनैवाशयेन वक्ष्यते वासुदेवः सर्वमिति ज्ञानेन यो वक्रजन्मो
पभोगजनितकर्मसमतासमनंतरसमुत्पन्नपरपाकिपातानुगृही
तान्तःकरणो सौ प्रतिपद्यते भगवत्तत्त्वं सर्वं वासुदेव इति स्वात्मसमहा
त्मा सचदुर्लभ इति एवंभूतं त्वां परमेश्वरं मयं जनः किमिति न जानाती
त्यत आह १३

किंबहुना सर्वमेवशुद्धादिविषयकं मदुत्पादितमेवेत्याह येचैवे-
ति येचभावाः भावःसत्तास्वभावाभिप्रायवेष्टात्मजन्मस्थितिको
पात् देहाशुद्धादिव्यापाराः सात्विकाः सत्वप्रधानाः सत्वेनयेथे
णनिर्हतावा तथायेच राजसारजःप्रधानारजसाश्रजोवदानवरके
णकामेननिर्हतावा तथायेचतामसास्तमः प्रधानास्तमसा-
मोहेननिर्हताश्चभवंति हेअर्जुन तान्सर्वान्मत्तएवपरमकार
णाज्जातान्विद्धिजानीहिकोर्थः मय्येवैते सर्वेशुद्धव्यापारविशेषा
त्मकास्त्रिविधाभावाशुद्धसमाधीभूताःस्पष्टाइति ननुभवतोपिचे
त्साधनापेक्षाकार्यसिद्धिस्तर्हीदृशंस्वातंत्र्यंतवेत्याशंक्याह न
त्विति तथाह्येवधारणेतेष्वित्यनेनान्वेतितच्छब्देनवध्नन्त्यादयः
परामृश्यंते तथाचायमर्थः यद्यपिसाध्यसिद्धिःसाधनैरेवभ-
वति तथापितेषुसाधनेषुसत्स्वेवाहंनप्रवृत्तोभवामीतिशेषः
किंतुविनापिसाधनंसाध्यंसाधयामीतिभावः तेचभावाःसाधन
रूपामयिस्वतंत्रेकर्तरिसत्येवप्रवृत्ताभवंतीतिशेषः मदंशानु
स्यूताःसंतस्तेस्वकार्यंसाधयितुंप्रभवंतीतिभावः अत्रसत्त्वरूप
कर्तृमात्रोपलक्षकः तथाच यःकश्चिच्छुद्धाधिकारीससाधनेस
त्वेनरमस्तेवाप्रवर्तेत नियमेनसाधयेत नचेत्स्यात्तडघटत्वाद्बाहु
देवविष्णुंप्रतियावेदितिभावः १२॥

मधुभाष्य

60

भाषाअनुवाद

और जो सात्विक भाव अर्थात् शम दम आदि और राज स भाव कहे हर्ष गर्व आदि औ तामस भाव जो शोक मोहादि ये सब प्राणी मात्र को स्वकर्म वशाते जन्मेहै सो मेरे से उत्पन्न जानो तिस हेतु वे मेरी माया की तीन गुणो के कार्य है किंतु मै भी उन मे हम वर्तते नही अर्थात् जीव के समान इन गुणों के अधीन होते नही वलु ये गुण मेरी अधीन होय मेरे मे रहते है सोई कहा कि वे मेरेमे है और मै उनमे नही यह हो जैसी संसारी मेरी अधीनहै यह जानो १२ ॥

दोहा

सात्विक राजस तामस भावहिं मोसें होय जानहु तिनमें मो
हु नहि मोमे वर्ते सोय १२॥

61

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् मोहितं नाभिजानाति मामेभ्यः परमव्ययं १३ ॥

शांकरभाष्यं

एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्ररोहकारणं मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवान् तच्च किंनिमित्तं जगतोऽज्ञानमित्युच्यते त्रिभिरिति त्रिभिर्गुणमयैर्भावैर्गुणविकारैः रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः सर्वमिदं प्राणिजातं जगत् मोहितमविवेकतामापादितं सत् नाभिजानाति मामेभ्यो यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणं चाव्ययं व्ययरहितं जन्मादिसर्वभावविकारवर्जितमित्यर्थः १३ ॥

आनन्दगिरिकृतटीका

सतीश्वरस्य स्वातन्त्र्ये नित्यशुद्धत्वादौ च कुतो जगतस्तदात्मकस्य संसारित्वमित्याशंक्य तदज्ञानादित्याह एवंभूतमपीति यद्यप्ययं वो विक्रियस्त्वं कस्मात्त्वामात्मभूतं स्वयंप्रकाशं सर्वो जनस्तथा न जानातीति मत्वाशंकते तच्चेति श्लोकेनोत्तरमाह उच्यत इति एभ्यः परमिति प्रपंचकत्वमुच्यते अव्ययमिति सर्वविक्रियाराहित्यं १३

एवंभूतं त्वां परमेश्वरमयं ज[illegible]

स्वामिकृतटीका

नः किमिति न जानातीत्यत आह ॥

त्रिभिस्त्रिविधैरेभिः पूर्वोक्तैः कामलोभादिभिर्गुणविकारैर्भावैः स्वभावैर्मोहितमिदं जगत् अतो मां नाभिजानाति कथंभूतं एभ्यो भावेभ्यः परमेभिरसंस्पृष्टमेतेषां नियन्तारं अत एवाव्ययं निर्विकारमित्यर्थः १३ [illegible] ॥

पिशाचभाष्यटीका

त्रिभिर्गुणमयैः सत्त्वरजस्तमोमयैर्भावैः प्राणिभिरेभिः सर्वमिदं जगद्वर्तते ममामायया मोहितं नाभिजानाति मामेभ्यो गुणेभ्यः परं कारणत्वेनास्थितं अव्ययं १३ ॥

गी॰
टी॰
स॰

62

रामानुजभाष्यं

तदिदं चेतनात्मकं कृत्स्नं जगन्मदीयं मत्त एवोत्पद्यते मय्येव प्रलीयते म
य्येवावस्थितं मच्छरीरभूतं मदात्मकं चेत्यहमेव कार्यावस्थायां च सर्वश
रीरतया सर्वप्रकारोऽवस्थितः अतः कारणत्वेन शेषित्वेन च ज्ञानाद्यसंख्ये
यकल्याणगुणगणैश्चाहमेव सर्वैः प्रकारैः परतरः मत्तोऽन्यत्केनापि कल्या
णगुणेन परतरं न विद्यते एवंभूतं मामेभ्यः सात्त्विकराजसतामसेभ्यो
भावेभ्यः परं यदसाधारणैः कल्याणगुणैस्तत्तद्गुणाकारैरप्युत्कृ
ष्टतमव्ययं सदैकरूपमपि तैरेव गुणमयैर्हीनतरैः क्षणविध्वंसिभिः
पूर्वकर्मानुगुणदेहेन्द्रियभोग्यत्वेनावस्थितैः पदार्थैः मोहितं देवतिर्य
ङ्मनुष्यस्थावरात्मनावस्थितं त्रिजगदिदं नाभिजानाति १३ ॥

अभिनवगुप्तकृतटीका

एवं च तत्त्वमेवोपधारय यदहं वासुदेवीभूतः सर्वस्य प्रभवः प्रलयश्च सू
त्रे मणिगणा इव यथा तन्तुरनवछिद्यमानरूपोऽप्यनतिलीनतया स्थित ए
वमहं सर्वत्र अप्स्विति सर्वत्रास्वाद्यमाने योऽनुद्भिन्नमधुरादिविभागः सा
मान्यः सोऽहं एवं प्रकाशो मन्दत्वचण्डत्वादिरहितः विशेषाकारो यः
शब्द इति सर्वस्यैव शब्दस्य नभोगुणत्वादत्रावधारणे यः केवलगग
नगुणतया ध्वनिः संयोगविभागादिसामग्र्यन्तररहितोऽवहितहृदयै
र्ब्रह्मगुहागहनगामी योगिभिः संवेद्योऽनाहताख्यः सकलश्रुति
ग्रामानुगामी तद्भगवतस्तत्त्वं पौरुषं येन तेजसा पुरुषोऽहमिति सर्व
भौमं प्रतिपद्यते योऽधरायाः केवलधर्मतया गोपगुणः स्वस्वभावपुण्यः
पूतिकटादीनि तु भूतान्तरसंबन्धात् उक्तं च हाठं भूमिगुणाधिकाद्
गन्धाभिगुणोदयादिति जङ्गमस्थगुणोदार्यादित्यादि बीजमहत्त्वमा
दिकारणं कामरागविवर्जितं बलं सकलवस्तुधारणसमर्थं स्थैर्यं रूपं
इच्छासंविन्मात्ररूपा यस्याश्च रूपतादिभिर्धर्मरूपेण नास्ति विरोधः इच्छा
हि सर्वत्र भगवच्छक्तितयान्वयिनी न कैश्चिद्विरुध्यते धर्मैस्तु गोन्तकैर्द्वे
षपटादिभिर्भिद्यत इति तद्रूपात्मकतया शुद्धसंवित्स्वभावत्वात्तानितः
उक्तं च शिवोपनिषदि इच्छायामथवा ज्ञाने जाते चित्तं निवेशयेदिति
ज्ञात एव तत्वास्य प्रसर इत्यर्थः एवं व्याख्यानेन त्यक्तायं परस्परानपद्या

वि

नकं त्रिवर्गं तेवन्नेत्याशयेन व्याचष्टे नेनेसम्प्रदायक्रमम जानाना भगवद्
हस्यं च व्याचष्टे गुणान मस्कार्यापव सत्त्वादीनि मन्मयानि न त्वहं तन्मयः
अतएव च भगवन्मयः सर्वं भगवद्भावेन संवेदयते न तु नानाविधपदा
र्थविताननिष्ठो भगवत्तत्त्वं प्रतिपद्यत इति सकलमानसावज्ञैकपथक्र
मः अनेनैव चाशयेन वक्ष्यते वासुदेवः सर्वमिति ज्ञानेन यो वै जन
न्मोपभोगजनितकर्मसमतासमनंतरसमुत्पन्नपरिपाकिप्राप्तान्
गृहीतांतः करणो सौ प्रतिपद्यते भगवत्तत्त्वं सर्वं वासुदेव इति बुद्ध्या स
महात्मा स च दुर्लभ इति एवं हि बुध्यमानं प्रकृत सत्त्वादिभिर्गुणैर्मो
हितमिदं जगद्गुणातीतं वासुदेवतत्त्वं नोपलभते १३ कथं त्वल्लाभस्त
दिभाद्यातिश्च ना भगवतस्तत्त्वं न वजानात्योहं ॥

परमार्थप्रपाटीका

अथैतदेव प्रकटयन्नाह त्रिभिः इति ॥ एभिर्गुणैः सत्त्वरजस्तमोभिस्त्रिभि
र्भावैः प्रकृतेः स्वभावैः इदं सर्वं जगन्मोहितं भ्रांतत्वमापादितं एतेभ्यो मा
मेभ्यः गुणेभ्यः परं अधिकरणारूपं वाथरहितं नाभिजानाति प्रातिभा
सिकरजनार्थं धावमानः शुक्तिकां न वेत्तीत्यर्थः १३

वनमालीटीका

ननु यद्येवं गुणमयानां नियामकत्वात्त्वं गुणातीतस्तर्हि त्वां सर्वे जीवा
स्तथा जनेन न जानंतीत्यत आह त्रिभिरिति एभिस्त्रिभिर्गुणमयैः सात्वि
कराजसतामसैः कार्यकारणसंघातैर्मोहितं देहगेहादावहं ममे
ति वैचित्र्यं मयि सर्वेश्वरे जगदुत्पादिकर्तरि संदेहत्वेनान्यसाधारण
रूपैर्वैचित्र्यं वशापितमिदं जगत्प्राणिजातं मत्प्रसादभाजनमदेकप्रा
णेभिन्नमेभ्यस्त्रिभ्यः परं तद्व्यापकत्वनियामकत्वादिना तु कष्टमव्य
यं स्वरूपेनापर्मूर्तो देहनश्वविकारशून्यं सदेकाकारं मां जगदुदया
दिकर्तारं वासुदेवं नाभिजानाति किं तु प्राणात्मकब्रह्मादिदेहाहष्टां
न हष्टांनेन देहादित्वेन हेतुनाविसदेहादिरपि गुणमय इति मन्य
ते कदाचिन्महद्भ्यः श्रुत्वाप्यसंभावनाविपरीतभावनाग्रस्तत्वाद्गुण
प्रचयशून्यत्वाद्वाभितः सम्यग्यथास्वरूपमपरोक्षतो न जानातीति भा
वः १३

ज्ञात्रमैवेजयंतीटीका

गी॰
टी॰
स॰

एवंत्वस्य सर्वपरत्वे सर्वकारणत्वं च प्रतिपाद्येदानीं यदीदृशस्त्वमसि तर्हि त्व
त्पदवोम्यत्र प्रकृतिद्वयात्मकं जगत्त्वां कुतो न जानातीत्याशंकायां तदज्ञा
नेबीजमाह त्रिभिर्गुणमयैरिति मत्स्वत्वे मदधीनास्थितिप्रवृत्तिकं म
द्रूपकं मदात्मकं मच्छक्तिच द्वयात्मकं मदीयं सर्वं सकलं ब्रह्मादिस्था
वरान्तमिदं जगद्धि संत्रिभिस्त्रिविधैर्गुणमयैः सत्वरजस्तमः स्वरूपैरे
भिरुक्तप्रकारकैरतिनीचतरैः क्षणभङ्गुरैर्भावैः देहेन्द्रियादिभोगोप
करणरूपैः पदार्थैर्मोहितं सत्स्वरूपरक्षावशादिरूपाभिमानेनापग
तविवेकसत्त्वेन तद्भेदकत्रैगुणमयेभ्यो भावेभ्यः परं निरवधि
कातिशयचित्स्वातंत्र्यापरिमितैः कल्याणात्मकैः स्वाभाविकैः स्वासा
धारणैः स्वगुणगणैरुत्कृष्टतमं सात्विकादिपदार्थैः कर्मजैरविद्या
कार्यैरस्पृष्टमाहात्म्यं अव्ययं अप्रच्युतस्वरूपगुणपाधिकं मामतादे
वं सर्वनियंतारं सर्वस्वं सर्वकारणं सर्वपरं मां देवकीनंदनं त्वमातु
लेयं त्वत्सारथिं कृष्णं नाभिजानाति अपमीयष्टू इति सामान्येन जानात्य २०
पि अभिसमंताज्ज्ञविना नन्तैश्वर्यवत्वेन न जानाति प्रसन्नात् रूपतीत्यर्थः
१३ ॥

मधुसूदनीटीका

नत्वेवं परमेश्वरस्य सतत नित्य शुद्ध बुद्ध ... स्वभावत्वे सति कुतो जगतस्त्व...

कस्मात्संसारित्वमेवं विधम त्स्वरूपापरिज्ञानादिति चेत् तदेवकृतमित्याह ॥

एभिर्मायागुणैस्त्रिभिस्त्रिविधैर्गुणमयैः सत्वरजस्तमोगुणविकारैर्भावैः
सर्वैरपि भवनधर्मभिः सर्वमिदं जगत् प्राणिजातं मोहितं विवेकायो
ग्यत्वमापादितं सदेभ्यो गुणमयेभ्यो भावेभ्यः परमेषां कल्पनाधिष्ठा
नमत्यंतविलक्षणमव्ययं सर्वविक्रियाशून्यमप्रपंचमानंदघनमात्म
प्रकाशमव्यवहितमपि मां नाभिजानाति ततश्च स्वरूपपरिचयात्
संसरतीवेति अहो दौर्भाग्यमविवेकजनस्येत्यनुक्रोशं दर्शयति भग
वान् १३ [illegible]
[illegible]
[illegible]
[illegible] ॥ ॥

सदानंदीटीका

एवंभूतं न जानंति मां भगवंतं हि मां जनाः निर्गुणं गुणदाहार्थमित्याक्रो
शति माधवः । रागद्वेषप्रमादादिप्रकारैर्गुणजन्मभिः पदार्थैर्मोहितं

हस्तकृतं ५

63

सर्वं प्राणिमात्रमिदं किल १ एभ्यो गुणमयेभ्यो भावेभ्यः सर्वाधिष्ठानमीश्वरं समस्तविक्रियाशून्यं परं चातिविलक्षणं ३ आनंदघनमात्मानं स्वप्रका शमनिरंजनं न जानाति ततः स्वात्मानात्मा देवकुसंस्तवो ४ भ्रमत्यहो तद्दौर्भाग्यमविवेकिजनस्य च इत्याक्रोशेंऽनुकंपातिशयं दर्शयन्नाह मत्त्रये ५ ॥ १३

नीलकंठटीका

कथं तर्हि स्थूलं त्वत्प्रपंचं बाधेन जनता आत्मानं ना वगच्छंतीत्याशंक्याह त्रिभिरिति एभिः पूर्वोक्तैस्त्रिभिस्त्रिविधैर्भावैः प्रकारैः प्रवृत्तिनियमाद्यैर्गुणमयैः सत्त्वरजस्तमोगुणविकारैरिदं चराचरं प्राणिजातं न गच्छति वाच्यं मोहितं सत् एभ्यो गुणेभ्यः परं मां न जानाति यथा रज्ज्वां सर्पभ्रमेण व्याकुलः सर्पात्परां रज्जुं न जानाति तद्वत् परत्वे हेतुः अव्ययं यतो भावं परिणामित्वात् व्ययवंतः अहं तु न तद्विपरीतः साक्षीत्यन्वयः १३

आनंदटीका

न त्वेवं सर्वेषामेकस्मिन्परमकारणे त्वयि परमेश्वरे प्रसिद्धे सति लोकाः यत्र तत्र कारणांतरमेव जानाति न त्वां किंनिमित्तमत आह इत्याशंकां गर्भीकृत्य प्रतिपादयति ॥ सर्वमिदं जगत् देवादिमशकांतं जीवलोकः एभिरुद्दिष्टैः त्रिविधमाणैस्त्रिभिः सात्त्विकादिभिः गुणमयैर्भावैरन्योन्याभिभवजननहेतुभिः प्रीत्याप्रीत्यावरणात्मकैः मोहितं विपरीतज्ञानवशीकृतं सत् मामुक्तप्रकारलक्षणमीश्वरमेभ्यो गुणमयेभ्यो भावेभ्यः परमतीतं अतएवाव्ययं निर्विकारं च नाभिजानाति [illegible] सर्वकर्तृत्वेन न वेत्तीत्यर्थः १३

रामकंठटीका

नन्वेवं स्वशक्तिमात्रोपादानतया सर्वकर्ता परमेश्वर एक एवायमात्मा तत्कुतोऽयं जीवानां वस्तुविषयकं तत्त्वज्ञानं तिरोभवति चेत्पत्र वक्ष्यमाणं स्वमायाशक्तिवैभवं गर्भीकृत्योत्तरमाह ॥ सर्वं जगत्सकलो जीवलोक एभिः सात्त्विकादिभिः पूर्वं प्रतिपादितैर्गुणमयैः सुखदुःखमोहपर्यवसायप्रतिपादकैस्त्रिभिर्भावैः संवेद्यैः पदार्थैर्यथास्थितं स्वभावप्रत्यवमर्शाभावधायकतया मोहितं जनितान्यो न्याभिन्नदेहाद्यात्मप्रत्ययलक्षणाज्ञानतिमिरं सर्वभावेभ्यो वेद्यैकस्वरूपत्वादानेभ्यः परं व्यतिरिक्तस्वभावमत एवाव्ययमविषयमानयाप्रतिपादितस्वरूपमच्युतलक्षणमव्ययं मां परतत्त्वं न जानातीति प्रतिपद्यते [illegible]

गी:
टी:
स:

64

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् १३ ॥

लासिकी [illegible]टीका

एवंभूतं त्वां परमेश्वरमयं जनः किमिति न जानातीत्यत आह ॥ एभिः सात्त्विकादिभिस्त्रिभिर्गुणमयैः स्नेहद्वेषमोहादिपर्यवसायिवृत्तिभिर्गुणविकारैर्भावैर्भवनधर्मकैः सर्वैरेभिः पदार्थैरिदं जगत्सकलो जीवलोको मोहितं स्वस्वभावप्रत्यवमर्शाक्षमं (?) व्यवधायक तया देहाद्यात्माध्यासमापादितं सत् मामहंताप्रत्ययमीश्वरं प्रत्यगात्मानं च नाभिजानाति स्वात्मतया न प्रत्यवमृशति ननु सकलस्वभाववर्गस्य त्वमेव बीजभूतत्वात्समवायिकारणं तथापि तज्ज्ञानमेव त्वत्स्वरूपज्ञानमित्याशंक्याह एभ्यः परं सर्वेभ्यो भावेभ्यः परं व्यतिरिक्तं विलक्षणं अत इत्यत आह अव्ययं स्वस्वरूपप्रच्युतिलक्षणविकाररहितं वेद्योल्लासतोऽपि वेदकस्य स्वस्वभावभासमानत्वात् नन्वेवं स्यादे जाग्रदादिविभेदेऽपि तदभिन्नत्वप्रसर्पति निवर्तने निजानन्दस्वभावानुपलब्धिः तः १३ ॥

पंचोली टीका

एवंभूतं त्वां परमेश्वरं अयं जनः किमिति न जानातीत्यत्राह त्रिभिरिति इदं सर्वं जगत् गुणमयैः गुणविकारैः रागद्वेषादिप्रकारैः एवं त्रिभिर्भावैः मोहितं एभ्यो यथोक्तेभ्यः गुणेभ्यः परं श्रेष्ठं अव्ययं जन्मादिषड्भावरहितं मां नाभिजानाति १३

तत्त्वदीपिका टी

एभिः सात्त्विकादिभिस्त्रिभिर्गुणमयैः स्नेहद्वेषमोहादिपर्यवसायिवृत्तिभिर्गुणविकारैर्भावैर्भवनधर्मकैः सर्वैरेभिः पदार्थैरिदं जगत्सकलो जीवलोको मोहितं स्वस्वभावप्रत्यवमर्शाक्षमं व्यवधायक तया देहाद्यात्माध्यासमापादितं सत् मामहंताप्रत्ययमीश्वरं प्रत्यगात्मानं च नाभिजानाति स्वात्मतया न प्रत्यवमृशति ननु सकलस्वभाववर्गस्य त्वमेव बीजभूतत्वात्समवायिकारणं तथापि तज्ज्ञानमेव त्वत्स्वरूपज्ञानमित्याशंक्याह एभ्यः परं सर्वेभ्यो भावेभ्यः परं व्यतिरिक्तं विलक्षणं अत इत्यत आह अव्ययं स्वस्वरूपप्रच्युतिलक्षणविकाररहितं वेद्योल्लासतो

त्रिभिरिति एभिः पूर्वोक्तलक्षणैः सात्त्विकादिभिस्त्रिभिर्भावैर्बु-
द्ध्यादिव्यापारात्मिकाभिश्चेष्टाभिर्मोहितं मोहस्याविवेककारित्व
स्य व्याप्तं नीतं सत् इदं सर्वं जगत् जंगमवर्गो मां परमेश्वरमेभ्यो
भावेभ्यः सकाशात्परं दूरे वर्तमानं तथाव्ययं विनाशरहितं वि-
नाशाभावादेवोत्पत्तिरहितं च नाभिजानाति कीदृशैर्भावैः गुण-
मयैः सोऽयं द्रव्याश्रितेस्तत्त्वशौर्यसंख्यादिके गुण इति नामानु-
शासनाद्गुणाः शौर्यप्रचुरैर्युक्तैरिति यद्वा एभ्य इति कर्मणि षष्ठ्य-
र्थे चतुर्थी बाहुलकात् भगवद्भक्तत्वेन कृच्छ्रस्तत्त्वत्यवादस्य ग्र-
स्य तथा च एषां भावानां परं पिपर्ति रक्षयति पालयति चेति स्तु-
त्यत्वात्स्रष्टारं संस्थापयितारं चेत्यर्थः अव्ययमिति विशेषणेन च
स्वयं विनाशरहितत्वेनान्येषां संहर्तारमिति व्यज्यते तथा चाय-
मत्राभिप्रायः शौर्यातिशयदर्पान्धाः सात्त्विकादिकं शौर्यप्रचुरं
प्रयत्नमेव कार्यसिद्धिहेतुत्वेन समर्थयंतो मां परमेश्वरं नाद्रियंते
कर्मेश्वरः स्वयुध्यमान इति अत एव च तेषां साध्यसिद्धिः स्व-
युध्यमानेऽपि भवति यतो महत्प्राप्नमेव तत्तेषां शौर्यादिकं मदना-
दरेण निष्फलीभवतीति अत्र च भगवतोऽर्जुनं प्रति सापेक्षोपदे-
शोक्तिर्ध्वन्यते यथा एभिः समीपे प्रत्यक्षभूतैः गुणमयैः शौर्यादि-
गुणातिशयशालिभिस्त्रिभिस्त्रित्वसंख्यावच्छिन्नैर्भावैः भावो
विद्वानिति नामानुशासनाद्भवद्भिन्नैः स्वोचितव्यापारतत्त्वज्ञोऽभि-
धीयते तथा चाशौचित्याद्द्रुपदवधानिवृत्तेरित्यर्थः तैश्चाद्यैर्न भी-
ष्मद्रोणकर्णैः प्रतिपक्षीयसैन्याग्रणीभूतैरिदमस्मदीयं सर्वं ज-
गज्जंगमवर्गः सैन्यमिति यावत् सैन्यांतःपातित्वाद्भवानपि मो-
हितं किंकर्तव्यतायां विमूढं कृतं यद्वा भावशब्दश्चेष्टाभिधायक-

प्रवर्त्ततीयावत्करणेर्थैर्गुणमयैरिति काकाक्षिन्यायेनकर्त्तकर
णोभयविशेषणं तथाचगुणमयैः शौर्यादिगुणशालिभिरेभिः श्री
अक्षोणकर्णलक्षणैस्त्रिभिर्वीरैः कर्तृभिः गुणमयैर्भावैः शौर्य
महादिप्रचुरैः शस्त्रास्त्रमोक्षणात्मकैः कायकव्यापारैः करण
भूतैर्विध्वंसर्वमस्मदीयं सैन्यंमोहितं एतस्मोरुषामहिम्नतयाशो
कोल्लक्षणमोहवशतां प्रापितं एतद्दर्शनमात्रेणभवतांयासोज्ञा
नश्रुतितासर्यं अतएवैभ्योभीष्मादिभ्यः सकाशात्परमुत्कृष्टगु
णविशिष्टं मांनाभिजानातिनस्मरतिविस्मरतीतियावत् कीट
शोमां अव्ययंनिर्विकारं अयमत्राभिप्रायः दुर्योधनादीन्प्रति
ज्यमवृत्तांसंरक्षणार्थमेवमवदभिमुखमागतं किमन्यत् नि
यमपिमत्सारथ्यं स्वीकृतवांस्तं सर्वेभ्यश्च निर्विकारस्वतंत्रंसर्वज्ञ
प्रतिहतेच्छं मां उरुषोत्तमं विहायमैतेभ्यः कालानलपतितेभ्यो
त्सवलेभ्यो भीष्मादिभ्योभेषीः किंतुधैर्यमालंब्यमांचसर्वतः स
रक्षितारंचित्ताय युद्धायैवसज्जोभवेति १३॥

मधुभाष्य

त्रिभिरिति तादात्म्यार्थे मयट् तथोक्तं तादात्म्यार्थे विकारार्थे म
यट्विधीयेति नहिगुणकार्यभूतामायागुणमयीतिवक्ष्यति सि
द्धेवेकार्यस्यापितादात्म्ये तादात्म्यंकार्यधर्मादेः संयोगोभिन्न
वस्तूनामितिव्यासयोगे भावैः पदार्थैः सर्वैर्भावादप्यपरमाणुगु
णमया एतद्व्रतिदर्शयति एभिरिति ज्ञानिव्याहृत्यर्थमिदमिति
गुणमयदेहादिकंदृष्टुश्चरदेहोपितादृशइतिमायामोहितत्वाद्वत्य
र्थः जगद्दचव्यासयोगे गोपुत्राभ्रात्रादिदेहादीन् दृष्ट्वाविश्वोर
पीदृशः देहादिरितिमन्वानोमोहितोजोजनोभूपामिति एभ्योगु
णमयेभ्यः गुणेभ्यश्चपरामितिवक्ष्यमाणत्वात् केवलोनिर्गुण
श्चेत्यादिश्रुतिभ्यश्च गुणपवर्जितमितिवोक्तं कथमनादिकाले
मोहानन्त्ययोवहूनामित्यतआह १३॥

भाषाअनुवाद

जो कहो कि ऐसे परमेश्वरको किस कारण से लोग नहीं जानते है इस पर कहते है कि पूर्वोक्त यही तीनि प्रकार काम लोभ आदि गुण विकार स्वभाव वशते अविवेकता को प्राप्त प्राणी मोहित होय हमको नहीं जानते है और आपकैसे है इस अपेक्षा से कहते है कि हम ये तीन भाव से पर कहे संस्पर्श रहित और इन सब भावों के नियंता इसीसे अव्यय कहे निर्विकार मे हों १३ ॥

दोहा

गुणमय तीनों भावसें इनसें सब हि जगत मोहित मोहित
जानहे मे हों अव्यय चरत १३ ॥

66

दैवीह्येषागुणमयीमममायादुरत्यया मामेवयेप्र-
पद्यन्तेमायामेतांतरन्तिते १४ ॥

शंकरभाष्यं

कथं पुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायामतिक्रामन्तीत्युच्य
ते दैवीति दैवीदेवस्य ममेश्वरस्य विष्णोः स्वभावभूता हि यस्मात्
एषा यथोक्ता गुणमयी ममसायादुरत्यया दुःखेनात्ययोऽतिक्रम
णं यस्याः सादुरत्यया तत्रैवं सतिसर्वधर्मान् परित्यज्यमामेव मा
याविनं स्वात्मभूतं सर्वात्मना येप्रपद्यंते तेमायामेतां सर्वभूतचि-
त्तमोहिनीं तरंत्यतिक्रामन्ति संसारबंधनात् मुच्यंतइत्यर्थः १४

आनन्दगिरिकृतटीका

यथोक्तानादिसिद्धमायायाःदुःखपरिवर्जनायोगाज्जगतो नकदाचि
दपि तत्त्वबोधसमुदयसंभावनेत्याशंक्याह कथंपुनरिति भगवदेक
शरणतया तत्त्वज्ञानद्वारेणमायातिक्रमः संभवतीति परिहरति उ
च्यतइति कथंदुरत्ययत्वेनतदत्ययः स्यादित्यतआह मामेवेति प्र
धानस्येव स्वातन्त्र्यं मायायाश्चुदस्यति देवस्येति स्वातंत्र्यमाया-
त्वात्पर्यवसितं हिरण्यहेतोरितितां हेतूकरोति यस्मादिति अनुभवसिद्धा
सानाकस्मादपलापमर्हतीत्याह एवेति जगतस्तत्त्वप्रतिबंधकी
भूतागुणाः सत्त्वादयः ममेति प्रागुक्तमेव मायायाः संबन्धमनूद्य
विवक्षितं दुरत्ययत्वं विभजते दुःखेनेति मामेवेत्यादि व्याचष्टे
तत्रेति तस्मिन्मायारूपे यथोक्तरीत्या दुरत्ययेसतीतियावत् मामे
वेत्येवकारेण मायायाश्चेद्यकोटिनिवेशाभावो विवक्षिते सर्वात्मना
कर्मानुष्ठानादिव्यग्रतामंतरेणेत्यर्थः मायातिक्रमे मोहातिक्रमो
भवतीति मत्वा विशिनष्टि सर्वेति मायातत्प्रयुक्तमोहयोरतिक्रमेपि
कथंपुरुषस्य पुरुषार्थसिद्धिरित्याशंक्याह संसारेति १४ ॥

किंतर्हि त्वांजानंतीत्याह ॥

स्वामिकृतटीका

दैवीअलौकिकीअत्यद्भुतेत्यर्थः गुणमयीसत्त्वादिगुणविकारात्मिका
ममपरमेश्वरस्यशक्तिर्मायादुरत्यया दुस्तराहिप्रसिद्धमेतत् तथा

ये मामेवाव्यभिचारिणा भक्त्या प्रपद्यंते भजंति ते मायामेतां दुस्तरामपि
तरंति ते मां जानंतीति भावः [illegible]

पिशाचभाष्यटीका

दैवी हीति देवस्य ममेश्वरस्य विलासः स्वभावभूता दैवी अग्राह्यतादि यस्मा
देषा गुणात्मिका मम माया दुरत्यया दुस्तरा तस्मान्मामेव ये प्रपद्यंते शर॰
णं गच्छंति मायामेतां तरंति ते १४ ॥

रामानुजभाष्यटीका

कथं त्वनपायानवधिकातिशयानंदे नित्ये सदैकरूपे लौकिकवस्तुभो
ग्यताप्रकारैः स्थितात्कृष्टतमे त्वयि स्थितेऽनंतविहीने गुणमयेष्वस्थिरेषु
भावेषु सर्वस्य भोक्तृवर्गस्य भोग्यत्वबुद्धिरुपजायते इत्यत आह दैवी
ति मम एषा गुणमयी सत्त्वरजस्तमोमयी माया यस्माद्दैवी देवेन क्रीडाप्र
वृत्तेन मयैव निर्मिता तस्मात्सर्वैर्दुरत्यया दुरतिक्रमा अस्या मायाशब्द
वाच्यत्वम् असुरराक्षसास्त्रादीनामिव विचित्रकार्यकरत्वेन यथा च
ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम् आजगाम समाज्ञप्तं ज्वालामालि सु
दर्शनम् तेन मायासहस्रं तच्छंबरस्याशुगामिना बालस्य रक्षता
देहमेकैकश्येन सूदितमित्यादौ अतो मायाशब्दो न मिथ्यार्थवाची ऐं
द्रजालिकादिष्वपि केनचिन्मंत्रौषधादिना मिथ्यार्थविषयायाः परमा
र्थिक्या बुद्धेरुत्पादकत्वेन मायावीति प्राहुः प्रयोगः तथा मंत्रौषधा
दिभेदेन मायाशब्दप्रयोगश्च न तु तस्यैव ग्राह्यार्थत्वात् तत्र मिथ्यार्थेषु मा
याशब्दो मायाकार्यबुद्धिविषयत्वेनौपचारिकः मंचाः क्रोशंतीतिवत्
एषा गुणमयी पारमार्थिकी भगवन्मायैव मायां तु प्रकृतिं विद्यान्मायि
नं तु महेश्वरमित्यादिकमभिधीयते अस्याः कार्यं भगवत्स्वरूपतिरोधा
नं स्वस्वरूपे भोग्यत्वबुद्धिश्च अतो भगवन्मायामोहितं सर्वं जगद्भगवंतम
नवधिकातिशयानंदरूपं नाभिजानाति मायाविमोचनोपायमाह
मामेवेति मामेव सत्यसंकल्पं परमकारुणिकमनालोचितविशेषा॰
लोकशरण्यं ये शरणं प्रपद्यंते ते एतां गुणमयीं मायां तरंति मायामु॰
त्सृज्य मामेवोपासते इत्यर्थः १४ ॥

अभिनवगुप्ताचार्यटीका

कथं खल्वसत्त्वादिमात्रावस्थिता भगवतस्तत्त्वं न विदुरित्याह दैवीति

देवः क्रीडाकरस्तत्रभवा दैवी क्रीडामयमित्यर्थः तेन सत्वादीनां वस्तु
तः संविन्मात्रपरब्रह्मानतिरिक्ततायामपि यत्तदतिरिक्तभावगमनं
तद्देवगुणत्वं भोक्तृत्वपारतंत्र्यभोग्यत्वं तत्तद्भेदात्मकं रूपं संसारिभि
रनिर्वाच्यतयातात्त्विमायारूपमतो ये परमार्थब्रह्मप्रकाशाविदस्ते
नेदं तन्निरिक्तं विश्वप्रपंचं ते गुणानां सत्वादीनां गुणानां लक्षणाभेदा
वभासस्वभावां मायामतितरंतीति मामेवेत्येवकारस्याशयः येप
याश्रितं भेदावभासमात्रं विद्युल्लेमायां नातिवर्त्तंते तद्गुणसंगेन
तद्वहेनोषिति ॥ १४ ॥ परमार्थप्रपाटीका
कथं पुनर्मायामतितरंतीत्याह दैवीमिति यथा नानाविधजगदुत्पा
दनकारणत्वेन प्रतीयमाना अतएव गुणमयी दैवी अलौकिकसामर्
थ्यवतीयतो मम मायामदाश्रयवर्त्तिनी मदधीनत्वादस्येषां दुरत्यया
दुःखेनापि नाशयितुमशक्या तर्हि मोक्षोपायप्रयासो व्यर्थः स्यादि
त्याह मामेवेति ये मामेवेश्वरं नान्यं प्रपद्यंते शरणं व्रजंति तएवैतां
मदुक्तलक्षणां मायां तरंति नान्ये मदनुग्रहेण मत्साक्षात्कारे स्वत एव
तरंतीत्यर्थः अत्र दैवी मम मायेत्यत्र तैत्तिरीयकश्रुतिः दैवीमहंति
श्रुतिं वदमानः पितेव पुत्रं दर्शयेव वचोभिरिति भाष्यं निर्ऋतिरादसी
मायां दैवीं सामर्थ्यवतीं अहं वदमानः पुरस्कुर्वाणः अनंतरं वचोभिः
पतिविहिभागैः दूसयेदासत्वेन नियोजयामि किंवत् पितापुत्रमि
वस्वाज्ञावशवर्त्तिनीं करोमीत्यर्थः अन्यं तरमपि तमस्तेनेति स्तेन
विश्वरूपेऽयस्मयं विहृत वयमेतं पमतं तं यस्यास्संविदानो नमेनाक
मधिरोहयेम भाष्यं भोतिश्चेनेत्यत्र मायिविश्वमेवरूपं यस्याः सा
तथाविधेन स्तेनस्तेन तस्मै नमः किमर्थमयमुपक्रमइत्याह यतेनया
कृतं अयस्मयं लोहमयं इभेयं वं पं विहृत विचाल यहरीकुरु यतस्तं
त्वयमा नवयमे नयमपानियस्यास्संयमवताशुहृषेणानियंत्रणाक्या
तथा संविदाना ज्ञातेणाक्यासि तदर्थं तु प्रार्थ्यसे किंतदिमं संयमरहि
तं जनं उत्तमे नाकं सत्यलोकं अधिरोहयमापयेत्यर्थः अथ तत्रस्येयेन्व
ब्रह्मकृष्णाद्वीयाम्कृतिः चतुःकपर्दायुवतिः सुपेशाघृतप्रतीकाव
युनानि वस्ते तस्यां सुपर्णावृषणा निषेदतुर्यत्र देवादधिरे भागधेयं

एकः सुपर्णः समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे तं पाकेन मनसा
पश्यमंतितस्तं माता रेळ्हि स उ रेळ्हि मातरं । रावणभाष्ये चत्वारः कपर्दा उ
त्कर्षा यस्याः सा चतुःकपर्दा एवैषा युवतिर्नाम माया अथ तानेवोत्कर्षानां
ह युवतिरित्यादि युवतिः सदा तरुणी कदापि वार्द्धकं न प्राप्नोति अ
यमेक उत्कर्षः तथा सुपेशा स्वतरां पेशा पेशला अतिपेशला अघटनघटना
पटीयसी तदुक्तं यथा स्वप्नमरीचैनेत्यात्मैवं तस्य रणात्र भ्रमः तथा मायावि
लासोयं नायं नेनाऽत्तिभ्रम इति अविद्या च तया विद्युज्जीव ईश्वर एव
च तत्कृतौ बंधमोक्षौ च षडस्माकमनादय इति अयं द्वितीय उत्कर्षः
तथा घृतप्रतीका घृतवत्स्निग्धप्रतीकमुपक्रमो यस्याः सा परिणामे वि
षोपमेत्यर्थः अयमेव तृतीय उत्कर्षः तथा वयुनानीति वयुनानि ज्ञा
नानि वस्ते आच्छादयति तद्विपरीतस्वभावत्वात् नहि चतुरुत्कर्षवती
मायैवास्ति कथमीश्वरप्रसिद्धिरित्याह तस्यामिति तस्यामुक्तलक्षणा
यां मायायां सुपर्णा सुपर्णौ शोभनपतनौ जीवेश्वरौ पक्षिणाविव द्व
षणौ सदसत्फलवर्षितारौ द्विवचनस्यावाकेंदसीत्यत्वं निषेदतु
र्निषण्णौ स्थितौ कुतो ज्ञातमेतदत आह यत्रेति यत्र त्वं भागधेयं ब्रह्म
कारणसामर्थ्यं द्योतयंत्यर्थात् प्रकाशयंतीति देवा ईश्वरा यादधिरेष्ठ
नवंतः अनेन ज्ञानतिरोधानकर्त्री मायायाः सकाशादीश्वरस्य
वैलक्षण्यं प्रद्योतितं अथ सुपर्णाविति द्विवचनेनेश्वरस्यैव द्वैविध्यमा
पन्नं तत्परिहरति एक इति वस्तुतः सुपर्ण एक एव स समुद्रं आविश्य
वा समंदयति निरोधयते एवंविधं प्रपंचं आविवेश तत्सृष्ट्वा प्राविश
दिति श्रुतेः स इदं भुवनं स्थूलप्रपंचरूपं विचष्टे ज्ञातवान् तं पाकेन
परिपक्वेन तन्हृद्रूपेण मनसा अंतितः अभ्यंतरतः यावत्पश्यं अस्मा
दं तावत्तं सुपर्णं माता माया रेळ्हि लिहास्वादे विसर्गे वि विसृजतीत्य
र्थः तथाऽयमेनं निश्चितं सुपर्णः मातरं विसृजति द्विवचनं तत्तादात्म्य
विषयकं अत एवाग्रतो वदति सुपर्णं विप्राः कवयो वचोभिरेकं संतं
बहुधा कल्पयंतीत्यादि अयमाभेवरि प्रपद्यंते इत्येतस्मिन्नर्थे तैत्ति
रीयकसंहितास्वपि यत्ते देवी निर्ऋतिराबबंध दाम ग्रीवास्वविचर्त्यं इदं
तेन हृद्याभ्यां प्रयोजनमध्यात्मजीवः पितमद्विप्रमत्तः प्रसूति भाष्यं भो

परमेश्वरस्तेदेवस्तेनस्त्रीत्वेनाभिमतापिनिश्चयपत्नीत्वाभावेनामिति निश्चितेः
उत्कर्षवत्त्वानिवृत्तिः एतस्मीमायायावास्तमदेदामवंधनरज्ज्वा
समंताद्वंधनंजीवानांबंधनंकृतवतीतत्तेश्वनित्वपाकृत्वाद्दिघ्यामि
तुलैमिनाशायामीत्यर्थः अथतस्याद्रत्ययत्वमाह किंभूतंदाम आ
गुणोमयत्वाज्जीवनाशरूपेण अविचर्त्यं विचरणशीलं विचर्त्यं नयावि
यं न भवति अविचाल्यमित्यर्थः अथवंधन नाशनेनतरंसितुमशे
नात्मनयितमज्जीवः अनादिविषयासक्तोजीवः अमुक्तोभवतिमत्क्तद
एांप्राप्नोति नकरोतिनिश्चयार्थः एवमेश्वराणुसंधानेनमायाभिभवेमो
होपायःस्तकरएवेत्यर्थः १४॥

वनमालीटीका

नन्वनादिसिद्धत्रिगुणमयमायावद्धानांजीवानांस्वातंत्र्याभावेनतन्ना
शस्त्यागसामर्थ्याभावेकदापिमुक्तिर्नस्यादित्यतआह दैवीति देव
स्यैषादैवीदेवोजगदुदयादिक्रीडायुक्तः लीलैवविहारोजेतुमगस्तजे॰ ज॰
नादिकं लोकवल्लीलाकैवल्यमितिन्यायात् गुणमयीसत्वादिगुण
प्रचुराममदधीनाअतएवदुरत्ययामहास्वामिकत्वात् नहिकस्या
पिसंसारारज्जुहारोतस्यात्त्राहमामिति मांमायास्वामिनंशरणागतव
त्सलम् परमकारुणिकंसर्वेश्वरंकर्तुं॰मन्यथाकर्तुंसमर्थमनंतमेदं मकर्तुं॰
र्यमनंतनसद्गुणालयमभिनवजलदशोभाहरणवर्णपरमानंदघन
मूर्तिमहाभीष्टदंसकलचिंतितपदार्थविंदवैरिंचप्रपंचवैभवमनवर
तमेवचिंतयंतोयेमांप्रपद्यंतेभागवानेवास्माकंसर्वस्वमितिधिया
मदेकशरणंगतास्तेममहानंदसमुद्रमग्नमनस्त्वेनतुमत्समा
याशुणविकारैरनभिभूतचित्तामत्प्रसादान्मायांतरंति महि
लासविनोदकलापेनेमज्जन्मूलनसमर्थाइतिशंकमानेवमायाते
भ्योपसरतिवारविलासिनीवकोपनेभ्यस्तस्मान्मायातरणार्थंमामी
शंसततंचिंतयेदितिभावः ननुमायातरणंतत्त्वज्ञानवद्धानेनतद्गत
दत्तानेयेषांनाशितमात्मतत्त्वसारास्तत्वज्ञालोहितशुक्लक
ष्णांवस्त्रीप्रजाः सृजंतीमितिश्रुतसिद्धायाः अहोनेनसंभवतिगोरना
शंतवतीत्याहिश्रुत्यातस्याउत्पत्तिनाशयोर्निरासादितिचेन् मायाया

गी॰
टी॰
स॰

69

हेनहिप्रवाहानादिकर्मरूपाविद्यैवविवर्त्तित्वात् ईश्वरोपिहितेनमाययापदवा
च्यत्रिगुणात्मकप्रकृतिकार्यदेहेंद्रियादौजीवस्यप्रवाहेहंममेत्यभिमानः
स्तेनत्रिविधानिकर्माणितनतेस्तत्फलभोगायत्रिविधदेहाइत्येवंजीवस्याना
दिसंसृतिःनिकामकामराधितेनप्रसादलब्धनिर्वेदादेःगुरुवस्यतदेक
शरणागतिरूपाभक्तिलतानंतगुणालयस्यसर्वोत्तमर्यादेहयरोहोहं
तेनोमत्प्रसादस्ततःस्वपरमानंदस्वरूपाच्छादकाविद्यातिरूह्यास्वस्व
रूपानंदाविर्भावरूपामुक्तिः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइ
तिश्रुत्याः ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेर्जुनेति स्वयंकर्मरू
पाविद्यार्थस्वेश्वरज्ञानेतत्त्वदर्शिनेनब्रह्महत्यायाः समायायवना
शोक्तेः त्रिगुणमायाकार्यत्वात्त्रिगुणमायामायित्वाच्चुक्तिरितितत्वं १४

ॐसमैवैजयंतीटीका

ननुनवमायामिथ्यासत्यावामिथ्यात्वेनतत्कार्याणांभावानामपिमिथ्या
त्वप्रसंगात्तैर्मिथ्याभूतैर्भावैर्जगतोमोहकत्वंनस्यान्मोहाभावेतस्यतत्वज्ञा
नंस्यादेवभावैर्मोहितंनाम्नमेनाभिजानातीत्युक्तिःकथंघटतेसत्यात्वे
तत्कार्याणामपिसत्यत्वात्तैर्मोहितस्यज्ञानेनतज्ज्ञानाभावान्मो
क्षाभावस्यादित्याशंक्यस्वमायायाःसत्यत्वंप्रतिपादयंस्तस्यास्तरणोपाय
माहदैवीतिममदेवस्येश्वरस्यसत्यसंकल्पस्यसत्यशक्तेःगुरुहोत्तमस्ये
षाकार्याकारेणदृश्यमानादैवीदेवेनक्रीडाप्रवृत्तेनसत्यकामेनम
यास्वक्रीडार्थंप्रकटीकृतात्वात्सूक्ष्मकार्याकर्तृगुणमयीसत्वादिगु
णत्रयात्मिकादुरत्ययामदन्यदेवैस्तद्भक्तैस्त्राधिकृतःविनमहत्त्व
हेनाप्युल्लंधितुमशक्यामायाप्रकृतिःसंदृपाभवति हिपाद्मस्यापुम
थःस्तास्वरणंपर्वपक्षणादसपिशाचादीनांमायैवेयंमदीयामायात्मि
थ्यातंत्रवादीयतोस्यामिथ्यात्वेलक्षणप्रमाणाभावात्तथाहिकिंनाव
न्मिथ्यात्वस्यलक्षणंसत्वानधिकरणत्वंमिथ्यात्वमितिचेन्नर्निर्द्धर्म
केब्रह्मणितिप्रसंगात् नचनिर्द्धर्मकोदेवनस्यसत्यानधिकरणत्वमि
तिवाच्यं निर्द्धर्मकत्वस्यहेतोःसत्यानधिकरणत्वसाध्येचभावेभावा
भावमितिनिरतद्याप्टहेनाभावरूपधर्मविशेषव्याप्यत्वयोगात् अन्यथा

ःसत्त्वानधिकरणत्वस्यापि तत्राभावेन तस्याहृत्यर्थमनिर्वाच्यलक्षणेः सत्त्वा
नधिकरणत्वरूपविशेषणायोगात् ननु प्रमित्यविषयत्वं मिथ्यात्वं निर्विशे
षः प्रमेये ब्रह्मण्यतिव्याप्तेः न च तस्य वेदान्तजन्यवृत्तिव्याप्यत्वान्नोक्तदो
षइति वाच्यम् शुक्तिरूप्यादेरपि व्यवसायद्वाराः नुव्यवसायं प्रतिसा
क्षाद्बाधकज्ञाने साक्षाद्व्याप्यत्वं प्रतिनिषिध्यमानत्वे विषयत्वात् सत्त्व
शा २ ति प्रकारकप्रमांप्रतिसाक्षाद्विषयत्वमिति चेदावश्यकत्वात् सत्त्वाभाव
एव मिथ्यात्वं स्यात् सिद्धान्ते चापसिद्धान्तापत्तेः नापि भ्रान्तिज्ञानविष
यत्वं ब्रह्मणोप्यधिष्ठानत्वेन तद्विषयत्वात् नापि भ्रान्तिमात्रविषयत्वं
तत्त्वं तस्योक्तरीत्या शुक्तिरूप्यादावप्यभावात् अथ यत्तत्तया भ्रान्तिविष
यत्वमिति चेन्न विशेषणवैयर्थ्यात् विशेषणमात्रस्यातिव्याप्यमानमि
थ्यात्वानतिरेकात् नापि बाधकज्ञानविषयत्वं ब्रह्मण्यतिव्याप्तेः ना
पिज्ञाननिवर्त्यत्वं तत्त्वमिति वाच्यं उत्तरज्ञाननिवर्त्यपूर्वज्ञानादावित
प २ सत्त्वेनाप्युपपत्तेः नापिस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं
अव्याप्यवृत्तिसंयोगादावतिव्याप्तेः नाप्यविद्यानत्वकार्ययोरेकतरत्वं
अनादिरूपजीवब्रह्मविभागादावतिव्याप्तेः तस्माल्लक्षणासिद्ध्या
सत्त्वं लक्ष्यासिद्धिः किंच नापि मिथ्यात्वे किंचित्प्रमाणमस्ति न त
तावत्प्रत्यक्षं वर्तमानमात्रग्राहिणस्तस्य त्रैकालिकबाध्यत्वग्राह
कत्वायोगात् अतीन्द्रियत्वाच्च नाप्यनुमानं तस्य प्रत्यक्षमूलकत्वा
त् नाप्यागमः अप्रसिद्धत्वात् नन्वेकमेवाद्वितीयमिति श्रुतिरेवा
द्वितीयमात्रं निषेधन्ती तस्य मिथ्यात्वे प्रमाणमिति चेन्न अद्वितीया
दिश्रुतेः साम्यातिशयनिषेधपरत्वेनाकरे हैव विस्तरेण व्याख्यातत्वा
द्दैवीपरमतेरन्यलङ्कृतर्कवादैस्तस्मान्मममाया सत्यरूपैवेति भगव
दाशयः ननु यद्येवं विधानवमायाभवेन्नहि केनोपायेन तस्या निवृ
त्तिंस्यादित्यपेक्षायामनन्यप्रापैवतानैरनेकैरुपायैरित्याह मामेवेति
एवकारस्य कर्तृकर्मत्रियाभिः सह संबंधः येन सत्त्वप्रदायाचार्यदेवादि
नत्त्वव्याभक्तिज्ञानविरागात्यन्तसर्वपरिग्रहानिष्ठामाएव जनास्सर्वे
श्वरं सर्वकारणं सर्वपरं सर्वदेववन्द्यं सर्ववेदवेद्यपुण्ययोनिं सकल
लोकहितावतारमनन्ताचिन्त्यगुणगणाढ्यं श्रीकृष्णोत्तमं मामेव प्रपद्य

गी॰ टी॰ स॰

10

तेषां रणांगक्षेत्येवतेयपवपत्तांसत्स्वरूपामपि अपारपारावारमिव दुरत्ययाम
पि अस्तरामपि तरंति पारं गच्छंतीति प्रपद्यंते इत्यनेन सर्वेषां ब्राह्मणादिश्वपचां
तानामपि भगवत्प्रपत्तावधिकारित्वमिति सूचितं सर्वेषामपि लोकानामधि
ष्ठानमाताच माधवः गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभा इति मार्कंडे
योक्तेः मामेवेत्यनेन भवविविधरुद्रादीनां देवानां प्रपत्त्या मदीयां वैष्ण
वीं मायां न तरंतीति सूचितम् भक्तिप्रदानां सर्वेषां विष्णुरेव न संशयइ
ति घंटाकर्णं प्रति शिववचनात् प्रपद्यंत एवेत्यनेन सर्वसाधनेभ्यो
भगवत्प्रपत्तेर्मुख्यत्वमिति च सूचितं सर्वधर्मान्परित्यज्य मामेकं शरणं
व्रजेति श्रीमुखोक्तेः न च तत्स्वरूपायाः निवृत्तिर्न संभवतीति वाच्यं ज
लेन सत्यस्यैव ब्रह्महत्यादिपापस्य राजानुग्रहेण सत्यस्यैव चौरनिग
डादेश्च निवृत्तिदर्शनात् अतः सत्यरूपाया एव निवृत्तिसंभवति न त
मिथ्यायाः वन्ध्यापुत्रादेः भूयश्चान्ते विश्वमायानिवृत्तिरिति श्रुतिरपि
निवृत्तिं वदतीत्यनयैव ...दिशा अनृतमप्यस्या निरस्तमित्यलम् १४

यथोक्तानादिसिद्धमायागुणत्रयबद्धस्य जगतः स्वातंत्र्याभावेन तत्परिवर्जनासामर्थ्यान्न कदाचिदपि मा
यातिक्रमः स्यात् वस्तुविवेकासामर्थ्यहेतोः सदा **मधुसूदनीटीका** तन्नत्यादित्याशंक्य भगवदेकशरण
तयातु तत्त्वज्ञानद्वारेण मायातिक्रमः
संभवतीत्याह ॥ दैवी एको देवः सर्वभूतेषु गूढ इत्यादिश्रुतिप्रतिपादितः स्वद्योतनत
वति देवस्तस्यैका चेन स्वात्मानंदनिर्विभागेन तया न हि षयतया च क ॰तदाश्रय
॰य ल्पिताश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवलेत्युक्तेः
पक्षासाहिमत्यदत्वेनापर्लयानहीहिषाद्यात् भ्रमोपादानत्वाप
र्थात्रिसिद्धा च गुणमयी सत्वादिगुणत्रयात्मिका त्रिगुणरज्जुवत्ति ॰रि
दृढत्वेन बंधनहेतुः मम मायाविनः परमेश्वरस्य सर्वजगत्कारण
स्य सर्वज्ञस्य सर्वशक्तेः स्वभूता स्वाधीनत्वेन जगत्सृष्ट्यादिनिर्वाहिका
माया तत्त्वप्रतिभासप्रतिबंधेनातत्त्वप्रतिभासहेतुरावरणविक्षेपश ॰त
क्तिद्वयवत्यविद्या सर्वप्रपंचप्रकृतिः मायां तु प्रकृतिं विद्यान्मायिनं
तु महेश्वरमिति श्रुतेः अत्रैवं प्रक्रिया जीवेश्वरजगद्विभागशून्ये शु
द्धचैतन्ये अध्यस्ताऽनादिरविद्या सत्वप्रधान्येन स्वच्छादर्पण इव मुखाभासं
चिदाभासमादत्ते तत्र बिंबस्थानीयः परमेश्वर उपाधिदोषा
नास्कंदितः प्रतिबिंबस्थानीयश्च जीव उपाधिदोषास्कंदितः ईश्वराच्च

जीवभोगायाकाशादिक्रमेणशरीरेंद्रियसंघातः तद्भोगस्थश्चात्तत्त्वः
प्रपंचोजायतेइति कल्पनाभवति बिंबप्रतिबिंबस्थानुगतत्त्वरूप
[illegible]चैतन्यंजीवानुगतंमायोपाधिचैतन्यंसाक्षीतिकथ्यते तेनैव
स्वाध्यस्तमायातत्कार्यंचप्रकाशते अतःसाक्ष्यभिप्राये
णैदैवेति बिंबस्वरूपाभिप्रायेणतत्त्वमसीतिभगवतोक्तं यद्यप्यविद्यायाप् ना
कल्पितत्वात् प्रतिबिंबःएकएवजीवः तथाप्यविद्यागतानामंतः करण
संस्काराणांभिन्नत्वात्तद्भेदेनांतः करणोपाधेस्तस्यात्रभेदव्यपदेशः
मामेवयेप्रपद्यंतेतदुद्धृतेनामूढाः प्रपद्यंतेचतद्विद्याभजंतेमामि
त्यादिश्रुतौ यंतथायोदेवानांप्रत्यबुध्यतसएवतदभवत् तथार्षी
णांतथामनुष्याणामित्यादि अंतःकरणोपाधिभेदापर्यालोचनेन न
त्वादेक जीवत्वप्रयोजकोपाधेरेकत्वेनैवात्रव्यपदेशः देहत्वंचापिमांवि
भारत द्धिसर्वक्षेत्रेषु प्रकृतिंपुरुषंचैवविद्धनादीउभावपि ममैवांशो
जीवलोकेजीवभूतःसनातनइत्यादिश्रुतौचब्रह्मवाइदमग्रआसी भ
त् तदात्मानमेवावेदहंब्रह्मास्मीति तस्मात्तत्सर्वमभवत् एको
त्मना देवःसर्वभूतेषुगूढः अनेनजीवेनात्मनानुप्रविश्य बालाग्रशतभाग
स्यशतधाकल्पितस्यचभागोजीवः सविज्ञेयः सचानंत्यायकल्प
तइत्यादि यद्यपिदर्पणगतःचैत्रप्रतिबिंबः स्वपरंचनजानात्यचे
तनांशस्यैवतत्रप्रतिबिंबितत्वात् तथापिचित्प्रतिबिंबश्चित्त्वादेव
ना स्वपरंचजानातिप्रतिबिंबपक्षेबिंबचैतन्यस्यैवोपाधिस्थितत्वमात्रस्यक
ल्पितत्वात् आभासपक्षेतस्यानिर्वचनीयत्वेपिजडविलक्षणत्वात्
सचयावत्स्वविवेकमात्मनोनजानाति तावज्जलसूर्यइवतल
गतकंपादिकमुपाधिगतंविकारसहस्रमनुभवति तदेतदाहुः
स्यायेतिबिंबभूतेश्वरैक्यसंस्कारसंततेरेण अन्येतेनरितमणको
तिरुल्पया अतएवजीवोंतः करणावच्छिन्नत्वंसर्वमेवानादिज्ञा ना
नाभासयन्किंचिज्ज्ञोभवति नतस्यज्ञानामिकर्णमिभूतेषेत्यनर्थो
णतत्रजातंतंभवति सचोहंबिंबभूतंभगवंतंमनननिष्कामायानियता
रंसर्वविदंसर्वफलदातारमानिष्ठमनंदघनमूर्तिमनेकानवता
रानभक्तानुग्रहायविधत्तमाराधयतिपरमगुरुमेवाशेषकर्मसमर्प

प्रति

गी॰
टी॰
स॰

णेन तदा विंवसमर्पितस्य प्रतिविंवे फलनात्सर्वानपि पुरुषार्थानासादय
ति यत्तदेवाभिप्रेत्य प्रह्लादेनोक्तं नैवात्मना प्रभुरयं निजलाभपूर्णो मानं
जनादविदुषः करुणो वृणीते यद्यज्जनो भगवते विदधीत मानं तच्चात्म
ने प्रतिमुखस्य यथा मुखश्रीरिति दर्पणप्रतिविंवितस्य मुखस्य तिलका
र दिश्रीर्यद्यपि विनाचाद्विंवभूते मुखे समर्पणीया स्वयमेव तत्र प्रतिफलति
नान्यः कश्चित्तत्प्राप्त्यावुपायोस्ति यथा तथा विंवभूतेश्वरे समर्पितमेव
तत् प्रतिविंवभूतो जीवो लभते नान्यः कश्चित्तस्य पुरुषार्थलाभे उपा
योस्तीति दृष्टांतार्थः तस्य यदा भगवंतमनंतमनवरतमाराधयतोंतः
करणं ज्ञानप्रतिवंधकपापेन रहितं ज्ञानानुकूलपुण्येन चोपचितं
ति भवति तदा निर्मले मुकुरमंडल इव मुखमतिस्वच्छेंतःकरणे सर्वक
र्मत्यागशमदमादिपूर्वकगुरूपसदन वेदांतवाक्यश्रवणमनननि
दिध्यासनैः संस्कृते तत्त्वमसीति गुरूपदिष्टवेदांतवाक्यकरणिकाहं
ब्रह्मास्मीत्यनात्माकारशून्या निरुपाधिचैतन्याकारा साक्षात्मिका कारा
वृत्तिरुदेति तस्यां च प्रतिफलितं चैतन्यं स्वयं एव स्वविषयाश्रयामवि
द्यामुन्मूलयति दीप इव तमः ततस्तस्या नाशात् तया हृत्या सहाऽ
खिलस्य कार्यप्रपंचस्य नाशः उपादाननाशादुपादेयनाश इति सर्व
तंत्रसिद्धांतसिद्धत्वात् तदेतदाह भगवान् मामेव ये प्रपद्यंते मायामे
तां तरंति ते आत्मेत्येवोपासीत तदात्मानमेवावेत् तमेव धीरो विज्ञा
य तमेव विदित्वातिमृत्युमेतीत्यादिश्रुतिभिश्च विहायापि मामेवैस्यैवका
रोऽस्मात्तु परज्ञात्वा प्रतिपद्यार्थः मामेव सर्वोपाधिरहितं चिदानंदसदा
ये त्मानमखंडं प्रपद्यंते वेदांतवाक्यजन्यया निर्विकल्पकसाक्षात्कार
रूपया निर्विचनानहं ब्रह्मविदाकारत्वधर्मविशिष्टया सर्वसुकृतफल
भूतया निदिध्यासनपरिपाकप्रसूतया चेतोवृत्त्या सर्वज्ञानतत्कार्यवि
रोधिन्या विषयीकुर्वंति ये ते केविदेतां दुरतिक्रमणीयामपि मायामा॰
म खिलानर्थजन्मभुवं नाशासेनैव तरंति निश्चनिक्रामंति तस्य ह न देवाश्च
नाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतेः सर्वोपाधिनिर्मुक्तसच्चि
नद दानंदरूपेणैव तिष्ठंतीत्यर्थः वहुवचनप्रयोगो देहेंद्रियसंघातभेद
निबंधनात्मभेदभ्रांत्यनुवादार्थः १४ एवं तीन्विज्ञप्रपद्यंत न इत्युक्तेः॰

71

येमदेकशरणाः संतोमामेवभगवंतंवासुदेवमीदृशमनंतसौंदर्यसारसर्वस्व
माखिलकलाकलापनिलयमभिनवजलदशोभासर्वस्वहरणचरणपर
मानंदघनमयमूर्तिमतिवैरिंचप्रपंचमनवरतमनश्चिंतयंतोदिवसान
तिवाहयंति नैमस्त्रमपरमानंदसमुद्रमग्नमनसस्तयासमस्तमायागुण
विकारैर्नाभिभूयंते किंतुमद्विलासविनोदाज्ञपालापतेमज्जन्मूलन
समर्थाइतिशंकमानेवमायातेभ्योः प्रसर्पतिवारविलासिनीवक्रो
धतेभ्यस्तपोधनेभ्यः तस्मान्मायातरणार्थीमामीदृशमेवसततमनः
चिंतयेदित्यभिप्रेतंभगवतः श्रुतयः स्मृतयश्चात्रार्थेप्रमाणाःप्रमाणी
कर्त्तव्याः १४ ([illegible]
[illegible]
[illegible] ॥

सदानंदीटीका

अनादिसिद्धात्रिगुणामायायातन्त्रोर्जगत् वहंतस्यतनोमक्तिः क
थंस्यादितिचेच्छृणु १ यथायंमोहितोलोकोमाययानैववेत्तिमां से
यादैवीस्वयंज्ञोतिर्दैवाश्रयतयात्मना २ कल्पितामायिप्रत्यगम्या
नाद्विषयंतया गुणात्रयात्मिकावंधहेतुस्त्रिगुणरज्जुवत् ३ ममभाया
विनःसर्वशक्तेःसर्वविदोविभोः स्वाधीनत्वेनसृष्ट्यादिनिर्वाहिकात
यास्यच ४ मायावरणविक्षेपशक्तिद्वयवतीजडा सर्वप्रपंचविकृति
रविद्याज्ञानशाहिता ५ प्रकाशरूपस्तंनमस्साक्षात्कारमंतरा के
नोपायेनतवसाक्षात्कारोभवेच्छृणु ६ सवज्ञस्यइतोदानीमुच्यते
कृपयात्मना येमांमायानियंतारंभगवंतंजगद्गुरुं ७ समस्तफल
दातारंसर्वज्ञंसर्वशक्तिकं नित्यानंदघनात्मानंभक्ताभयप्रदंपरं ८
सर्वोपाधिविनिर्मुक्तंस्वात्मत्वेनापरज्ञातो प्रपद्यंतेनरात्मानमनन्यश
रणाजनाः ९ सदानुचिंतयंतोमांदिवसान्विपयंतिये नेमन्नेममहा
नंदवार्द्धिमग्नमनस्तया १० स्वकामायागुणावंधहेतुर्मायांनिहंत्य
च मत्प्रसादजवोधेनवाधेवानितरंतितां ११ मामेवंस्वेवकारेणभग
वच्छरणंविना नमायातरणोपायःकोप्यस्तीतपत्रसूचितं १२ मायाज्ञ
त्ययांनर्तमानायासायइच्छति समांशरणःसौंदर्यसारसर्वस्वमीश्वरं १२

गी॰ टी॰ स॰

सदानंदचिंतयेदप्रमाणानाप्तांकिंचिदपिचिंतयेत् इतिश्रीवासुदेवस्यतात्पर्य
मिहगम्यते १४ चिदानंदाकारंनवजलदशोभास्वदपदंमहामायाधारं
शुभगुणकलाग्रामनिलयं शरण्यंभीतानांजननिमृतिभयात्त्राणचरणं
प्रपद्येहंकृष्णंस्मितमधुरवक्त्रं हृदिस्थितम् १५ ॥ १४ ॥

72

नीलकंठीटीका

लीलया

देवस्यजीवरूपेणक्रीडतोममसंबंधिनीयंदैवीहिप्रसिद्धा पिंडब्रह्मा
ण्डरूपेणविततापवामामचिन्मात्रस्यमायामहंनजानामीतिसाक्षिप्रत्य मा
क्षेणापलापानर्हाअनंतस्यप्रपंचस्यैंद्रजालस्येवप्रकाशिका गुणम
यीसत्वरजस्तमोगुणमयी दुरत्ययादुरतिक्रमा येमामेवसर्वभूतस्थं
भगवंतंवासुदेवंप्रपद्यंतेविषयीकुर्वंतितएवैतांमायांतरंति अधिष्ठा
नज्ञानेनैवसमूलस्यभ्रमस्योच्छेदोभवति नतुज्ञानांतरेणवाधितेति
रोधेनवेत्यर्थः अयमर्थः जीवेश्वरविभागशून्येशुद्धचिन्मात्रेकल्पिते
स मायादर्पणेप्रतिफलतिबिंबरूपंजीवंवशीकृत्यबिंबचैतन्यमनुरुध्यप्र
वर्तते अयस्कांतमनुरुध्येवलोहशलाका इदमेवईश्वराधीनत्वंमा
यायाः ईश्वरस्यचमायाद्वारासर्वज्ञत्वमपि तथाचश्रुतिः अस्मान्मा
यीसृजतेविश्वमेतत्तस्मिंश्चान्योमाययासन्निरुद्ध इति तथाचैकैवमा
याजीवेश्वरयोरुपाधिर्दर्पणइवबिंबप्रतिबिंबयोर्बिंबप्रतिबिंबभा
वानाक्रांतमुभयानुस्यूतंशुद्धचिन्मात्रमनयोस्तृतीयंमध्यस्थं जीवेश्व
रौचउपाधिपक्षपातदशायामल्पज्ञत्वसर्वज्ञत्वशास्यत्वशासितृत्वादि
भावंभजेते तावेवतदभावेउपाधिप्रचारदर्शिनौउदासीनबोधरूपतया
जीवसाक्षीश्वरसाक्षीतिशब्दाभ्यांव्यपदिश्यते एवंचजीवईश्वराराधना
तत्त्वाया वामप्रत्यक्त्वतत्त्वज्ञानेनमायायांतत्कार्यस्यापिनाशेनतुसाक्ष्यभावात्साक्षि
त्वमपिपरित्यज्यबिंबप्रतिबिंबानुस्यूतंशुद्धंतृतीयंचैतन्यमाप्नोतीति
तदिदमुक्तं दैवीमायेति ममममायेतिचैकस्यैवजीवेश्वरसंबंधित्वं
जीवस्येश्वरभजनेनमायातरणमितिच १४ ॥

आनंदीटीका

अयं व्यामोहः कथमुपयातीत्याह ॥ दैवी देवात्परमकारणादीश्वराद्
नुक्रमेणाविर्भूता गुणमयी परस्पराभिभवजननहेतुत्वात्सत्वरजस्तमो
ऽभिभवाद्युद्रिक्तेनावरकेण प्रकाशान्तिरोधायिना तमसा युक्तैषा
हंकारग्रस्तानि लोकानां मम मायामत्तिरोधानकारणमेव छायेव
सूर्यस्य तिरोधानहेतुः दुरत्यया दुःखेनात्येतुं लंघयितुं शक्यते
यथा लोका मेघच्छायाच्छादितदृशः सर्वप्रकाशकं सूर्यमुदितम
पि न जानंति तथैवाहंकारेण तिरोहितज्ञानाः अत एवात्मसि
न्कर्तृत्वमभिमन्यमानाः मां परमेश्वरं सकलकारणं न जानंती
त्यर्थः तथा चाग्रमवे नाहं प्रकाशः सर्वस्य त्व प्रकाशयति मम
मायेति कर्मणि षष्ठी मायाच्छायाया हेतोः भावकर्मणोर्ग्रहणादिसूत्र
त्यादिना ये तु नराभ्यंतरसंयमोपहितज्ञानकर्मतमश्चयानुदृष्टा
नेनातत्तमसोऽभिभवाद्युद्रिक्तसत्वाः सर्वं हेयं प्रकृतिविकृतिजा
तं त्यक्त्वा मां परमात्मानमेव प्रपद्यंते सदा सर्वत्र सद्बुद्ध्याश्रिता एव भ
त वर्तिने मायामुक्तलक्षणामतितरंत्यतिक्रामंति प्रकृतेः पृथग्भवा
स्थिताः स्वात्मालोकं प्राप्नुवंतीत्यर्थः तथा चाहंकारविमूढात्मा
कर्ताहमित्यस्य तत्त्ववित्तु महाबाहो गुणकर्मविभागयोरित्यस्य
चोद्दिष्टस्य लक्षणे निर्दिष्टं तथा शिवशासने ईश्वरप्रत्यभिज्ञा
यां मायालक्षणविस्तरः तस्य स्वयं स्वभावस्य पशुभावे प्रकाशि
का विद्याशक्तिस्तिरोधानकरी मायाभिधा पुनः अस्यार्थः पशु
भावे ग्राह्यग्राहकविपर्यासो भयात्मनि यावर्णयोगलक्षणे स्थिते
पितस्य प्रमातृपरमार्थरूपस्य स्वयं लक्षणस्य स्वभावस्य या प्रका
शिका भगवतः शक्तिः सा विद्या तस्य स्वयं स्वभावस्य तिरोधानक
री पुनर्मायाभिधानशक्तिः तिरोधानं स्वरूपाप्रकाशनं अविद्रूपे इ
शून्यादौ प्रमातृताभिमानं प्ररूढं दधती चिन्मयानपि भावानभेदे
नावभासयंती सर्वथैव स्वरूपं तिरोधत्ते विमोहिनी हि सा भेदेनेक
दूसे भाते हंतयानात्मनीति चिने शून्ये बुद्धौ शरीरे वा मायाशक्तिर्वि
जृंभते अस्यार्थः सुषुप्तप्रलये नेत्यभावसमाधौ च यच्छून्यमा
काशकल्पं तत्र अनुस्मरणेन वेद्यं सदपि अहमित्यात्मत्वेना
भिमन्यते प्रष्टावेद्या सुमनविधो प्राणः शून्यवायुकल्पमहमस्य
स्मिमिनिः सुसुप्तीत्यहंतया भासते तथा बुद्धिः संस्पशैलिलाया

यमहंदर्पणीवेयप्रतिबिंबवती अहंवेद्मित्यवोचः त्वीमूढोहमितिचिंता
एवमस्यायामहमित्यात्मत्वेनमन्यतेस्कृशः स्थूलोगौरोहमितिपृथि
वीप्रायंशरीरमहमित्यात्मतयाभातिसर्वमिदंशून्यादिकंवस्तुनः
चिन्मात्रस्यात्मनयिमायैवतावत्संकोचादचिद्रूपतयासंपादितमि
तिमायाशक्तिर्विजृंभते एवंविधानिदुर्घटवस्तुसंपादनमोहन
व्यापारसंपत्त्यप्रतिघातरूपेणाविलसन्ति वाशब्दात्रेधाऽष्टरूपेणामे
वधारसत्वनयनशूद्रादीनांगाढामहंतास्तंवयति [illegible]
[illegible] ॥१४॥

नत्रमवंबंधतोयद्याप्रतिपादितप्रकारे **रामकंठीटीका** एतत्त्वमेवपरमेश्वरःपरमात्मैकंतत्त्वविजृंभसे तत्र

पतेगुणानामयन्मयैर्भावै र्मोहितंजगन्मांनजानाती त्वक्रमत्राह ॥

एषुवीबिकपनेगुणानाम एवाहिगुणमयीदेवीमाया इत्थंदेवना
त्क्रीडनाहवस्यस्ततामममसंबंधिन्यःसत्यपिसत्यवदाभासयंतीम
दीयाशक्तिर्ममाकिलपारमार्थिकीपराशक्तिरेकैवसाहमिति य
थोक्तं ममस्वरूपंपरामृशयंतीविधियत्वावत इदमितितुपरामृ
शंतीममदायितिव्यवृत्तियते इदमितितपरामर्शोव्यतिरिक्त
वेद्यार्थोत्थापनेनस्वरूपलभते तत्त्ववेद्यजडचेतनभेदेनसंगृह्य
तोहिप्रकारकमेवाऽवांतरभेदकल्पनयाः तेनमयिसत्त्वज्ञःख
मोहमयाविविधप्रत्ययरूपतयावेद्यत्वेनयर्वस्तुस्त्वादिगुण
त्रयात्मकतयासर्वंसंगृहीतं अतोविश्वभावमयीगुणमयीम
ममायेत्युक्तं अतःक्रीडैकप्रयोजनस्यापिममेक्कुयेवगुणामय
त्वेनविजृंभमाणानकेनचित्परेणातिक्रमितुंशक्यतेनिजस्वये
त्यर्थः ननुयएवमेवानकेनचिदत्ययाकर्तुंपार्यतेनतत्सर्वथा
संसारविभ्रमात्परमेश्वरस्तेनिरर्थकमेवाऽयमपवर्गप्राप्त्युपा मार्ग
योपदेशइत्यत्राह मामेवैकंयथोक्तस्वरूपंपरमेश्वरंपरमात्मा
नंमदनुग्रहेच्छाप्रबोधिताः संतोयेप्रपद्यंतेमदभेदसमापत्ति
पर्यवसायिनायथोक्तेनज्ञानेनसमाश्रयंतेतएनामेतां तरंत्य
तिक्रामंति अहमेवैकः सततंविकस्वरपरप्रकाशात्माप्रभाक
रस्तनमिषयानयामाययानकदाचित्तिरस्कृतःप्रकाशस्तेनाम
त्स्वरूपसमापन्नत्वाज्ज्ञानदेहाद्यहंप्रत्ययतयाहमेवसंपन्न
एवपरमार्थतःस्वभावभावभेदाभासनमममयीमायामति
लंघयितुमलं ननुनस्यात्तद्विनेमोहनिद्रानिमीलितनिज

दृष्टयः स्वरूपमपि संवेदितुं शक्ताः [१४] ([illegible]
[illegible] ॥

लासिकी दरगतीटीका

तव ननु स्फुरंभासमानस्यापि कुतो न विमर्षणमित्यत आह ॥ यथापरि
दृश्यमाना गुणमयी सत्वादिगुणविकारात्मिका जगद्विवानिरूपत्वे
न बंधनहेतुः मायात्वस्वरूपमाछाद्यासत्यमपीदं नानारूपं सत्यवदा
भासयंती मदीयाभेदावभासप्रापणशक्तिः दैवी देवस्य क्रीडाकर
स्येयं दैवी मम श्रीपरमेश्वरस्य माया वितास्वभूता क्रीडेत्यर्थः कीदृशी
दुरत्यया दुरतिक्रान्ता ननु यद्येवं प्रधानकेन विदतिक्रमितुं शक्या
न हि संसारभ्रमान्वपरमा हृथायमुपदेशक्रमः इत्यत आह मामेवे
ति मामेवैकं परमेश्वरं ये ऽव्यभिचारिण्या भक्त्या प्रपद्यंते भजंते त प
२ तां दुस्तरामपि तरंति मामीश्वरं जानंतीति भावः सत्वादीनां वस्तु
नः संविन्मात्रपरब्रह्मानतिरिक्ततायामपि यन्न दतिरिक्तभावग्र
मनं तद्देवगुणत्वं भोक्तृपारतंत्र्यं भोक्तृत्वं तन्न भेदात्मकं रूपं संसा
२ रिभिर्नि वीच्यत या तास्विति माया रूपमतो ये परमार्थं ब्रह्मप्रका
शिकविदस्ते तदनतिरिक्तं विश्वप्रपंचतो गुणानां सत्वादीनां गुण
त्वालक्षणां भेदावभासस्वभावां मायामतितरंतीति मामेवेत्येव
कारस्यायमाशयः ये यथा चिन्नं भेदावभासमात्रं विज्ञस्ते मायां
नातिवर्तंते १४ ॥

पंचोलीटीका

कथं पुनः [illegible]तां त्रिगुणात्मिकां वैष्णवीं मायां अतिक्रामंतीति ।
ते प्रकारमाह दैवीति हि यस्मात् मम एषा दैवी परमेश्वरी गुणम
यी गुणत्रयात्मिका माया दुरत्यया दुःखेन अतिक्रमणं यस्याः सा मे
सर्वधर्मान्परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मनाये प्रपद्यं
ते ते एतां सर्वभूतमोहिनीं मायामतिक्रामंति संसारबंधनान्मुच्यं
ते इत्यर्थः १४

गी॰
टी॰
स॰

74

तत्त्वदीपिकायां

प्रकृतिरूपमानागुणमयी सत्त्वादिगुणात्मिका त्रिगुणात्मिकातद्गुरि
व्यात्मिका दोषैनवंधनहेतुः मायास्वरूपमाच्छाद्य सत्त्वमपि इत्यना
इत्यंतमवदामात्मनामदीयामेवेवमायामप्रमाणिता दैवीदेवा
तामीत्यवतारेषु दैवीमम श्रीपतेः प्रत्ययमायाविनसद्भूतानी
ते नर्भूः लीलारूपी दुरत्ययाइत्यति कोला न तु ये एवमेपाणिकेनविद
तिकर्मिणं एवमार्गलिंसंसारश्रमानपरमाह्वया यत्तदेवाकल
दुरत्ययाद नामेवेति मामेवैकं परमेश्वरं येवाभिज्ञातिरूप्रपन्ना
प्रपद्यन्ते भजंते तपतांदुस्तरामपि स्वयंवसमानीवर नदीसिना
वः सत्त्वादीनां बलात्मसंविन्मात्रपरब्रह्मानंदिरिक्तां मायामपि
यतद्धिभिरिक्तमात्रमानंतदेवगुणत्वं मोहमायांतंसर्व मोहत्वं
तत्वमेवाभिलक्ष्यंतं मायामयी वदितीर्णं आत्मानमात्मानं व्य
मात्मैव परमार्थवस्तुप्रकाशकविदस्तौ तदनामिविक्तं विषेयं वद्यं

यणवीरसंभिद्धोयिनी ॥

दैवीति एषा प्रत्यक्षभूता दैवी देवस्य राजस्य धिकृता तथा गुण
मयी गुणोन्याप्तत्वं तेन सत्त्वरजोतमसावादौ पांचार्यदौ वल्लवे भीमइंद्रि
येरूपादवस्थानेव दोषान्यस्मिन्विघोषणइतिनोमा नुप्राप्त
नाद्रुणो मैवीनत्वभुरा नत्यथा नाया गुणाः पांचीदयस्तत्स्थिति
पायोवा ममनमाया विनइ वमायादुस्तराव स्थितिमा म्यान्मायेव
दुरत्ययाऽरत्ययाइ:खेनात्येतमतिक्रमितुमुलंघयितुं समाप
यितुं वा शक्या भवति मायामाहे नवैतद्धायते एते सर्वैउभय:
सैन्यस्यायोधामयासर्वेश्वरेणकालरूपेणैव ग्रस्तानयुत्तनभव
नामप्यपेक्षते पांहतनेस्ति किंतु भवादृशानांकीर्त्यादिस्थापना
र्थं विनोदार्थं वैतद्धि इंद्व नमात्र मिति येयुतनमीमेवपरमकारणं
परमेश्वरं प्रपद्यंते प्राप्तताकृत्य प्रवर्तंते इति यावत् तपतांमा
यां युद्धवर्यालसत्तरणांतरंति तत्पारं व्रजंति जयशालिनो भवंती
ति यावत् १४

दैवीति प्रथमापाद: मायाह्येषामोहिका सावसहस्थादि
क्रीडमहदेवसंबंधित्वादिति पाकेऽदुरत्यया तथाहि देवश
ब्दार्थंपठंति दिवुक्रीडाविजगीषाव्यवहारस्तुतिस्तुतिमोद
मदस्वप्नकांतिगतिषुइति कथंदैवीमदीयत्वात् अहंहिदे
वइति अतएव श्रीर्भूर्दुर्गेति याभिन्ना महामायाह्वैष्णवी
तच्छक्त्यनंतांशादीनां स्थापितस्याश्रयात्मभो: अनेनब्रह्म
रुद्रादेर्नास्या:शक्तिकलापिहि तेषांदुरत्ययाप्येषाविनाविं
ष्णुप्रसादतःइति व्यासयोगे तर्हिनकथंचिदत्ययेतंमाशंकातः
त्यतआह मामेवेति अन्यसर्वंपरित्यज्य मामेवयेप्रपद्यते
गुर्वादिवंदनंचमध्येवसमर्पयंति सएवतत्त्वस्थितत्वाद्वीदि
मिभवतीत्यादिपद्यपाति आहचनारदीये मत्स्यपत्याचक्र
वृदीन्भजंतेतेमध्यमानवाः मदुपार्थितयातांश्चसर्वभूतानि
वीनमाइति आचार्यचैत्यवपुषास्वगतिंव्यनक्तीतिच तर्हि
किमिति सर्वेनात्यायनित्यत आह १४॥

भाषाअनुवाद

जो कहो कि तुम को फेरि कौन जानने पावै इस पर कहते हैं कि दैवी कहे अद्भुत औ सत्व आदिगुणविकारात्मक मेरी शक्ति जो दुस्तर माया है इसको जो अव्यभिचारिणी भक्तिसे हमें भजै सोई हमारी माया के पार होके हम को जानिपावै है १४ ॥

दोहा

यह मम माया गुणमयी दैवी दुस्तर जोय मोकों प्रापत होत
जो माया इह तरै सोय १४ ॥

76

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः मायया पहृतज्ञाना आसुरं भावमाश्रिताः १५ ॥

शंकरभाष्यं

यदि त्वां प्रपन्नाः मायामेतां तरंति कस्मात्त्वामेव सर्वे न प्रपद्यन्ते इत्युच्यते न मामिति न मां परमेश्वरं दुष्कृतिनः पापकारिणो मूढाः प्रपद्यंते नराधमाः नराणां मध्ये अधमा निकृष्टास्ते च मायया पहृतज्ञाना आसुरं भावं हिंसानृतादिलक्षणमाश्रिताः १५ ॥

आनन्दगिरीकृतटीका

भगवन्निष्ठाया मायातिक्रमहेतुत्वे तदेकनिष्ठत्वमेव सर्वेषामुचितमि ति दुष्कृतिपदीनि पापकारित्वेनाविवेकभूयस्तया हिंसानृतादिभूयस्त्वा द्भूयसां जन्तूनां न भगवन्निष्ठत्वसिद्धिरित्याह उच्यत इति मौढ्यं पापका रित्वे हेतुस्तत एव निकृष्टाः संमुषितमिव तिरस्कृतं ज्ञानं स्वतत्त्वरूपविष यमेषामिति ते तथा १५ ॥

किमिति तर्हि सर्वे त्वा ये प्रपद्यन्तेन मेव न भजं स्वामिकृतटीका

ति तत्राह॥ नराधमास्ते मां न भजंति अधमत्वे हेतुः मूढा विवेकशून्याः तत्कुतः दुः ष्कृतिनः पापशीलाः अतो मायया पहृतं निरस्तं शास्त्राचार्योपदेशाभ्यां जातमपि ज्ञानं येषां ते अत एव दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च इत्यादिना वक्ष्यमाणमासुरं स्वभावं प्राप्ताः संतो न भजंति [illegible] मां

भावं

[illegible] ॥

पैशाचभाष्यं

[illegible] ॥

न मां दुष्कृतिनः पापकर्माणः मूढाः प्रपद्यन्ते न प्राणिनां कुत्सिता नराधमाः मायया मदीयया अपहृतज्ञानाः अपहृतं तिरोहितं ज्ञानं येषां ते अपहृत ज्ञानाः आसुरं भावमाश्रिताः १५ ॥

रामानुजभाष्यं

किमितिभगवदुपासनाप्रतिपादिनींभगवत्स्वरूपज्ञानंसर्वेनकुर्वंतइत्याह नमामिति
मांदुष्कृतिनःपापकर्माणोदुष्कृतत्वात्तस्माच्छास्त्रविधानंप्रपद्यंतेमूढानराधमाः
माययापहृतज्ञानाआसुरंभावमाश्रिताइति मूढाःविपरीतज्ञानामत्स्वरूप
परिज्ञानाभावात्तेषुवविषयेषुसक्ताः एवंकुप्रकारेणभगवद्भक्तेषुपरेयेकारस
मात्मनंभोगपनानंचस्वशोषनयामन्यमानाः नराधमासाम्येनज्ञानेपिमत्स्व
रूपेमदीयैश्वर्यानहंत्वात् माययापहृतज्ञानेस्तु मद्विषयंमदैश्वर्यविष
यज्ञानंप्रसक्तंमध्येषांतदसंभावनादृतीभिः कुपदापदार्थयुक्तिभिर्यहृतंतेते
तथोक्ताः आसुरंभावमाश्रिताः मद्विषयंमदैश्वर्यविषयंचज्ञानंसहेत
मुपयंत्रयेषांतेषामेवभवंतितथाउक्ताराक्षसपापिष्टतमाः १५ ॥

अभिनवगुप्तटीका

येचमांसत्वाधिकारिणोकायेनाद्रियंतेतेदुष्कृतिनोनराधमामूढाआसुरा
स्ताइतिमायामहिमैवायम् १५ ॥

परमार्थप्रपाटीका

अथमदप्रापिनिमित्तंमोर्येवत्याह नमामिति नरेषुयेअधमास्तेमांनप्रप
द्यंतेनभजंतितत्रहेतुःमूढाविवेकशून्याःतत्रतःदुष्कृतिनःपापशीलाअ
तोमाययाअपहृतज्ञानाःसंतःआसुरंभावमाश्रिताःसंति एतस्याचार्यो
पदेशानःआत्मज्ञानाअपितदावरकीभूतमायातोदंभदर्पाभिमानपारुष्या
द्यभिनिवेशवंतोमांनभजंतीत्यर्थः तेद्रुतः संकल्पविकल्पकल्लोलगु
णलाघवपुरुषोन्मूलिनीकल्लोलैरभिमानमत्सरमुखैःषड्भिःपरीतोर्मि
भिः आवर्तैर्ममतादिभिःपरिवृताज्ञानवोयपाराब्धिनाहरिणोमोहपपात्वि
तीवनिमग्नंचेतःस्थितिर्मांगिनां १५ ॥

वनमालीटीका

येयेवंनहिसकलानर्थप्रसूतिविद्यानिवृत्तयेसर्वेश्वरंकरुणानिधिंशरणागा
तवत्सलंमामेवसर्वेजनानप्रपद्यंतेचिरसंचितप्रबलदुरितप्रतिबंधादि
त्याह नमामिति पापकारित्वाद्दुष्कृतिनोमूढाःनराधमाः
माययापहृतज्ञानाआसुरंभावमाश्रितामांनप्रपद्यंते गुरुणाबोधापासना
भावेनमत्स्वरूपापरिज्ञानाद्विपरीतज्ञानादेहगेहदारादावहंममेत्यभिमाना

स्वस्वविषयेष्वेवासक्ता मूढाः यामराश्चन्येनराधमाः अन्यसाधारणतया
मंदामत्स्वरूपेज्ञातेपिमदधीनंदेहगेहादिकंस्वाधीनंमन्यमानाः अ
न्येमाययापहृतज्ञानामदनंतालौकिकगुणवैभवालयस्वरूपविषय
कंज्ञानंअसहमानास्तत्रमपितदसंभावनाविपरीतभावनापटकयाने
त्रावष्टंभेनस्वर्याक्षोदकांगुल्येवज्ञानोवंप्रतिमन् स्वचूपाक्षादिकयापा
पकर्मजनितज्वरेवीसनपापहृतंयेषांते अन्येआसुरंभावमाश्रिताः
मदनंतविभूतिमत्तामसज्ञानंस्वरूपपन्नमपियेषांद्वेषायैवभवतिते
उग्रौग्रपापिष्ठाः आयास्वयः कदाचिन्मदनुग्रहादिनासाध्या
अंतिमस्त्वसाध्यएवेतिभावः १५ ॥

उत्तमैवैजयन्तीटीका

ननुत्वन्मायातरणोपायभूतांत्वदुपासनसंपादितांत्वत्प्रपत्तिंकिमिति
सर्वेपिनकुर्वंतीतिचेत्तत्राह नमामिति दुष्कृतिनः दुष्टंपापंकर्मशी
लंयेषांतेनतथायद्वादुष्कृतिनः पापवहाः अपियन्मायाविपरीतज्ञा
नत्वेमहिमज्ञत्वेनयाअनुग्रहादिनायाथात्म्यमत्स्वरूपगुणादिज्ञाना
भावाद्भुजंगिनाअविद्यायामंतरेवर्तमानाः स्वयंधीरापंडितंमन्य
मानाः दंद्रम्यमानाः परियंति मूढाः अंधेनैवनीयमानायथांधा
इत्यादिश्रुतिप्रतिपाद्यस्वभावानांसर्वनियंतारंसर्वशरण्यप्रतिपा
द्यपुरुषोत्तमंतत्प्रपत्त्यनेनभजंति ननुतेकतिविधाः संतीत्यपेक्षायां
तेषांन्यूनाधिकपापत्वेनचतुर्विधत्वमाह मूढा इति माययेतिपदं
स्यचतसृभिर्विशेषणैः संबंधः मायया अविद्यया मूढाः विपरी
तबुद्धयः भुक्तिमुक्त्यादिसर्वकामप्रदंपरमेश्वरंमांविहायधनपुत्रा
दिप्राप्त्यर्थमितरसुराराधनेषुसक्ताः यद्वामांत्यक्त्वाप्राकृतेषुदेह
पुत्रकलत्रादिविषयेषुसक्ताः यद्वामाययामूढाः कर्मभिर्निवृत्ता
मीमांसकादयः पुरंदरादिजीवक्त्वन्मांसर्वेश्वरमपिकर्माराधकमाधी
नंचमन्यमानाः माययानराधमाः शास्त्रद्वारामांज्ञात्वापिदुर्ग्रहे
णेतरदेवसामान्यबुद्ध्यामहिमज्ञाः यद्वामाययानराधमास्तिर्यक्
पश्वादिषुनेकाम्यधमासुयोनिषुचिरकालंभ्रममाणाः संतः केनचि

गी॰ टी॰ स॰

78

सुकृतेन सहकृतया मत्कृपया ब्राह्मणादिकुलजन्म प्राप्यापि कुतर्कजल्प
वितंडादिवादेषु सत्कार्यवादादिषु चात्यंताभिनिवेशेन पुनः पामरतां भाजो
नैयायिकालंकारिकादयः नूनं दैवो न हतो यैः चाद्भुतकथास्तथामू
हित्वा स्थ एव कुमतज्ञाताः शरीरमिव विदुर्जड इति वचनात् मायया पहृ
त्याऽपहृतज्ञानाः प्रकृतिरेव जगज्जन्मस्थित्यादिकर्त्री ईश्वरश्चामुत्र च भोगदात्री
मोहमदाद्येवेत्येवमसद्यास्याभावनीश्वरेण किमित्येवं मायया पूर्तनपाः पा
हृतं नष्टप्रायं मत्स्वरूपशरणाद्यादिविषयकं ज्ञानं येषां ते अपहृतज्ञा
नाः सांख्या मायया आसुरं भावमाश्रिताः स्वाभाविकं सर्वज्ञत्वप्रतिया
दिमदैश्वर्यविग्रहनामरूपगुणरूपादिकं मद्विभूतिरूपं जगच्चेदं स
र्वं मायिकमित्येवमात्स्वत्वमन्यते न तेषामासुरं भावमापन्नाः युक्ता
इ मद्वेषात् एव शाकमुण्यादिवन्मदन्यदेवं परं मन्यमाः प्रजन्तर्णामेते ना
षामन्वरोऽन्तरणापिष्टनमोद्वेषमात्राहेतोर्मां न भजन्ते त्यभिप्रायः १५

यद्येवं तर्हि किमिति निखिलानर्थमूलमायोत्त मूलनाशनी वासुदेवं भगवंतमेवन
प्रपद्यंते सर्वे चिरसंचितदुरितप्रतिबंधादि **मधुसूदनीटीका** त्याह भगवान् ॥

ये दुष्कृतिनः दुष्कृतेन पापेन सह नित्ययोगिनः अत एव नराध
माः नरैः साधुभिर्गर्हणीयाः पापवत्त्वादनर्थसहस्रभाजः कुतो दुष्कृ
तमनर्थहेतुमेव सदा कुर्वंतीति यतो मूढाः इदमनर्थसाधनमिदमर्थसा म
धनमिति विवेकशून्याः सति प्रमाणे कुतो न विवेकं कुर्वंतीति यतो मायया
पहृतज्ञानाः शरीरेंद्रियसंघाततादात्म्यभ्रांतिरूपेण परिणतया मा
यया अपहृतं प्रतिबद्धं ज्ञानं विवेकसामर्थ्यं येषां ते तथा अ
त एवेदंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव चेत्यादिनाग्रे वक्ष्यमा
णमासुरं भावं हिंसानृतादिस्वभावमाश्रिताः अत्यंतनिकृष्टयोग्याः
ते नो न मां सर्वेश्वरं प्रपद्यंते न भजंते अहो दौर्भाग्यं तेषामित्यभिप्रायः
१५ [illegible]
[illegible]
[illegible] ॥ **सदानंदीटीका**

मायासागरमग्नानां श्रीहरेश्चरणांबुजं पोतभूतं शरणं ये श्रितास्ते मो

त्वभागिनः १ साधनं कर्मयोगादि हरिभक्तिमपेक्ष्यते तत् मद्भक्तो हस्यांश्चिद्भक्ति
स्तन्निरपेक्षैकसाधनं २ हरिभक्तिं विनायत्साधनं कृष्णकृतं तैः क्रियते तद्
ध्यानस्मरणं हरिं सर्वात्मनाश्रयेत् महाभूतपफलं हस्य भक्तो विश्वासप्राद
यत् नहि हीनास्तु निंद्यं ते पापिनो हरिसंश्रयं ४ मत्स्वरूपापरिज्ञाना
न्मूढास्ते मंगलं प्रदाः ततः पापसमाचारैः प्रवृत्ताः स्युर्नराधमाः ५
ततो मायाहृतज्ञानाः शास्त्रे त्वनधिकारिणः ततस्ते स्वासुरंभावं प्राप्ता
दंभादिभिः समाः ६ मामीश्वरं न जानंति ते पापोपहितहृदयः शरणं प्र
प्रपद्यंते देहाद्यध्यासमाश्रिताः ७ न तेऽधिकारिणः कस्य चरणांबुजसे
वने नहि हीनान्नराकाराः पशुभ्योप्यधमा हि ते ८ मायया कृतदिवं ज्ञा
नं येषां विषयरागिणां हिंसादिभावनाक्रांता गोविंदं नाश्रयंति ते ९ १५

नीलकंठीटीका

कुतस्तर्हि सर्वे त्वां प्रपद्य मायां न तरंतीत्याशंक्याह न मामिति दुष्कृ
तिनः पापकृतस्तत्र हेतुर्मूढाः आत्मानात्मविवेकहीनाः अत
एव नराधमाः मां न प्रपद्यंते कुतो दुष्कृतिनः यतो मायया अपहृतं निर
स्तं ज्ञानं अखंडं संविद्रूपं ब्रह्मास्मीति येषां ते अपहृतज्ञानाः एतेन मायया
आवरणशक्तिरुक्ता किंच आसुरं असुराणां विरोचनादीनां भावं चि
त्ताभिप्रायं आत्मैव इह महय्य इत्यादिना श्रुतं देहेंद्रियसंघात एव सम्य
क् सेवनीय इत्येवंविधं आश्रिताः एतेन मायाया विक्षेपशक्तिरुक्ता
तदेवं मायया स्वरूपानंदमाहृत्य देहात्मभ्रमे जनिते सति तदभिमाना
द्देहादिषु इष्टार्थेषु दुष्कृतं कर्तितेन च मूढाः संतो नराधमाः मां न प्रप
द्यंते सर्वानर्थमूलं मायैवेत्यर्थः १५ ॥

मायास्वभावं प्रपंचयति ॥

आनंदीटीका

मायया प्रोक्तरूपया अपहृतज्ञाना विद्यानराधमा आसुरं भावं सत्वरजसोर
भिभवात्केवलं तामसत्वमाश्रिताः अतएव दुष्कृतिनः प्रवृत्तिति हि
त्वादेरज्ञानाद् दूषितकर्मणः मूढाः अहंकारविमोहिता मां न
प्रपद्यंते मां परमेश्वरं न यान जानंति अतएव नमस्करणीभवंति सर्व
मेतत्परीक्षापर्वणि देवासुरसर्गे विस्तरयति [illegible]

गी॰ [illegible] ॥

टी॰ रामकंठीटीका

स॰ ननुकस्मात्सर्वेत्वांकश्चिन्नप्रपद्यतइत्याह ॥

मद्विद्वेषाःस्वरंजस्तमोवकृत्त्वभावसत्त्वात्सर्गमापन्ना अतएवमायया
यथोक्तस्वरूपयाऽपहृतज्ञानाआक्षिप्तपरमार्थबोधास्ततश्च
दुष्कृतिनःसंसारगर्भपातपर्यवसायितत्त्वानमृत्यप्रवृत्तिक्रियावंतोनएवमू
79 ढाविवेकिनोनराधमाःपुरुषेषुमध्येनिकृष्टामांपरमात्मानंनप्रपद्य
न्ते येतुमद्विद्रावणादेवदेवसर्गभाजःसंतोमहदनुग्रहेच्छाविभावित
विद्याग्निप्रबोधिताः कैवल्यप्राप्तिफलंक्रियायोग्यपुण्यकामप्रवृत्ताते
१५ ॥

लासिकी [illegible]टीका

ननुकस्मात्त्वांसर्वःकश्चिन्नप्रपद्यतइत्यतआह ॥ नेत्यपिमध्येमत्या
प्यधिकारिणिकार्येयेधमानिकृष्टास्तेमामीश्वरंनभजंते अयमत्रहेतुः
मूढाविवेकशून्याः नन्वनोदुष्कृतिनः पापेनसहनित्ययोगिनः अ
तोमाययापहृतंनिरस्तंशास्त्राचार्योपदेशजातमपिज्ञानंपरमार्थबोधो
येषांते अतएवासुरंभावदर्पाभिमानक्रोधादिनाबहुप्रमाणंआसुरंस्वभा
वमाश्रिताःसंतोनभजंते येतुनरोत्तमाः पुण्यकर्माणस्तेमांभजंते
१५ ॥

पंचोलीटीका

यदित्वांप्रपन्नाएतांमायांतरंतितर्हिकस्मात्त्वामेवसर्वेनप्रपद्य
तइत्यतआह नमामिति नराधमाःदुःकृतिनःपापकारिणःमूढा
माययाऽपहृतज्ञानाआसुरंभावंहिंसादंभशान्तिनादिलक्षणमा
श्रिताःमांपरमेश्वरंनप्रपद्यंते १५

रणवीरसमिद्धोधिनी ॥

ननुकिमितिनसर्वएवभवंतंशरणीकृत्यैवप्रवर्तंते येनतेषां
सर्वेषामुक्तलक्षणमायापारप्राप्तिःस्यादित्यतआह नमामिति
दुष्कृतिनःप्राग्जन्मार्जितपापकर्मविकृष्टा अतएवमूढामोहेनाह
तानराधमाःनरेषुअधमाः वक्ष्यिवंधपशूनिवावत् मां नप्रपद्यंते

नमांशरणंकुर्वंति अतएवमायया ममभायापहृतंज्ञानं
यणास्ताचार्वाकादि देहेनिष्ठायोयेषांतेतादृशाः संतः आसुरंभा
वं दैत्यसंबंधिनं स्वभावमाश्रिताभवंति असुराहि प्रबलतरं
प्रतिवीरं दृष्ट्वापाताले निलीयंते यद्वा असून्प्राणान्रमंतीत्यसु
राः प्राणरक्षणतत्परास्तेषामयंभावस्तं सर्वेषांबधादीनास्वा
त्मनस्त्वविच्छेदकार्यं दुष्टमार्गः कथंहितः स्यादित्येवंरूपेणा
त्रासेनपलायनपरत्वमाश्रिताभवंतीत्यर्थः आगमेपापक
र्मार्जनेनमदनाश्रयणाद्वापि धर्म्याबुद्धा त्रि हतेःपापसेवो
त्पत्तेर्निरयगतिस्तेषां सनातनीतिभावः १५॥

मधुभाष्य

नमामिति दुष्कृतवान्मूढाः अतएवनराधमाः अपहृतज्ञा
नत्वाच्चमूढाः अतएवासुरंभावमाश्रिताः सचैवदुच्यते प्रह
तिं च निहंतिचेत्यादिना अपहारोभिभवः उक्तंचैतदध्यात्म
योगे ज्ञानंस्वभावोजीवानांमाययावाभिभूयतइति असु
ध्याअसुराः नचोक्तंनारदीये ज्ञानप्रधानादेवास्तु असुरास्व
ता असावितिएकस्मिन्नेवभक्तिरित्येकभक्तिः नचोक्तंगारु
डे मय्येवभक्तिर्नान्यत्रएकभक्तिःसउच्यतइति बहूनांजन्म
नामंतेज्ञानवान्भवति नचोक्तंब्राह्मे जन्मभिर्बहुभिर्जीवाना
तोमांप्रतिपद्यतइति प्रकृत्यास्वभावे स्वभावःप्रकृतिश्चैव
संस्कारोवासनेतिचेत्यभिधानात् यांयांब्रह्मादिरूपांतनुं उ
क्तंचनारदीये अंतोब्रह्मादिभक्तानांमद्भक्तानामनंततेति ब
कृत्स्वकांगतिंगच्छेमोदन्श्चैवकिमात्मकइत्यादेः परिहार
मंदभावमोदनयर्मेषु अवतारेमहाविलोभर्मकः उच्चसमुच्यत
इत्यादेश्चवक्ष्यमाणैवर्तेकोविशेषस्तत्रान्येभ्यइत्यत आह १५॥

80

भाषानुवाद

तौ फेरि सब मनुष्य तुमको काहे नही भजते है तो यह कहो तो उत्तर सुनो कि मनुष्यो के मध्यमे जो अधम है तेई मेरी भजन नही करतेहै कारण यह कि वे लोग पाप परायण अौमायासे अपहृतज्ञान अर्थात् शास्त्र या आचार्य के द्वारा ज्ञान होने से भी मै उनको निरस्त कर्ताहूं अौर सोरहें अध्याय मे चौथी श्लोक से कहेंगे जो आसुर भाव उस को प्राप्त होय मेरी भक्ति नही करते है १५ ॥

दोहा

मिलत न पापी मूढ मोहि जो अधम नर होहि मायाहृतो ज्ञान जिह असुरभावास्थित जोहि १५॥

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन आर्तो जि
ज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ १६ ॥

शंकरभाष्यं

ये पुनर्नरोत्तमाः पुण्यकर्माणः चतुर्विधेति चतुर्विधाश्चतुःप्रकारा भजं
ते सेवन्ते मां जनाः सुकृतिनः पुण्यकर्माणो हे अर्जुन आर्तः आर्तिपरिगृ
हीतः तस्करव्याघ्ररोगादिना अभिभूतः आभिभवं आपन्नो जिज्ञासुर्भग
वत्तत्वं ज्ञातुमिच्छति यः अर्थार्थी धनकामो ज्ञानी विष्णोस्तत्ववित् च हे भ
रतर्षभ १६ ॥

आनन्दगिरिकृतटीका

केषां तर्हि तव दिदृक्षा सुकरेति तत्राह ये पुनरिति ते भजंते भगवन्त
मिति शेषः ये त्वां भजन्ते ते किं सर्वे मायां तरंति नैवं प्रार्थनावैचित्र्यादि
त्याह चतुर्विधा इति आपन्नस्तन्निर्हर्तुमिच्छतीति शेषः तत्वविदि
ति शाह ज्ञानवानात्मतत्वसाक्षात्कारमात्रार्थी समस्तहरित्यर्थः १६ ॥

सुकृतिनस्तु मां भजंति ते च सुकृततारतम्येन चतुर्विधा इत्याह पूर्वजन्मसु ये कृतपुण्या जना

स्वामिकृतटीका

स्ते मां भजंति ते च चतुर्विधाः आर्तो रोगाद्यभिभूतः स यदि पूर्वं कृतपुण्यः तर्हि मां भजति
अन्यथा क्षुद्रदेवताभजनेन संसरति एवमग्रेऽपि द्रष्टव्यं जिज्ञासुरा
त्मज्ञानेच्छुः अर्थार्थी अत्र वा परत्र वा भोगसाधनभूतार्थलिप्सुः ज्ञानी
च आत्मवित् [illegible] १६ ॥

पिशाचभाष्यं

चतुर्विधा भजंते मां चतुष्प्रकाराः भजंते मां सुकृतिनः अर्जुन आर्तो दुःखी
ज्ञातुमिच्छुर्जिज्ञासुः अर्थार्थी ज्ञानी आत्मवित् भरतर्षभ १६ ॥

रामानुजभाष्यं

सुकृतिनः पुण्यकर्माणो मां शरणमुपगम्य मामेव भजंते ते च सुकृततार
तम्येन चतुर्विधाः सुकृतगरीयस्त्वेन प्रत्यापत्तिवैशेष्याद्भवरोत्तराधिक
तमा भवंतीत्यर्थः आर्तः प्रतिष्ठाहीनो भ्रष्टैश्वर्यः पुनस्तत्प्राप्तिकामः

अर्थार्थी अप्राप्तैश्वर्यकामः तयोरपि भेदमात्रेणैश्वर्यविषय एवाधिकारः
जिज्ञासुः प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुः ज्ञानमस्य स्वरूपमिति जिज्ञासु
रित्युक्तं ज्ञानीयतस्त्वं प्रकृतिं विद्धि मे परामित्यादिनाभिहितं भगवच्छेष
तयैकरसात्मस्वरूपं चित्प्रकृतिवियुक्तकेवलात्मनापर्यवस्यन् भगवन्तमेव
भगवन्तमेव परमप्राप्यमन्वानः १६ ॥

अभिनवगुप्तकृतटीका[illegible]ं १६
एकोनविंशतावुक्तार्थः

परमार्थप्रपाटीका

अथ भजतां सुकृतिनां तारतम्येन चातुर्विध्यमाह चतुर्विधा इति पूर्वजन्म
निकृतसुकृतसमूहाः सुकृतिनो मां भजन्ति तदुक्तं अनेकजन्मसाहस्रै
स्तपोध्यानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत इति
अथो विशेषं चातुर्विध्यमाह तत्रार्त्तो रोगाद्यभिभूतः स यदि पूर्वकृतपुण्य
पुंजस्तदा मां भजति अन्यथा क्षुद्रदेवोपासनेन संसरति ननु भगवतो
मोक्षैकदातृत्वमस्ति ह्यार्त्तादिफलार्थं भजनमसंभावितमिति चेन्न ये
यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति प्रतिज्ञातत्वात् श्रुतिरपि य
दि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव तमाहरामि निर्ऋतेरु
पस्थादस्पार्षमेनं शतशारदायेति भाष्यं क्षितायुरयं मत्समानगजेन्द्रा
दिः परेत इह लोकाल्लोकान्तरं नीतः स्वबन्ध्वादिर्मृत्योरन्तिकं यमसमीपं नी
तः गुरुबालकादिः एवकारेण बुद्धिपूर्वकं नीतो न प्रमादेन तं निष्प्राणे
नेन निर्ऋतेरुपस्थाद्यमसमीपतोऽपि आहरामि गुरुबालकवद्बलात्का
रेणानयामि अथ स पुनरपि मरिष्यतीति चेत्तत्राह एनं मृत्योर्मोचितं पु
रुषं शतशारदाय शतवर्षपर्यन्तं जीवनाय यद्वा शतशब्देनानन्तसंख्या
वाची अनन्तत्वाय अस्पार्षं अभयकरेण स्पृशामि तथा जिज्ञासुरात्मज्ञा
नेच्छुस्तथा अर्थार्थी अर्थमिहामुत्रफलभोगसमर्थं यतेऽस्तथा ज्ञानी आत्मवि
त् ननु आत्मविदः कृतकृत्यत्वात्तेन भजनं कुत इति चेन्न यत्प्रसादा
दात्मतत्त्वोपकारः स कथं ज्ञानिना विस्मर्यते तदुक्तं विस्मर्यते कृतवि
दा कथमानंदबोध इत्यादि १६ ॥

वनमालीटीका

येत्वासुरभावरहिताः पुण्यकर्माणो विवेकिनस्ते पुण्यकर्मतारतम्येन चतुर्वि
धाः सन्तो मां भजन्ते क्रमेण च कामनाराहित्येन मत्प्रसादान्मायां तरन्तीत्याह
ये सुकृतिनः पूर्वानेकजन्मसुकृतपुण्यसंचया जनाः सफलजन्मानस्त एव
ति नान्ये मां भजन्ते सेवन्ते ते चैकोकामत्रयः सकामः आर्तो हि रिपुव्याघ्रव्याध्याद्या
पदाग्रस्तस्तन्निवृत्तिमिच्छन् यथा जरासन्धकारागारवर्त्तिराजानो यथा वा द्यू
तसभायां वस्त्राकर्षणे द्रौपदी च यथा ह ग्राहग्रस्तो गजेन्द्रश्च जिज्ञासुरात्मज्ञाना
र्थी मुमुक्षुर्यथा मुचुकुन्दो जनकः श्रुतदेव उद्धवश्च अर्थार्थी इहामुत्र भोगो व
र्न पकरणेप्सुः तत्रेह यथा सुग्रीवो विभीषणश्च परत्र यथा ध्रुवः एते त्रयोऽपि भग ल
वद्भजनेन मायां तरन्ति तत्र जिज्ञासुस्तु ज्ञानोत्पत्त्या साक्षादेव मायां तरति आ
र्त्तोऽर्थार्थी च जिज्ञासुत्वं प्राप्यैवेति विशेषः आर्त्तस्यार्थार्थिनश्च जिज्ञासु
त्वसंभवाज्जिज्ञासोश्चार्त्तत्वज्ञानोपकरणार्थार्थित्वसंभवादुभयोर्मध्ये जि
ज्ञासुरुक्तः ज्ञानी च ज्ञाने भगवत्तत्त्वसाक्षात्कारेण नित्ययुक्तो य
था सनकादिर्नारदः प्रह्लादः पृथुः शुकश्च अहैतुकप्रेमयुक्तो यथा गोप्यादिर
प्रि क्रूरोऽक्रूरादिश्च सकामः कंसशिशुपालादयस्तु भयात् द्वेषाच्च भगवच्चिन्ता
परा अपि न भक्ताः अनुरक्तेरभावात् १६ ॥

अहमेव जयंतीटीका

एवं दुष्कृततारतम्येन भजनाहीनामपि चतुर्विधतामाह चतुर्विधा
इति हे अर्जुन भवतानेनानेन त्वमपि सुकृती भवसीति सूचितम् सु
कृतिनः पुण्यकर्मवन्तः स्वपाण्डवा वा जनता मदेकशरणा मच्चरणं
प्रपद्य मामेव भजन्ते सेवन्ते च न्यूनाधिकसुकृतत्वेन ते जिज्ञासुरर्थार्थि
ज्ञानिभेदाच्चतुर्विधाः सन्ति तत्रार्त्तः दुष्टबलपीड्यमाने स्वयं प्रति
ष्ठादिभ्यो भ्रष्टः सन्नुत स्तत्त्वनामे कुरुगजेन्द्रादिः अर्थार्थी इहामुत्र
चाप्राप्तभोगैश्वर्यः सन्नुत स्तत्त्वनाम्निकामो ध्रुवादिः जिज्ञासुः केव
लं ब्रह्मज्ञानैसंबन्धरहितानां ज्ञानेच्छुः शौनकविदुरोद्धवादिः ज्ञानी प्र
ति पञ्चद्वयात्मकजगद्भिन्नाभिन्नपरब्रह्मस्वरूपं भगवन्तं सर्वपरं सर्वकार
णं सर्वैश्वर्यं सर्वप्राप्यं मामेव मन्वानः प्रह्लादादिः येषु चतुर्विधेषु
मध्ये आद्यास्त्रयः सकामाः अन्त्यस्तु निष्कामः आर्त्तार्थिभ्यां सका

गी॰
टी॰
स॰

83

मा भजंति तासे श्रेष्ठतां ताभक्तपरं व्याख्यानं यावदष्टमादध्यायमस्य वल्लवनान्त्वा संगतिरंके त्वर्थः १६ ॥

ये त्वासुरभावरहिताः पुण्यकर्माणो

मधुसूदनीटीका

विवेकिनः ते पुण्यकर्मतारतम्येन चतुर्विधाः संतो मां भजंते क्रमेण च कामनारहितास्तेमत्प्रसादात्मायां तरंतीत्याह ॥ ये तु सुकृतिनः पूर्वजन्मकृतपुण्यसंचया जनाः सफलजन्मानस्त एव नान्ये ते मां भजंते सेवंते हे अर्जुन ते च त्रयः सकामा एको काम इत्येवं चतुर्विधाः केन इत्याह आर्तः आर्त्या परिगृहीतो दस्युव्याघ्ररोगादिनाभिभूतस्तन्निवृत्तिमिच्छन् यथा मखभंगेन कुपिते इंद्रे वर्षति व्रजवासी जनः यथा वा जरासंधकारागारवर्ती राजनिचयः द्यूतसभायां वस्त्राकर्षणे द्रौपदी च ग्राहग्रस्तो गजेंद्रश्च जिज्ञासुरात्मज्ञानार्थी मुमुक्षुः यथा मुचुकुंदः यथा वा मैथिलो जनकः श्रुतदेवश्च निवृत्ते मौसले यथा चोद्धवः अर्थार्थी इह वा परत्र वा यद्भोगोपकरणं तल्लिप्सुः तत्रेह यथा सुग्रीवो विभीषणश्च यथा चोपमन्युः परत्र यथा ध्रुवः एते त्रयोपि भगवद्भजनेन मायां तरंति तत्र जिज्ञासुर्ज्ञानोत्पत्त्या साक्षादेव मायां तरति आर्तोर्थार्थी च जिज्ञासुत्वं प्राप्येति विशेषः आर्तस्यार्थार्थिनश्च जिज्ञासुत्वसंभवात् जिज्ञासोश्चार्तत्वज्ञानोपकरणार्थार्थित्वसंभवादुभयोर्मध्ये जिज्ञासुरुद्दिष्टः तदेते त्रयः सकामा व्याख्याताः निष्कामश्चतुर्थ इदानीमुच्यते ज्ञानी च ज्ञानं भगवत्तत्त्वसाक्षात्कारस्तेन नित्ययुक्तो ज्ञानी तीर्णमायो निवृत्तसर्वकामः चकारो यस्य कस्यापि निष्कामप्रेमभक्तस्य ज्ञानिन्यंतर्भावार्थः हे भरतर्षभ त्वमपि जिज्ञासुर्वा ज्ञानी वेति कतमो हं भक्त इति मा शंकिष्टा इत्यर्थः तत्र निष्कामभक्तो ज्ञानी यथा सनकादिः यथा नारदो यथा प्रह्लादो यथा पृथुः यथा वा शुकः निष्कामः शुद्धप्रेमभक्तो यथा गोपिकादिर्यथा वाक्रूरयुधिष्ठिरादिः कंसशिशुपालादयस्तु भयात् द्वेषाच्च सततं भगवच्चिन्तापरा अपि न भक्ता भगवदनुरक्तेरभावात् भगवदनुरक्तिरूपायाः भक्तेः स्वरूपसाधनभेदाः तथा भक्तानामपि भगवद्भक्तिरसायने स्माभिः सविशेषं प्रपंचितं इति नेहोपरम्यते १६ [illegible] ॥

सदानंदीटीका

ये जनाः पुण्यकर्माणो मां परात्मानमीश्वरं भजंते ते महात्मानः संति लोके चतुर्विधाः १ आर्तो व्याध्यादिना ग्रस्तस्तन्निवृत्तीच्छया तत्पीः ग्राह ग्र

ऽनोयथाद्रल्लोयथाचन्द्रगुप्तरात्मजा १ जिज्ञासुरात्मज्ञानार्थीजनकश्चोद्ध
वोयथा परत्रदेहभोगार्थमर्थार्थीसाधनेच्छकः ३ विभीषणश्चसुग्री
वोयथामत्रध्रुवोयथा सकामाश्चत्रयोप्येतेभगवद्भजनेनच ४ तरंति
मायांतत्रापिजिज्ञासुर्ज्ञानलाभतः हीनत्वजिज्ञासुत्वंप्राप्यज्ञानीचेमांत
रंत्यमी ५ आर्त्तस्यार्थार्थिनश्चापिजिज्ञासुत्वस्यसंभवात् जिज्ञासो
र्ज्ञानबोधोपकरणार्थार्थिताभवेत् ६ अनतयोर्द्वयोर्मध्येजिज्ञासुस्तु
हरिणोदितः निष्कामोभजनेज्ञानीविस्मृतात्मावबोधवान् ७ नोयो
मायोयथाव्यासस्सनकादिशुकादयः येमन्नाकेवलनिष्कामोयथाद्व
रोयुधिष्ठिरः ८ ॥ १६ ॥

नीलकंठीटीका

येत्वसत्यपिदेहाद्यध्यासेमनोविभ्रांतिमत्वात्पर्थंसकृत्तमेवाचरंतिते
पिचतुर्विधाः नकेवलंसर्वैमदेककामाइत्याशयेनाह चतुर्वि
धाइति आर्तःपीडितःपीडापरिहारार्थी जिज्ञासुःस्वात्मानना
र्थी अर्थार्थीधनार्थी ज्ञानीचेतिचतुर्विधामांभजंते १६ ॥

येत्वसच्चोद्दकाःशरणीभवंति तान्वह॥

आनंदीटीका

तद्भक्तिनोदमदानयज्ञात्स्वाध्यायतपःप्रभृतिनिष्ठोभजंतेसात्विकंक
मैरजस्तमसोः ह्रासार्थंप्राकृतवंतो ६ घचऊवोणाः चतुर्विधाः
चत्वारः आर्तजिज्ञासामद्रुपदेशानुशीलनतत्त्वावबोधरूपाः
विधाः ब्रह्मप्राप्तिसाधनप्रकाराः येषांईदृशानांजनानांमांपरमेश्वरं
भजंतेउपासनाविषयीकुर्वंति तानेवगणयति आर्तःदुःखत्रया
भिघातवेदनावान् १ जिज्ञासुःवेदनांतरंतद्रूपणमहेतुस्ताना
यगुरुंसमभ्येतः २ अर्थार्थी गुरुणोपदिष्टस्यार्थस्यज्ञःशोपण
महेतोःवस्तुनः अर्थीप्रेप्सुः सद्गुपदेशामत्रशीलयन्नित्यर्थः
अर्थार्थिनायाःसद्गुपदेशानुशीलनंपर्यायः ३ ज्ञानीएवंक्रमेण
प्राप्तपरमात्मस्वरूपश्चेतिचकारःसमुच्चयेज्ञःदुःखत्रयाभिघातवेदना
वत्त्वादारभ्यनिसमुदितोपायोपेयत्वेपरमात्मबोधप्राप्ताः सा
त्विकादेवभावभाजोमांपरमात्मत्वेनअयंतीत्यर्थः तदेवमार्ता
दीनांचतुर्णामपिप्रकाराणांब्रह्मप्राप्तिसाधनत्वेपितेषांउपायत्वंतत्व

गी॰ टी॰ स॰

84

व्यक्तत्वेनदृष्टगार्तादिभूतत्वेन तथाचोद्देशपर्वणीतद्विद्धिप्रणिपाते
नपरिप्रश्नेनसेवयेत्यत्रायमेवाभिप्रायः तथाहिलोके यथवरो
गेणार्त्तैः स्वयंवरोगोपशमोपायंवैद्यंपृच्छंति वैद्योपदिष्टंरोगोपशाम
नमर्थमनुशीलयन्नारोग्यंभजते [illegible]
[illegible]
[illegible]
[illegible] ॥

रामकंठीटीका

अनुगृहीतत्वेसाम्येपिप्रश्नदृष्टेहेतुतीव्रत्वादिनातन्म्याश्चतुर्विधाः
अनुनविभागेनचतुष्प्रकाराजनामांभजंते मद्भक्ताभवंत्यतएव
तेसुकृतिनस्तेषांचतुर्विधंकथयति आर्तइत्यादिना तत्रार्त्तोमां
भजते योत्यंततरमदनुग्रहमहौषधेनविशीर्यमाण संसारमोह
सन्निपाततयाविरक्तस्तेवपुनापन्नदुःखत्रयवेदनाकदर्थ्यमानमा
नसस्तन्निवृत्तिनिमित्तंसकललोकप्रसिद्धतत्तत्काशादिस्थलो
पायसमाश्रयणेनमद्भक्तोभवति १ ततःक्रमेणवृध्यमानसंवेगः
लेशावर्णाजिज्ञासुर्यःसमुपजायमानजगज्ञावहेयोपादेयविचा
रः संकोहंकिमिदंदेहेंद्रियविषयादिमयमहामोहजालकथ
मतोबंधनात्परिमुच्येयेतितत्त्वंज्ञातुमिच्छुर्नानाशास्त्रशुश्रूषाश्र
वणादिभिर्युक्तमतिःतदुपायपरमेवमत्सपर्यापरोभवति २
अनएवतत्त्वजिज्ञासाभिनिवेशप्रकर्षादाविर्भवद्विवेकवासनालो
कविलीयमानविपर्ययप्रत्ययतीव्रतिमिरत्वात्प्रथमानयथास्थि
तहेयोपादेयपदार्थप्रविभागोर्थार्थीमांभजते यःप्राप्यभासवशा
त्प्रत्ययनिश्चयःसन्निदमेवपरमंफलंतत्प्राप्त्युपादेयतयात्मतत्त्वल
क्षणमर्थंवस्त्वर्थयतेभिकांक्षयति ३ ततोज्ञानीमांभजते यः
सकलविचिकित्साविकूटविश्रांतमतिःस्वीकृतयथोक्तज्ञानल
क्षणपरमोपायः सन्त्यक्तसकलपमव्यवधानेनमामेवोपास्ते
[illegible] ॥

लास्तिकी [illegible]मीटीका

तेच सुकृततारतम्येन चतुर्विधा इत्याह ॥ ये पूर्वजन्मसु कृतपुण्या ज
नास्ते मां भजंते ये तु मां भजंते ते ते सुकृतिन इति वा ते च चत्वारः आर्तो
रोगाद्यभिभूतो मत्प्रसंगेन उपिते ईश्वरजनवासी जनो यथा स यदि
पूर्वं कृतपुण्यस्तर्हि मां भजते अन्यथा क्षुद्रदेवताभजमानः संसर
ति एवमग्रेऽपि द्रष्टव्यं जिज्ञासुरद्वैतलक्षणज्ञानार्थी मम
त्त्वं यथा मुचुकुंदादि अर्थार्थी अत्र वा परत्र वा भोगसाधनभूता
र्थलिप्सुर्यथा विभीषणध्रुवादिः ज्ञानी भगवत्तत्त्वसाक्षात्कारवा
न्यथा नारदशुकादिः १६ ॥

पंचोलीटीका

ये पुनः सुकृतिनो भजंति तेषां चातुर्विध्यमाह चतुर्विधेति हे
अर्जुन च पुनः चतुर्विधाः सुकृतिनो नरोत्तमाः मां भजंति हे भर
तर्षभ तान्निबोध जानीहि आर्तः अधिदैविकादि दुःखत्रयपरिप्लुत :
जिज्ञासुः आत्मस्वरूपं ज्ञातुमिच्छुः अर्थार्थी धनकामः ज्ञानी वि
द्वांस्तत्त्ववित् १६

रसवीरसमिद्धोधिनी ॥

केऽपि न त्वां प्रपद्यंते ततोऽस्मात् पुरुषा मायार्णवाज्जोत्तीर्णा भवंती
ति तान्नाह चतुर्विधा इति सुकृतिनः प्राग्जन्मार्जितपुण्यराशि
शालिनो जना मां भजंते पारंगं कुर्वते ते च सुकृततारतम्या
च्चतुर्विधाः चातुर्विध्यमेव दर्शयति आर्त इत्यादिना आर्तः प्रा
क्कृतविघ्नकारणाभिभवेनातुरः जिज्ञासुः मुक्त्युपायज्ञानवि
षयेच्छावान् अर्थार्थी पुरुषार्थचतुष्टयाकांक्षी ज्ञानी प्राप्ता
चार्योपदिष्टेऽर्थे दृढनिश्चयवान् १६ ॥

मध्वभाष्य

१६ ॥

85

भाषाअनुवाद

सत्कर्मकारी मनुष्यही मेरी भजन करते है और वे भी पुण्यके न्यून अधि वर्णते चारि प्रकार के है सोई कहतेहै कि हे अर्जुन जो पूर्व जन्म अवधि पुण्यवानहै तेई हम को भजते है चारि प्रकार भक्तये है प्रथम आतर कहे रोगग्रस्त दूसरा जिज्ञासकहे आत्मज्ञान की इच्छाहै जि से तीसरा अर्थार्थी अर्थात् लोक यापर लोक का भोग साधन अर्थाकांक्षी चौथा ज्ञानी है पर ये चारो पूर्वपुण्य के प्रभाव होनेसे भजते हैं नहीं तोऔर और देवता कीभक्ति करि अपना काम निकारलेते पर वहकाम काम नहीं है १६ ॥

दोहा

चारविधि मोहि भजत जन हे पार्थ सुकृती सोय दुखी जिज्ञासु
प्रयोजनी ज्ञानी भरत वर सोय १६॥

86

तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते प्रियोहि
ज्ञानिनोऽत्यर्थमहंसचममप्रियः १७ ॥

शांकरभाष्यं

तेषामिति तेषांचतुर्णांमध्ये ज्ञानीतत्त्ववित्तत्त्वविन्नित्ययुक्तो भवत्येकभ
क्तिश्चान्यस्यभजनीयस्यादर्शनादतः सएकभक्तिर्विशिष्यते विशेष
माधिक्यमापद्यते अतिरिच्यत इत्यर्थः प्रियोहि यस्मादहमात्मा ज्ञा
निनोऽतस्तस्याहमत्यर्थं प्रियः प्रसिद्धं हिलोकेआत्मा प्रियोभवति
इतितस्मात् ज्ञानिन आत्मत्वाद्वासुदेवः प्रियोभवतीत्यर्थः सचज्ञा
नीममवासुदेवस्यात्मैवेति ममात्यर्थंप्रियः १७ ॥

आनंदगिरिकृतटीका:

चतुर्विधानांतेषांसुकृतिनां भगवदभिमुखानां तत्परत्वमाशंक्याह
तेषामितितस्य विशिष्यमाणत्वे हेतुमाह प्रियोहीति नित्ययुक्तत्वं
भगवत्यात्मनिसदासमाहितत्वं तचेतत्वं असारेसंसारेभगवानेवसारः
सोहमस्मीत्येकस्मिन्नद्वितीये स्वस्मादत्यंतमभिन्नेभगवति भक्तिः
स्नेहविशिष्योऽस्येत्येकभक्तिः तस्याधिक्ये हेतुंविवृणोति प्रियोहीत्या
दिना भगवतोज्ञानिनश्च परस्परं प्रेमास्पदत्वे प्रसिद्धंप्रमाणयति प्र
सिद्धंहीति आत्मनोज्ञानिनंप्रति प्रियत्वेपिभगवतो वासुदेवस्यकथं
तं प्रति प्रियत्वमित्याशंक्याह तस्मादिति अहंज्ञानिनो निरुपाधि
कप्रेमास्पदं परमपुरुषार्थत्वेनात्मत्वेनचशेषहीनत्वादित्यर्थः ज्ञानि
नोपि भगवंतं प्रतिप्रियत्वं प्रकटयतिसचेति १७ ॥

तेषांचमध्येज्ञानीश्रेष्ठइत्याह ॥ स्वामिकृतटीका

तेषांमध्येज्ञानीविशिष्टः तत्रहेतवःनित्ययुक्तः सदामन्निष्ठः एकस्मि
न्मय्येवभक्तिर्यस्यसः ज्ञानिनोदेहाद्यभिमानाभावेनचित्तविक्षेपाभावा
त् नित्ययुक्तत्वमेकांतभक्तिश्चसंभवति नान्यस्यअतएवहितस्याह
मत्यंतंप्रियः सचममतस्मादेतैर्नित्ययुक्तत्वादिभिश्चतुर्भिर्हेतुभिः
सउत्तमइत्यर्थः [illegible]

पैशाचभाष्यं

गी. टी. स. तेषां मध्ये ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते श्रेयान् प्रियो हि ज्ञानिनोऽत्यर्थं अतिशयेन अहं स च मम प्रियः १७

87

रामानुजभाष्यं

तेषां ज्ञानी विशिष्यते कुतः नित्ययुक्तः एकभक्तिरिति च तस्य हि मदेकप्राप्यस्य मया योगो नित्यः इतरेषां तु यावत्स्वाभिलषितप्राप्ति मया योगः तथा ज्ञानिनो मय्येकस्मिन्नेव भक्तिः इतरेषां तु स्वाभिलषिते तत्साधनत्वेन मयि च अतः स एव विशिष्यते किं च प्रियो हि ज्ञानिनोऽत्यर्थमहमिति अत्रात्यर्थशब्दोऽभिप्रेतवचनः ज्ञानिनोऽहं यथा प्रियः तथा मया सर्वज्ञेनापि सर्वशक्तिनाप्यभिधातुं न शक्यत इत्यर्थः प्रियत्वसैयत्तारहितत्वात् यथा ज्ञानिनामग्रेसरस्य प्रह्लादस्य तत्त्वासक्तमतेः कृष्णसंदश्यमानो महोरगैः न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थित इति सोऽपि तथैव मम प्रियः १७ ॥

अभिनवगुप्तकृतटीकाऽव्याख्यानं १७

एकोनविंश तावुक्तार्थः

परमार्थप्रपाटीका

तेषामिति तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् एकभक्तिरव्यभिचारिण्या भक्त्या युक्तो विशिष्यते विशेषं प्राप्नोति यावत्पर्यन्तं जीवः मुक्तो न भवति तावत्पर्यन्तं सिद्ध्यादिविघ्नाभावमहिम्ना भक्तिं न त्यजतीत्यर्थः अथ तस्य प्रेमाणं वर्णयमाह प्रिय इति हीति निश्चयेन ज्ञानिनः पुरुषस्य अहमत्यन्तं प्रियः निरतिशयप्रेमास्पदं श्रुतिरपि तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा तथा आत्मनस्तु कामाय सर्वं प्रियं भवतीति स्पष्टार्थं अपरं सोऽपि मम प्रियः अवग्राह्यत्वात् [illegible] [illegible] १७ ॥

वनमालीटीका

निष्कामतया मत्प्रतिप्रेमयुक्ततया तेषु ज्ञानी श्रेष्ठ इत्याह तेषामिति

चतुर्विधानां मध्ये ज्ञानी महत्साक्षात्कारवान् नित्ययुक्तो मयि रागिणां विषये
ष्विव नितरां तरां विहीनसमाहितचित्तवृत्तिः एकभक्तिः सर्वोत्तमत्वधीर्एवं
तृषा^ कारविचित्राखेह प्रवाहरूपकाम्यामयि भक्तिर्यस्य सः यद्वैकस्मिन्नेव म
यितादृशी भक्तिर्यस्य सः विशिष्यते निरिच्यते सर्वोत्कृष्ट इत्यर्थः हि
त^ यस्मात्सकलसमर्थो हि कपार्थैकभोगतः यागादिनापि प्रेमतया मयि
तैलधारावदविच्छिन्नवृत्तिर्ममातिप्रियः अहमपि परमानंदतया ति
स्नेहतया ज्ञानस्य प्रियः प्रतिशादेवोत्तमिथेयर्थसिपूरः ज्ञातीप्रयथाम ना^
मप्रियोहं च तस्यापि प्रयत्नस्य मया सर्वं तेन वक्तं न प्रकाशते न तु मया इय
त्तायामभावेन नतान्तं ममसर्वं तस्यापि ता नास्तीत्यर्थः १७ ॥

उत्तमैवेनयंनीटीका

नन्वेतेषां चतुर्विधानां भक्तानां मध्ये कश्चिदपि विशेषोऽस्त्यथवा सर्वेऽपि
समाना भवंतीत्यपेक्षायां त्रिविधेभ्यो ज्ञानिनो वैशिष्ट्यमाह तेषां ज्ञा
दि^ नीति तेषामार्तांश्च चतुर्विधानां मध्ये ज्ञानी जीवेश्वरस्वरूपावगमादिया
थात्म्यज्ञानवान् विशिष्यते विशेषो भवति कस्मादेवं यतो नित्ययुक्तः
नित्यमेव सत्त्वस्थः वियोगाभावो सर्वस्मिन्काले एव परमपुरुषेण मया
सह युक्तो योगवान् यथा प्रह्लादस्तज्ज्ञं परा पौरुषेणास्मा सक्तमतिः
क्लिश्यमानो महारोगैः न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः
इति यात्रिस्तज्ञः स एकाले एव मां स्मरति न तु सएवकाले तत्राड्वादयं
श्रेष्ठतमः न देवज्ञानो यन एकभक्तिः एकस्मिन्नेव सर्वेश्वरे मयि भक्तिः
सेवा यस्य स तथा जिज्ञासस्तु मां ज्ञातुमिच्छामेव करोति न तु जिज्ञास
या सर्वोत्तममेकं मां निश्चित्य सेवते तो जिज्ञासोः सकाशादप्यसौ श्रेष्ठः
न देवत्वज्ञेनायस्मात् ज्ञानिनः स्वपरस्वरूपज्ञानवतो जनस्यात्यर्थं नि
रतिशयं यथास्यात्तथाहं सर्वेश्वरः प्रियः सर्वसंबंधावच्छिन्नेनात्मा
त्मीयादिभावेन साधनसाध्यादिरूपेणानिरतिशयसाम्यशून्यत्वेन
सर्वशरीरकत्वेन चाहमेव प्रियः प्रेष्ठतमो भवामि अर्थार्थी न यावद
र्थप्राप्तिस्तावदेवं स्मरति न तत्प्राप्त्यनंतरं न तु चिन्तां चित्तस्यार्थवदा
हमत्यर्थं प्रियो न भवाम्यतो ऽर्थार्थिनः सकाशात् ज्ञानी श्रेष्ठ इत्यर्थः
हि यस्मादेवं तस्मादेव मम सर्वेश्वरस्यापि स च ज्ञानी सततं प्रियो भव

88

तीतेषु यस्तत्कामः स मय एव मम प्रियो भवति न तु सततमित्यर्थः १७

मधुसूदनीटीका

चतुर्विधानामपि सुकृतित्वे नियते पि सुकृततोधिको न निष्कामतया प्रेमाधिक्यात् ॥
चतुर्विधानां तेषां मध्ये ज्ञानी तत्त्वज्ञानवान् निवृत्तसर्वकामो विशिष्यते स-
र्वतोऽतिरिच्यते सर्वोत्कृष्ट इत्यर्थः यतो नित्ययुक्तः भगवति प्रत्यगभि-
न्ने सदा समाहितचेता विक्षेपकाभावात् अत एवैकभक्तिः एकस्मि-
न् भगवत्येव भक्तिरनुरक्तिर्यस्य स तथा तस्यानुरक्तिविषयांतराभावा-
त् हि यस्मात् प्रियो निरुपाधिप्रेमास्पदम् अत्यर्थम् अत्यंतातिशयेन ज्ञानि-
नोऽहं प्रत्यगभिन्नः परमात्मा च तस्मात् स च मम परमेश्वरस्य प्रियः आ-
त्मातिशयेन प्रियो भवतीति श्रुतिलोकयोः प्रसिद्धमेवेत्यर्थः १७
[illegible] ॥

सदानंदीटीका

तेषां चतुर्विधानां च मध्ये तत्त्वविज्जनः निवृत्तसर्वकामत्वात् सुकृता-
धिक्यहेतुना प्रेमाधिक्यान्मे चोत्कृष्टः सर्वतः संमतो मम यतो भगवत्प्र-
त्यगभिन्नभ्रांतिहीनतः १ समाहितमना नित्यं विक्षेपाभावतो बुधः
एकस्मिंश्चिद्घने शुद्धे भगवत्येव यस्य हि ३ सदानुरक्तिरत्यंततापरप्रेमा-
स्पदत्वतः विषयांतरबाधाच्च तास्यैत्यविषये रतिः ४ निरुपाधिपरप्रे-
मास्पदत्वेन प्रियोस्य च ज्ञानिनः परमात्माहं प्रत्यगभिन्न आंतरः ५
ततोत्यर्थं स च ज्ञानी प्रियो भगवतो मम प्रियो ह्यात्मास्ति सर्वस्य लोक-
वेदप्रसिद्धितः ६ ॥ १७ ॥

नीलकंठीटीका

किं सर्वेपि समा एते सुकृतिन इति साधारण्येन विशेषणात् नेत्याह तेषा-
मिति तेषां मध्ये ज्ञानी विशिष्यते यतो नित्ययुक्तः आर्तादयो हि कामि-
नः कामहेतोर्न मद्भजने युक्ता भवंति अयं तु नित्ययुक्त एकभक्तिश्च एक-
भावेन भजनं करोति तथा हि आर्ता रोगिणः सूर्यं भजंते जिज्ञासवः स-
रस्वतीं अर्थार्थिनः कुबेरादीनिति तेषां तत्तत्कामार्थित्वेनानेकभक्तित्व-
मुपपन्नेन तस्य नित्ययुक्तत्व एकभक्तित्वे च हेतुः हि यतः ज्ञानिनोऽहम-
त्यर्थं प्रियः आत्मत्वादेव आत्मा च प्रियः निरुपाधिप्रेमगोचरत्वात्

नदेनस्प्रियः मत्तात्प्रियोन्यस्मात्सर्वस्मादांतरं यदयमात्मेति श्रुतेश्च सचज्ञानी
ममप्रियः भक्तानांफलंभक्तत्वादितिभावः १७ ॥

तेदेवमार्त्तादीनां चतसृणमपि विधानां भाष्यपायानां परा काष्ठा ब्रह्मप्राप्तादयम् मधुदितानामेकश्रुत्याश्रयं नो हृदकृतिश्चलेसत्यपिसर्वे वहितश्चपायेज्ञानप्राप्तिमत्वाज्ञानिनमेवसर्वोत्कर्षं णस्तौति ॥

आनंदीटीका

ज्ञानीपरमात्मबोधवान् ज्ञाननिष्ठांप्राप्तोतएवैकस्मिन्परमेश्वरेएवभक्तिः
संप्राप्त ज्ञानेनतत्वानांविवर्जितासक्तोयस्य सनित्यमविच्छेदेनयुक्तः परमे
श्वरेएवसमाहितचित्तः तेषामार्त्तादीनांमध्याद्विशिष्यतेहियस्मादहं
ज्ञानिनोत्यर्थंप्रियः सर्वसंसारप्रपंचंपुत्रदारधनादिकंइंद्रियवर्गा
दिकंचपरित्यज्यमदङ्गत्वावेवयत्नवत्वात् अतएवंभूतोज्ञानीममप्रियः
[illegible]

रामकंठीटीका

उक्तेषु [illegible] षां चतुर्णांमध्येज्ञानिनः प्रकर्षं प्रतिपादयितुमाह ॥

तेषामार्त्तादीनांमध्येज्ञानीयथोक्तबोधवान्विशिष्यतेयतोसौसर्वतःस्थू
लात्सूक्ष्माच्चविनिवृत्तोपादेयप्रतिपत्तिः परात्मपायकाष्ठामधिरूढो
नएववेदैकैकस्वभावएकस्मिन्नपिपरेस्मिस्तत्वेभक्तिमानतएवनि
त्ययुक्तः सर्वावस्थास्वविच्छिन्नसमाधानोयस्मात्तस्यैवविधज्ञानिनो
हमत्यर्थमखिलपदार्थसार्थपरिहारेणप्रियः प्रीतिकारणंसचापित
थैवममप्रियः इतिव्यतिरेकप्रतिपादनपरमेतत् [illegible]
[illegible] १७ ॥

नासिकी [illegible]टीका

तेषांमध्येज्ञानीश्रेष्ठइत्याह ॥ तेषामार्त्तादीनांमध्येयथोक्तज्ञानवान्विशि
ष्टेनश्रेष्ठोभवति तत्रहेतवः नित्ययुक्तोनित्यंप्रत्यगात्मनिसमाहितः त
थैकभक्तिरेकस्मिन्नपीश्वरेवभक्तिः रतिरनुरक्तिर्यस्यसः ज्ञानिनोदेहाद्यभि
मानाभावेनचित्तविक्षेपकाभावान्नित्ययुक्तत्वमेकांतभक्तिश्चसंभवतिना
न्यस्य यतस्तस्यज्ञानिनोहंप्रत्यगभिन्नः परमात्मेश्वरोत्यर्थंप्रियोनिरुपाध्य
[illegible] प्रेमास्पदं सचममेश्वरस्यप्रियः १७ ॥

पंचोलीटीका

तेषांचतुर्णांमध्येज्ञानीश्रेष्ठइत्याह तेषामिति तेषांचतुर्णांमध्येज्ञानी
तत्ववित् नित्ययुक्तःसदामत्परःमय्येकभक्तिर्विशिष्यतेअधिकोभवा
ति हियस्मादहंज्ञानिनोआत्मातस्मादत्यर्थंप्रियःसचज्ञानीममात्मेति

रत्नावीरसमिह्लोधिनी॥

एतेषां चतुर्णामपि मध्ये ज्ञानी श्रेष्ठः स्यात् तेषामिति तेषां चतुर्णा
मपि मध्ये ज्ञानी श्रेष्ठः स्यात् तेषामिति तेषां चतुर्णां मध्ये ज्ञानी दृ
89 ढनिश्चयवान् नित्यं सर्वास्ववस्थासु युक्तः स्वोचितकर्मणि प्रवृ
त्तिमान् एकभक्तिः एकस्मिन्नपीश्वरे भक्तिर्यस्य सः परमेश्वरए
वास्मिन्नपारे दुःखसागरेत्रहलः कर्णधार इति निश्चयवानित्यर्थः
विशिष्यते आर्तादित्रयात्सकाशाद्धि विशिष्टो भवति हि यतः ज्ञानिनः
पूर्वोक्तलक्षणस्य दृढनिश्चयात्मकबुद्धिविशिष्टस्याहमत्यर्थं प्रियः
परमप्रेमास्पदमस्मि मत्प्रीणनार्थमेव दृष्टादृष्टे कर्मणि प्रवृत्तत्वादि
तिभावः स च ज्ञानी मम प्रियः परमप्रेमास्पदमस्ति दुःसाध्यमपि
कार्यं तस्य साधयामीति भावः १७॥

मधुभाष्य

१७॥

भाषानुवाद

परंतु इनके मध्यमे ज्ञानी भक्त श्रेष्ठहै सोई कहते है कि ज्ञा
नी पुरुष नित्य युक्त अर्थात् सर्वदाही मेरेमें निष्ठ रहता है
और केवल हमारा ही एक भक्त और ज्ञानी को शरीर आ
दिमे अहं बुद्धिका अभाव रहने से मनकी विक्षेप शक्तिके
अभावसे नित्ययुक्तत्व उसकोहै और इस ज्ञानी को हम अ
त्यंत प्रिय है और वहभी हमको अति प्रिय है इन कारणों
से ज्ञानी भक्त उत्तम है १७ ॥

दोहा

ज्ञानी तिनमें युक्त नित है एकभक्ति विशेष मेहों ज्ञानी कोप्रि
य अतिप्रिय मोहि सोलेष १७॥

9°

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं आस्थितः स हि
युक्तात्मा मामेवानुत्तमां गतिं १८ ॥

शंकरभाष्यं

न तर्हि आर्तादयस्त्रयो वासुदेवस्याप्रियाः न किं तर्हि उदाराइति उदारा
उत्कृष्टाः सर्व एवैते त्रयोपि मम प्रियाः एवेत्यर्थः नहि कश्चिन्मद्भक्तो
मम वासुदेवस्याप्रियो भवतीति ज्ञानी त्वत्यर्थं प्रियो भवतीति विशे
षः तत् कस्मादित्याह ज्ञानी त्वात्मैव नान्यो मत्त इति मे मम मतं निः
श्चयः आस्थितः आरोढुं प्रवृत्तः स च ज्ञानी हि यस्मादहमेव भगवान्
वासुदेवो नान्योस्मीत्येवं युक्तात्मा समाहितचित्तः सन् मामेव परं
ब्रह्म गंतव्यमनुत्तमां गतिं गंतुं प्रवृत्त इत्यर्थः १८ ॥

आनन्दगिरिकृतटीका

ज्ञानी चेदत्यर्थमीश्वरस्य प्रियो भवति न तर्हि विशेषणसामर्थ्यादितरेषा
मप्रियत्वं प्राप्तमिति शंकते न तर्हीति नेषां भगवंतं प्रति प्रियतम
त्व विवक्षितमित्याह नेत्य त्यर्थमिति विशेषणस्य तर्हि किं प्रयोज
नमिति पृच्छति किं तर्हीति सर्वेषां भगवद्भक्तत्वाविशेषेपि ज्ञानि
ति न तदतिरेकमंगीकृत्य विशेषणमित्याह उदारा इति किं तत्र प्रमाण
मित्याशंक्य ईश्वरज्ञानमित्याह मे मतमिति ज्ञानी त्वात्मैवेत्यत्र हेतु
माह आस्थित इति सर्वथा हस्य ज्ञानिव्यतिरिक्तविषयत्वमाह त्रयो
पीति ज्ञानिव्यतिरिक्तानां भगवदपि भक्तत्वेपि ज्ञानाभावादप्राधान्य
भगवत्प्रीतिविषयत्वेत्याशंक्याह नहीति कस्तर्हि ज्ञानवति सति
विशेषस्तत्राह ज्ञानी त्विति तमेव विशेषं प्रश्नपूर्वकं प्रकटयति क
स्मादित्यादिना सर्वमात्मानं पश्यतोपि प्रपद्यमानः तस्य नव क
थं यथोक्तो निश्चयः स्यादित्याशंक्याह आस्थित इत्येतद्व्याकरोति आरोढु
मिति आरोहे हेतुं सूचयति स च ज्ञानीति आरोढुं प्रवृत्तमेव स्फुट
यति मामेवेति १८ ॥

स्वामिकृतटीका

तर्हि किमितरे त्रयस्त्वद्भक्ताः किं संसरंति नहि नहीत्याह ॥
उदारा इति सर्वेप्येते उदाराः महांतः मोक्षभाजः एवेत्यर्थः ज्ञानी तु नामे

गी॰ टी॰ स॰

91

वेति मे मतं निश्चयः हि यस्मात्स ज्ञानी युक्तात्मा मदेकचित्तः सन् न विद्यते उ
त्तमा यस्यास्तामनुत्तमां गतिं मामेवास्थितः आश्रितवान् मद्व्यतिरिक्तम
न्यत्फलं न मन्यत इत्यर्थः [illegible] १८ ॥

पैशाचभाष्यं

उदारा उत्कृष्टाः सर्व एवैते आर्तादयः ज्ञानी तु आत्मा अहमेवेत्यभिप्रायः
आस्थितः संप्राप्तः स हि ज्ञानी युक्त एकाग्रचित्तः मामेवानुत्तमां गतिं १८

रामानुजभाष्यं

उदारा इति सर्व एवैते मामेवोपासन्त इत्युदाराः वदान्याः ये मत्तो यत्किं-
चिदपि गृह्णन्ति हि मम सर्वस्वदायिनः ज्ञानी त्वात्मैव मे मतः तदायत्तधार
णोऽहमिति मन्ये कस्मादेवं यस्मादयं मया विनात्मधारणासंभावनया
मामेवानुत्तमं प्राप्यमास्थितः अतस्तेन विना ममाप्यात्मधारणं न संभ
वति ततो मम आत्मा हि सः १८ ॥

श्रीअभिनवगुप्तकृतटीकाऽभावात् १८ एकोनविंशतावुक्तार्थः

तर्हि किमितरे त्रयस्त्वदुक्ताः संसार परमार्थप्रपाटीका त्रिनहि नहि इत्याह उदारा इति

आर्तादयस्त्रयोऽपि उदारा मदर्पणपरास्ततो मोक्षभागिन एव भवंति ज्ञा
नी त्वात्मैव मत्स्वरूप एवेति मन्मतं सर्वविज्ञानां मूर्ध्नि पदं दत्त्वा मद्भा
वमागत इत्यर्थः श्रुतिरपि एतत्प्राह यएवं वेदाहं ब्रह्मास्मीति स इद
ं सर्वं भवतीति तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवतीति
भाष्ये यः ब्रह्माहमस्मीत्येवं वेद स इदं सर्वं भवति सर्वात्मको भवती
त्यर्थः हीति निश्चयेन तस्य ह हि तस्य अभूत्यै अनैश्वर्याय पश्चवेदना एव देवा
इंद्रादयोऽपि तस्य ईशते समर्था न भवंति अतः एषामिंद्रादीनामपि स आ
त्मान्तर्यामित्वेन प्रवर्तको भवतीत्यर्थः एवं स युक्तात्मा उत्तमः मामेवानु
त्तमां गतिं आत्मनि करिती स्वरूपं आस्थितः आश्रितः १८ ॥

वनमालीटीका

किमार्तादयस्तव न प्रिया इत्यत आह उदारा इति एते आर्तादयः सकामा

अपि मद्भक्ताः सर्वे भृदारा एवोत्कृष्टा एव पूर्वजन्मार्जितानेकसुकृतरा
शित्वात् अन्यथा हि मामेव न भजेयुरेवार्तस्य जिज्ञासोरर्थार्थिनश्च मद्वि
त्वस्याद्वन्द्वदेवताभक्तस्यापि वज्ञलम्यफलेभात् अतो मम प्रिया एवैतेन
हि सर्वोऽप्यपेक्षज्ञानवान् वा ज्ञो वा कश्चित् अपि भक्तो मम अप्रियो भवति
किंतु यस्य यादृशी मतिः उदासीनस्य सर्वत्र समस्यापि मम तादृशी प्रीति
रिति स्वभावसिद्धमेतत् तत्र सकामानां त्रयाणां काम्यमानं प्रियमहं
च प्रियो ज्ञानिनस्तु प्रियान्तरस्याभावात् अहमेव निरतिशयप्रियो मम अपि
तद्ब्रह्मज्ञानादिसर्जनादिव्यासक्तस्यापि स एव निरतिशयप्रियः तेन म
पि स्वकर्मणा कोऽन्यथा मम कृतज्ञता न स्यात् यथा हि यदेव विद्यया क
रोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीत्यत्र तरवर्थस्य विवक्षित
त्वाद्विद्यादिकं विनापि कृतं कर्म वीर्यवत् भवत्येव तथात्वर्थे ज्ञानी
भक्तो मम प्रियइत्यत्रेऽत्यर्थोक्तेर्न व्यतिरेकेणाभक्तः सोऽपि प्रिय इत्यर्थो वा
स्त्येव प्रागुक्तान्यर्थानि तिविशेषणस्य विवक्षितत्वात् उक्तं हि ये यथा
मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति ज्ञानी त्वात्मैवात्मवत् मम प्रिय
इति मतं समतं हि यतः स युक्तात्मा मामेव मद्यतिस्समाहितचित्तः सन् मां सर्वश्रे
ष्ठं परमानंदमूर्तिमनंतं मां सर्वोत्कृष्टां गतिं गंतव्यं परमं फलमास्थितः प
रमफलत्वेन स्वीकृतवान् मद्भिन्नं किमपि फलं न मन्यत इत्यर्थः १८

उतमवैजयंतीटीका

ननु यद्यन्यर्थे ज्ञानी ते यावत् अप्रियः स्यात् आर्तादयो न स्युः न हि तेषां त्रयाणां त
त्प्रियत्वाभावे ज्ञानित्वेपि न स्यादिति चेत्तमेव मा शंकेथाः सर्वेपि मोक्ष
भाजः स्युः अत आह उदारा इति यतो आर्तादयः सर्वे एव उदारा दानशीला महान्तो
वा उदारो दातृमहतोरिति निरुक्तात् मम मद्भक्तानां वा राधनार्थं स्वदेहाप
त्यादिपालनार्थं वा यत्किंचिद्द्रव्यादिकं मत्तो ग्राह्य पाश्लानि ते न
स्वं स्वं मह्यमेव प्रयच्छन्ति स्वत्वाभिमानशून्यात्वात्तेऽपि मम प्रिया वा लिप्रभ
तयो भवन्तीत्यर्थः स्वस्यात्यर्थे ज्ञानी मे मम आत्मैव प्राण एवेति मे मतं निश्च
यः यथा लोके प्राणाधीनं शरीरधारणं तथाहमपि तदधीनधारणोऽस्मि
मल्लाभस्याधीनो भूत्वा लब्धोऽहं माविरभूवमित्यर्थः यद्वा ज्ञानी मे
आत्मा मतः यथा लोके मनसैव प्रवृत्तिं निवृत्तिं च प्राप्नोति तन्नाहं तथा च

गी॰ टी॰ स॰

व्याकुलो भवति न तथाहमपि यद्वा ज्ञानी मे आत्मा शरीरं यथा जीवः शरीरे ति
ष्ठन् तत्त्वज्ञानप्रकाशादिकं प्रकटयति तथाहमपि तस्मिन्स्थित एव ऐश्वर्या
दिकं प्रकटयाम्यन्यथा नेत्यर्थः नन्वेवमेव कुत इत्यपेक्षायामाह आस्थि
तः इति हि यस्मात्स युक्तात्मा मद्युक्तमनाः मामन्तरेण व्याकुलो भूत्वाहम
पि प्राणधारणासमर्थः न देवकृतो युक्तः अनुत्तमां नास्त्युत्तमा यस्याः सा अनु
त्तमा तां गतिं प्राप्यरूपं मामास्थितः निश्चयं कृत्वाश्रितवान् मदन्यत्तत्त्व
मफलं न किंचिन्मन्यते अतस्तं विनाहमपि लवमात्रमपि स्थातुं न श
क्नोमि न स्यां ममात्मैवेत्यर्थः केचित्तु ज्ञानी आत्मैव न मतो न किंतु
त्वमेव स इति व्याख्यां कुर्वन्ति तत्तु युक्तात्मा मामास्थित इति विशेषणयो
वैयर्थ्यात् इतस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतामित्याद्युक्तविरोधा
ज्जीवेश्वरभेदकप्रतिपादकवाक्यसहस्राणां अजो ह्येको जुषमाणो
नुशेते द्वा सुपर्णा सयुजा सखायो नित्यो नित्यानां चेतनश्चेतनानामि
त्यादीनां व्याकोपाच्च न चाभेदवाक्यानां का गतिरिति वाच्यं परमेश्व
रजीवस्वरूपस्यैक्यकल्पितभावादभेदकथनमपि घटते एव यथा गं
गायमुनादीनामेकस्थितत्वात् गंगात्वकथनमुपपन्नमेव यथा
च मनुष्यत्वाद्ब्राह्मणक्षत्रियादीनामेकस्थितत्वान्मनुष्यकथ
नमुक्तमेव तथा परमेश्वरसकाशाज्जीवानामेकस्वरूपास्थितिप्र
तीतिकत्वात्तदभेदकथनमुपपन्नमेव स्यात् न तत्त्वज्ञानात्कल्पितोपाधि
नानयोर्भेदः किंतु स्वज्ञानान्निवृत्त्याऽभेद एव स्वरूपस्यादित्यर्थः १८

तत्किमार्तादयस्तव न प्रियाः न **मधुसूदनीटीका** अत्यर्थमिति विशेषणादित्याह ॥

एते आर्तादयः सकामा अपि मद्भक्ताः सर्वे त्रयोऽप्युदारा एवोत्कृष्टा ए
व एवं जन्मार्जितानेकसुकृतराशित्वात् अन्यथा हि मां न भजेयुरेव आ
र्तस्य जिज्ञासोरर्थार्थिनश्च मद्भिन्नस्य क्षुद्रदेवताभक्तस्यापि विफलम
फलभावात् अतो मम प्रिया एव ते न हि ज्ञानवान् लोको वा कश्चिदपि भक्तो
ममाप्रियो भवति किंतु यस्य यादृशी मयि प्रीतिः ममापि तत्र तादृशी प्रीति
रिति स्वभावसिद्धमेतत् तत्र सकामानां त्रयाणां काम्यमानमपि प्रियम
हमपि प्रियः ज्ञानिनस्तु प्रियांतरशून्यस्याहमेव निरतिशयप्रीतिवि
षयः अतः सोऽपि मम निरतिशयप्रीतिविषय इति विशेषः अन्यथा हि

ममकृतज्ञतानास्यात्कृतघ्नतावस्यात् अतएवात्यर्थमितिविशेषणमनु
पात्तंप्राक् यथाहियदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्यव
त्तरंभवतीत्यत्रतरवर्थस्याविवक्षितत्वात् विद्यादिव्यतिरेकेणाकृत
मपिकर्मवीर्यवद्भवत्येव तथासर्वेज्ञानीभक्तोममप्रियइत्युक्ते यो
ज्ञानव्यतिरेकेणभक्तःसोपिप्रियइतिपर्यवस्यत्येवाऽत्यर्थमिति
विशेषणस्याविवक्षितत्वात् उक्तंहि येयथामांप्रपद्यंतेतांस्तथैव
भजाम्यहमिति अतोममात्मैवेतज्ञानवान्ज्ञानीअतोस्यैवनमत्तोभि
न्नःकिंत्वहमेवसइतिममतंनिश्चयः तथाहिसकामभेददर्शि
त्वेनयापेक्ष्यानिष्कामत्वभेददर्शित्वविशेषयुक्तत्वात् हियस्मा
त्सज्ञानीयुक्तात्मासदामयिसमाहितचित्तः सन्भगवंतमनंत
मानंदघनमात्मानमेवानुत्तमांसर्वोत्कृष्टांगतिंगंतव्यंपरमफ
लमास्थितः अंगीकृतवान्ततोमद्भिन्नंकिमपिफलंसमन्यतइत्य
र्थः १८ [illegible] ॥

सदानंदीटीका

येतेआर्तादयःसर्वेसकामाअपिमेप्रियाः एवंजन्मार्जितानेकपुण्य
राशितयोत्तमाः १ अन्यथानभजेयुर्मांसर्वपुण्यफलावधिं हृद्दे
वान्भजंतेपिहृष्यंतेवहवोजनाः २ आर्तादयस्त्रयोप्येतेममभक्ता
ममप्रियाः नयस्तेज्ञोपिमेभक्तःकश्चिदप्यप्रियोमम ३ किंतुयस्य ३४
मयिप्रीतिर्यादृशीमयितादृशी प्रीतिरस्तीतिस्वाभाव्यात्त्रैवतेये
त्रयोमम ४ भक्तास्तेषांत्रयाणांचकाम्यमानमपिप्रियं प्रियोहम
पितस्मायोज्ञानीतस्यतुसर्वतः ५ अहमेवप्रियोस्यंतप्रेमास्पदतमो
तरः अतःसोपिममात्यंतप्रेमास्पदतयाप्रियः ६ अन्यथामत्कृत
ज्ञत्वंतस्यान्स्यात्कृतघ्नता अतोमामात्मभावेनज्ञानवान्स्वानुभू
तितः ७ साक्षात्कृत्यस्थितोनित्यचिदानंदेयआत्मनि सआत्मै
वनमद्भिन्नःकिंत्वहंसर्वथैवसः ८ यतःसमाहितमनामयिज्ञा
नीनिरंतरं भगवंतमनंतमामानंदघनमद्वयं ९ आत्मानंपर
मोत्कृष्टांगतिंगंतव्यमादरात् फलत्वीकृतवानेवमद्भिन्नंमन्य
तेफलम् १० ॥ १८ ॥

93

नीलकंठीटीका

उदारा इति सर्व एवैते उदारा उत्कृष्टा एव ज्ञानी तु ममात्मैवेति मम मतं नि
श्चितं हि यतः स युक्तात्मा अहमेव भगवान्वासुदेव इत्यभेदेन मयि
समाहितचित्तो मामेवानुत्तमां सर्वोत्कृष्टां गतिमास्थितः न तु मत्तोऽन्यदा
रोग्यादिकं कामयमानो मद्भक्तिं करोति किं तर्हि मन्मात्रस्पृह एव मां भ
जत इत्यर्थः १८ ॥

आनंदीटीका

ननु सर्वेषां परस्य सर्वेषु समस्य कथं ज्ञानवानेव प्रियो नार्तादय इत्याह ॥
एते सर्व एवार्तादयः उदारा अत उत्तमपदं परमात्मा परमेश्वरः श्रयंते या
ध्यानेनाभिरूप्यायैरिति वृत्यत्वा सर्वे एव मम प्रियाः तथाहि ज्ञानिनः
प्रियत्वे विशेषमस्याह तत्रेतः पञ्चो विशेषाज्ज्ञानी ममात्मैव मतः
मत्स्वरूपमयः इहहि नयुक्तः युक्ताय प्रियो भवति आत्मनैव युक्तः
प्रिय इति श्रुतिनीने रार्तादीनां ज्ञानमापुपायोपाधिकं प्रियत्वं ज्ञा
निनि तु ममात्मभूते साक्षादेव प्रियत्वं ज्ञानिनः स्वाभिन्नात्मत्वे युक्ति
माह हि यस्माज्ज्ञानयुक्तात्मा ज्ञानेन युक्तः संयमेन परमात्मनि स्थितो
जितग्रामीयेन सः ममैवानुत्तमां गतिं साक्षात्स्वरूपमभेदमास्थितः [illegible]
[illegible]
[illegible] ॥

रामकंठीटीका

ननु ज्ञानिन एव प्रकृष्टत्वे सत्यार्तादयः किं बहिष्कृता एवेत्यत्रा
ह ॥ न आर्तादयो यद्यपि ज्ञानिनोऽन्तरविशिष्टत्वेनाऽन्योन्यभिन्नरूपास्तथा
पि भक्तिमूर्त्यैक्ये नोदयया परस्यैकयामहं कृपयाधिष्ठिताः संतः सर्व
एवोदारा उदारचेतसः औदार्यलक्षणोत्कर्षेण युक्ताः किं त्वार्त
जिज्ञास्वर्थार्थिनां दर्शनादयेवर्तने ते व्यतिरिक्तार्थालंबिनो ज्ञान
वान्तु नरहमित्यभेदेन मत्स्वरूपैकालंबनत्वान्ममैवासौ मम माभि
प्रेतः एतदेव प्रकटयति यस्मात्स ज्ञानी ममैव नान्यस्य व्यतिरिक्त
वस्तुनस्त्यानुत्तमां निरतिशयां गतिं प्राप्तिहेतुमभेदज्ञानलक्षणं
पंथानमास्थितः समाश्रितः [illegible]
[illegible] १८ ॥

लासिकी [illegible]टीका

ननुज्ञानिनएवप्रकृष्टत्वेसतिआर्तादयः किंवहिष्कृताएवेत्यत्राह ॥
एतेसर्वेआर्तादयस्त्रयउदाराउत्कृष्टामोक्षभागिनएव यतोन्येमह
एणतुस्वयआर्तिनिवारणमर्थादिचतत्त्वपाणिपादोदरशरीरस
त्वेभ्योधिकतरंवात्मनस्तेभ्योमार्गयंते अतस्तेउदाराअपिज्ञान्यपे
क्षयात्वन्तनसत्वायतस्तेषांतावत्यपिभेदोस्ति भगवनइदमह
मभिलषामीतिभेदस्यस्फुटप्रतिभासात् तद्यतिरेके ज्ञानी
तुतर्मामेवाभेदेनात्मत्वेनइति ततोमदभिन्नएवसइतिमेमत
स्यमतंनिश्चयः हियस्मात्सज्ञानीयुक्तात्मा युक्तोमदभिन्नआत्मा
स्वस्वभावोयस्यसमामेवस्थिरेणनबत्वफलमनुत्तमांगतिंगंतव्यप
रमंफलमास्थितआश्रितवान् मद्भिन्नमन्यत्फलंनमन्यतेइत्यर्थः
१८ ॥

पंचोलीटीका

ज्ञानिनोभगवत्प्रियत्वप्रतिपादनेनइतरेषांत्रयाणांतदप्रियत्वंप्रा
प्तंनिराकरोति उदाराइति एतेसर्वेत्रयोप्युदाराउत्कृष्टाःमेम
मप्रियाःएवनहिकश्चिन्मद्भक्तोममाप्रियोभवतिज्ञानीत्वत्यर्थ
ममप्रियोभवतिइतिविशेषःज्ञानीतुआत्मैवनान्योमेइतिमेम
तंनिश्चयःहियस्मात्सज्ञानीआस्थितःआरूढःअहमेवभगवान्
वासुदेवोनान्योस्मीत्येवंयुक्तात्मासमाहितचेताःसन्मामेवपरंब्र
ह्मगंतव्यमनुत्तमांगतिंगंतुंप्रवृत्तइत्यर्थः १८

रणवीरसमिद्धोधिनी ॥

ननुयदिज्ञान्येववास्त्रियस्तर्हितरेतवाप्रियत्वेनकिंमध्यएवमज्ञे
तीतिरेत्याहउदाराः सर्वएवैतइति एतेसर्वएवार्तादयउदाराभ
क्तिलक्षणोदार्यरूपेणैकेनैवगुणेनयुक्ताः कोर्थःयद्यपुतरो
तरंविशिष्टत्वेनविभिन्नलक्षणाएते तथापि भक्तिलक्षणेनैके
नैवगुणेनसर्वएवतरंतीतिमहत्वनाभिप्रायः परंतुज्ञानीममा
त्मैवमतः मदभिप्रायानुरूपचेष्टत्वात् हियतः सज्ञानीयुक्तात्मा

युक्तः स्वोचितकर्मणि समाहितः सञ्जीकृतो वाऽऽत्मा चित्तं यस्य ये
न वा सतताद्दृष्टाः मामेव गतिं व्रजन्ति द्वितीया मम मैवेति पाठान्त
रं वा मत्संबन्धिनीमेव गतिं पद्धतिमास्थितः येनैव मार्गेण ताऽऽव्र
व्रजामि तेनैव सोपि व्रजतीति भावः द्विविधा तावदिह मा
वतारागः प्रसिद्धा इति तेनापि तत्प्रवृत्त्यन्तेऽत इति तात्पर्यं कीदृ
शीं गतिं सर्वमार्गमध्ये श्रेष्ठामित्यर्थः १८॥

94

मधुभाष्य

१८॥

भाषाअनुवाद

तो क्यावाकी तीनि प्रकारके भक्त संसार गतिको प्राप्त होतेहै ऐसे शंका को वारंवार निषेधकरि कहतेहै कि नहीं नहीं भक्तभी उदार कहे महान है अर्थात् मोक्षपावने के योग्यहै परंतु मेरी इह अभिप्राय कि ज्ञानी भक्त मेराही स्वरूप है जिस हेतु वह मदेक चित्तहै इससे सर्वोत्तम गतिरूप हमको ही आश्रय करके औरकोई फल की इच्छा नही रखता है १८

दोहा

है सो सभी उदार यह ज्ञानी मोर स्वरूप युक्तहृदयस्थितमोहि
मे सो लहै गति अनूप १८॥

95

बहूनांजन्मनामन्तेज्ञानवान्मांप्रपद्यते वासुदेवः
सर्वमितिसमहात्मासुदुर्लभः १९ ॥

शंकरभाष्यं

ज्ञानीपुनरपिस्तूयते बहूनामिति बहूनांजन्मनां ज्ञानार्थसंस्काराश्र
याणां अन्तेसमाप्तौज्ञानवान् प्राप्तपरिपाकज्ञानोमां वासुदे
वंप्रत्यगात्मानं प्रत्यक्षतःप्रतिपद्यतेकथंवासुदेवःसर्वमिति यएवं
सर्वात्मानं मांप्रतिपद्यते समहात्मानतत्समोन्योस्त्यधिकोवातः
सुदुर्लभोमनुष्याणां सहस्रेष्वित्युक्तम् १९ ॥

आनन्दगिरिकृतटीका

उक्तश्लोकस्यगतार्थत्वंपरिहरति ज्ञानीति ज्ञानार्थसंस्कारोवास
ना तत्रजन्मनि पुण्यकर्मानुष्ठानजनिता बुद्धिस्तद्विलक्षणाश्रयाणां
बहूनामनन्तानां जन्मनामिति यावत् ज्ञानवत्त्वेप्राप्तेप्यपि ज
न्मसंभवितमित्याशंक्याह प्राप्तेति ज्ञानवतोभगवत्प्रतिपत्ति
प्रकारं विवृणोति कथमिति यथोक्तज्ञानस्य तद्वतश्च दुर्लभत्वं
सूचयति यएवमिति महत् सर्वोत्कृष्टमात्मनाधिगतं चित्तमस्येति
महात्मत्वेफलितं हेतुमाह अतइति तद्वाक्योपक्रमानुकूल्यं
कथयति मनुष्याणामिति १९ ॥

स्वामिकृतटीका

एवंभूतोभक्तोतिदुर्लभइत्याह ॥
बहूनांजन्मनांयत्किंचित्पुण्यैरेवयेनअन्तेचरमेजन्मनिज्ञानवान्
सन्सर्वमिदंचराचरंवासुदेवएवेतिसर्वात्मदृष्ट्यामांप्रपद्यतेभज
ति अतःसमहात्माअपरिच्छिन्नदृष्टिःसुदुर्लभः [illegible]
[illegible]
[illegible] कालाभिभूताः क्षुद्रदेवताः सेवन्ते
[illegible] १९ ॥

पिशाचभाष्यं

बहूनांजन्मनामन्तेअवसानेज्ञानवान्मांप्रपद्यते वासुदेवःसर्वमि
तिप्रतिपद्यमानःसचमहात्मादुर्लभः १९ ॥

गी॰
टी॰
स॰

96

रामानुजभाष्यं

बहूनामिति नाल्पसंख्यानां पुण्यजन्मनां फलमिदं यन्मच्छेषतैकरसा
त्मयाथात्म्यज्ञानपूर्वकं मत्प्रपदनं अपितु बहूनां पुण्यजन्मनामन्ते
वासुदेवशेषतैकरसोऽहं तदायत्तस्वरूपस्थितिप्रवृत्तिश्च स चायमसंख्येयैः
कल्याणगुणैः परतर इति ज्ञानवान्भूत्वा वासुदेव एव मम परमप्राप्यं प्रा
पकं चान्यदपि यन्मनोरथवर्ति स एव मम सर्वमिति मां यो प्रपद्यते मामनुप
ले स महात्मा महामना दुर्लभतरो लोके वासुदेवः सर्वमित्यस्यायमेवा
र्थः प्रियो हि ज्ञानिनोऽत्यर्थमहं आस्थितः स हि युक्तात्मा मामेवानुत्तमां
गतिमिति प्रक्रमात् ज्ञानवानयमुक्तलक्षण एव अस्यैव पूर्वोक्तज्ञानि
त्वात् भूमिरापइत्यारभ्य जीवभूतामितरेयं च चेतनाचेतनप्रकृतिद्वयस्य
परमपुरुषशेषतैकरसतोक्ता अहं कृत्स्नस्य जगतः इत्यारभ्य ये चैव सा
त्त्विका भावा राजसास्तामसाश्च ये मत्त एवेति तान्विद्धि न त्वहं तेषु ते म
यि इति प्रकृतिद्वयस्य कार्यकारणोभयावस्थस्य परमपुरुषायत्तस्वरूप
स्थितिप्रवृत्तित्वं परमपुरुषस्य च सर्वप्रकारैः सर्वस्मात्परतरत्वमुक्तं
अतः स एवात्र ज्ञानीत्युच्यते १९ ॥

अभिनवगुप्तकृतटीका

येन मां भजन्ते ते सुकृतिनः ते च चत्वारः सर्वे चैते उदाराः येनान्ये कृपण
बुद्धयः आर्तिनिवारणमर्थादि च तुच्छफलं यादोदरशरीरसत्त्वेभ्योऽपि
कतरं वा आत्मनस्तेभ्यो मार्गयन्ते ज्ञान्यपेक्षया तु अनस्तमितत्वात् तेषां ना
वत्यपि भेदोऽस्ति भगवानिदमहमभिलषामीति भेदस्फुटप्रतिभासत्वा
त् ज्ञानी त्वमामेवं भेदतया लभते इति ततो हममभिन्न एव स्य चाहमेव त
प्रियो न तु फलं अत एव स वासुदेवः सर्वमित्येवं दृढप्रतिपत्त्या एव विक्षीण
तद्धृदयः १९ ॥

परमार्थप्रपाटीका

एवंभूतो भक्तोऽतिदुर्लभ इत्याह बहूनामिति बहूनां शुभाचारवतां जन्म
नामन्ते चरमजन्मनि वासुदेवः सर्वमिति ज्ञानवान् सर्वात्मकदृष्ट्या मां
प्रपद्यते भजति स महात्मा अपरिच्छिन्नदृष्टिः स च दुर्लभः अयमर्थः
वासयत्याच्छादयति मायया विश्वमिति वासुः तथा स्वप्रकाशेन दीव्य

नीतिदेवस्तथाविधः सूत्रात्मासएवसर्वमितिज्ञानवान् तदुक्तं
अहमेवपरंब्रह्मवासुदेवाख्यमव्ययं इतिस्यान्निश्चितोमुक्तोबद्धए
वान्यथाभवेदिति नदेवंकामिनोपिसंतःकामप्राप्तयेपरमेश्वर
मेवयेभजंतितेकामान्प्राप्यपानेर्मुच्यंतइत्युक्तं प्रपत्तिरितप
नाह १९ ॥

वनमालीटीका

नाहपर्यज्ञानीदुर्लभइत्याह बहूनांजन्मनांकिंचित्किंचित्पुण्यो
पचयहेतूनामंतेचरमेजन्मनिसर्वस्यकृतविपाकरूपेवासुदेवः
सर्वमितिज्ञानवान्सन्मांनिरुपाधिप्रेमणाप्रपद्यतेसमहात्मामम
प्राणप्रेष्ठोतिदुर्लभोविरलतयाजीवन्मुक्तः दुर्लभोमनुष्याणांसहस्रे
ष्वपिदुःखेनापिलब्धुमशक्यः सर्वव्यापकत्वात्सर्वंसमाप्नोषिततो
मा॰ सिसर्वइतिवचनात् वासुदेवंसर्वंसर्वंप्राहप्रवृत्तिनिमित्तता
पर्मणांतत्रसत्वात् ब्राह्मणोस्यमुखमितिवद्वासुदेवजातत्वाद्वा
सर्ववासुदेवः पश्यामिसपेत्रहिदेवानितिध्यानापीनंतदुलेपा
नपात्रप्रयोगवद्वावासुदेवाधीनत्वात्सर्ववासुदेवः यद्वावासुदे
वएवप्राप्यफलंप्रापकश्चांतर्यामितयासोनुष्ठानकारयितेंद्रिया
दिप्रेरकः स्वहृत्स्वामीशोन्यदपियत्किंचिन्मनोयोगोचरस्त
त्सर्वसर्वसंवासुदेवइतिधियामांयःप्रपद्यतेसदुर्लभइत्यर्थः १९

ततमेवैजयंतीटीका

ननुपघानादिभ्योज्ञानेनावश्रेष्ठःस्यात्नहिंतेपित्रयोज्ञानोपलब्धये
धां॰ यत्नंकुर्वतोनकुर्वंतीत्यपेक्षामेवंभूतोमत्प्रपन्नोज्ञानीत्वनेकगुणैर्गु
ज्ञैर्जन्मभिर्भवतिनाल्पैरितिवदंस्तस्यातिदुर्लभत्वमाह बहूनामि
तिबहूनामपरिमितकोटीनांजन्मनांश्रीमत्कुचिश्रात्रियस्वधर्माचा
रनिष्ठलोभुद्विजवरयुलेषुजननानामत्रेतवेनत्रजन्मनिबहूनांना
विधान्विषयान्भुक्त्वाःउत्तम्भुक्त्वानेकानिशास्त्राणिचभूयोभूयोवि
चार्यवारंवारंस्मरणाभ्यमोचितानानेकान्धर्मानाचरितान्मदाराधने
नेवप्राकृतविषयवासनारहितान्तःकरणंकृत्वानंदेनेनदेवमाने

चरमेजन्मनिभूमिरापोनलोवायुरितिद्वाभ्यांपरापराभिधानंचेतनाचे
तनरूपंप्रकृतिद्वयंममैवतत्स्वरूपस्थितिप्रवृत्तिभेदकंस्वाधीनाद्
शक्त्यैतद्योनीनीत्यर्द्धेनमत्प्रकृतिद्वयस्यसर्वभूतयोनित्वंचोक्तं अहं
कृत्स्नस्यजगतःप्रभवःप्रलयस्तथेत्यादिभिर्येचैवसात्विकाभावाइत्यन्तैः
सार्द्धैर्षड्भिःश्लोकैर्ममसर्वेश्वरस्यप्रकृतिद्वयात्मकाखिलजगत्कार
णत्वंसर्वोत्तमत्वंचकार्यकारणरूपेणावस्थितंचेतनाचेतनरूपंस
र्वंजगन्मद्विभूतिरूपंमदात्मकंमदधीनस्थितिप्रवृत्तिकंमदपृथक
सिद्धंमत्सत्ताधीनसत्ताकंचेत्यनेकप्रकारेणसर्वकारणावस्थंका
र्यावस्थंचमत्कृत्यार्थ्येणसमर्थ्यंनंब्रह्मादिस्थावरांतंचाचेतनाचेतनम
रूपंदृश्यमहमेववस्तुमात्रंसकलंवासुदेवः तत्रचेतनाचेतनव
स्तुष्वंतर्यामित्वेनतत्तन्नियन्तृत्वेनच[illegible]त्वेनतत्प्रवर्त
यितृत्वेनतत्तच्छुभाशुभकर्मकारयितृत्वेनतत्साक्षित्वेनतद
धिष्ठानत्वेनतत्तद्व्यापकत्वेनतत्तदभिन्ननिमित्तोपादानरूपका
रणत्वेनचवसतीतिवसुःसचासौदेवश्चवसुदेवः वसुदेवएववा
सुदेवःस्वार्थेऽण् यद्वावसंतिसर्वाणिभूतान्यस्मिन्नितिवसुः
सचासौदेवश्चवसुदेवःसएववसः यद्वावसुदेवस्यापत्यंवासुदेवः
यद्वावसत्युष्टास्तदीव्यतिक्रीडतीतिभगवत्यपित्वाभिमानेनविजि
गीषतिवानिभृद्योततेवास्तूयतेवातैःसहमोदतेवेत्यादिनिरु
क्त्यावसुदेवोनन्दस्तस्यापत्यंवासुदेवः कृष्णएवेतीत्थंप्रकारकं
स्वाभाविकासंख्येयकारुण्यादिकल्याणगुणगणरत्नाकरोऽ
नंताचिंत्यशक्तिकःकर्तृत्वभोक्तृत्वायनेनतथामोऽप्ययोऽहमयोभिन्न
स्वरूपःसविशेषोवासुदेवपदवाच्योऽहंश्रीकृष्णःएवेतीत्थंप्रका
रकंसर्वात्मकंसर्वव्यापकंभूमविषयकामपरिच्छिन्नंसत्यंप्रदाय
मामज्ञानंविषयेनयस्यसएवज्ञानवान्भवतिसएवचमांसर्वात्मरू
पंपरमपाध्यंपुरुषोत्तमंप्रपद्यतेउपास्तेनान्यआर्तादयस्तेषामेव
म्भूतज्ञानाभावात् एवंभूतःसज्ञानवान्महात्माप्रह्लादसदृशो
ऽत्युदारमनाःसुदुर्लभःकोटिष्वपिनरतिपायेनजःप्राप्यएवेत्यर्थः
॥१९॥

मधुसूदनीटीका ॥ यस्मादेवं तस्मात् ॥

बहूनां जन्मनां किंचित्किंचित्पुण्योपचयहेतूनामंते चरमे जन्मनि सर्व
सुकृतविपाकरूपे वासुदेवः सर्वमिति ज्ञानवान्सन्मां निरुपाधिप्रेमा
स्पदं प्रपद्यते सर्वदा समस्तप्रेमविषयत्वेन भजते सकलमिदमहं च
वासुदेव इति दृष्ट्वा सर्वप्रेमणां मय्येव पर्यवसायित्वात् अतः स एवं
ज्ञानपूर्वकमद्भक्तिमान् महात्मात्यंतसुदुर्लभः कदाचित् जीवन्मुक्तः
सर्वोत्कृष्टो न तत्समोन्योस्त्य धिकस्तु नास्त्येव अतः सुदुर्लभः
मनुष्याणां सहस्रेषु विनापि लब्धुमशक्यः अतः सुनिरतिशय
मत्प्रीतिविषय इति युक्तमेवेत्यर्थः १९ नन्वेवमा नादिभक्तत्रयापे
क्षया ज्ञानिनो मद्भक्तस्योत्कर्षः तेषां ज्ञानिनित्ययुक्तएकभक्तिविशिष्ट
त्वत्रयनिज्ञानो व्याख्यातः अधुना तु सकामत्वे भेददर्शित्वे च समेपि
देवतांतरभक्तापेक्षया मदीनां त्रयाणां स्वभक्तानामुत्कर्षः उदाराः स
र्व एवैते त्वयत्रयनिज्ञानी भगवता व्याख्यायते यावदध्यायसमाप्ति
समानेध्याये सकामत्वभेददर्शित्वे च मद्भक्ताधूमिकाक्रमेण सर्वो
त्कृष्टमोक्षाख्यफलं लभंते क्षुद्रदेवताभक्तास्तु तद्वदेव पुनः पुनः
संसरणरूपफलं अत एव सर्वेष्वार्त्तजिज्ञासर्वार्थार्थिनस्समामेव प्र
पन्नाः संतो नायासेन सर्वोत्कृष्टमोक्षाख्यफलं लभंतामिति ममाभिप्रा
यः परमकारुणिकस्य भगवतः तत्र परमपुरुषार्थफलमपि भगव
द्भजनमपेक्ष्य क्षुद्रफले क्षुद्रदेवताभजने पूर्ववासनाविशेष एवासा
धारणो हेतुरित्याह ॥

सदानन्दीटीका

पुण्योपचयहेतूनां बहूनां जन्मनां अंतः पुण्यपुंजविपाके ते चरमे ज
न्मनि स्वयं १ वासुदेवः सर्वमिति ज्ञानवानत्र दार्थीः परप्रेमास्पदं
मां च सर्वदानन्यमानसः २ सर्वप्रेमास्पदत्वेन भजते मद्भक्तस्तत्
अतः स एव मज्ज्ञानपूर्वकप्रेमवानपि ३ महात्मात्यंतसुदुर्लभो नर्मना
ब्रह्मात्मनत्वदृक् सर्वोत्कृष्टो न तत्तुल्योपि कोवान्योनकस्तु न ४
मनुष्याणां सहस्रेषु विनापि ससाधकैः अप्राप्यो लब्धुमेनस्मा
ममातीव प्रियो मतः ५ ॥ १९ ॥

गी॰
टी॰
स॰

नीलकंठीटीका

किंच वासुदेवः सर्वमिति ज्ञानवान्यो बहूनां जन्मनामंते चरमे जन्मनि
मां प्रपद्यते सम्यग्दर्शनेनापरोक्षीकरोति स महात्मा ब्रह्मभूतः सुदु
र्लभ इति योजना १९ ॥

अथ परां ज्ञानकाष्ठामनवाप्योपायैः आनंदीटीका तस्य तु निपवमत्तज्ञत्तस्यकावस्थैत्याशं
क्याह ॥ — प्राप्य पुण्यकृतां लोकानित्यादिप्रागुक्तयोगभ्रष्टस्थितिनयतामपि प्रतीत
जन्मसु वासनानवच्छेदात् बहूनां जन्मनामंते उत्तरोत्तरं सत्वशुद्धिस्तय
त्या वासुदेवः सर्वमिति ज्ञानवान् वसंत्यस्मिन्नधिष्ठानादि सर्वाणि भू
तानि वसति चांतर्यामित्वेन सर्वेषु भूतेष्विति वासुदेवः दिवक्रीडावि
जिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्विति धातोर्व्युत्प
त्त्या क्रीडनादिसर्वार्थकः वसुश्चासौ देवः वासुदेवः सर्वकार्यकारणा
दिप्रपंचतयास्थित इति परमां ज्ञानकाष्ठां प्राप्तः मां प्रपद्यते मयि सायु
ज्यमाप्नोति यस्त्वेवं मां प्रपन्नः स महान् ब्रह्मीभावेन महत्त्वं प्राप्त
आत्मा यस्येदृशः सुदुर्लभः तत्र कोयोगानुशासने तद्विपाकानुगुणा
नामेवाभिव्यक्तिर्वासनानां जातिदेशकालव्यवहितानामप्यानंत
र्यं स्मृतिसंस्कारयोरेकत्वादिति अस्यार्थः यथानुभवास्तथा संस्का
रास्ते च कर्मवासनानुरूपाः यथा च वासनास्तथा स्मृतिरिति जातिदे
शकालव्यवहितेभ्यः संस्कारेभ्यः स्मृतिः स्मृतेः पुनः संस्कारा इति
तेषामनादित्वमाशिषो नित्यत्वादिति इह हि निजप्रकृत्यनुरूपे
णः स्वस्य प्राप्या सुखस्याप्राप्या न दुःखभयस्वरूपानवधारणेन चातीति
ज्ञासादिपरो भवति ततोऽवधारितं स्वरूपस्योद्विग्नसत्त्वस्यायं प्रकारो नV
दर्शितः १९ ॥

रामकंठीटीका

यतो युक्तात्मा मय्येव समाहितांतःकरणोयमतः ॥
अनंतानामवस्थानंतरं भूयसां जन्मनां शरीरपरिग्रहाणामंते परिक्षये
सर्वमिदं चराचरभावजातं परमार्थसन्तत्वनिर्विकारसामान्यसंविद्रू
पो भगवान्सर्वत्र वसनात्सर्वस्य वा तत्र वसनाद्वासुदेव इति सर्वाद्वय
त्वनिश्चयेन मां परमकारणं प्रतिपद्यते स चैवंविधः सर्वोत्कृष्टस्वभा

98

वः सुतरां दुर्लभोऽनुष्ठाय मनुष्यकोटिष्वपि कदाचित्तादृशो महानुभा
वो लभ्यते न वा [illegible]
[illegible] १९ ॥

लासिकी [illegible]सीटीका

नन्वभ्यवत्वानां दर्थार्थिनश्च सकाशाज्ज्ञानिनो विशेषो जिज्ञासोः स
काशात्तु न युक्तः ज्ञानप्रथमभूमिकाधिष्ठानादित्यत आह ॥
बहूनां जन्मनां बोधनाय तत्प्रयत्नशालिनां शरीरपरिग्रहाणामन्ते मो
क्षाधिष्ठाने चरमे जन्मनि यत ऊर्ध्वं न शरीरपरिग्रहः तस्मिंज
न्मनि श्रेष्ठेन लक्षणेन ज्ञानवाञ्जीवन्मुक्तो मामीश्वरं प्रतिपद्यते स
र्वात्मभावेन प्राप्नोति शुकादिवत् कथं वासुदेवः सर्वमिति स
र्वत्र वसनात् सर्वस्य वा तत्र वसनाद्वासुदेवः श्रीभगवानहं सर्वमि
दं चराचरभावजातमित्येवं यदुक्तं श्रीकण्ठेन शिवाद्यवनिपर्य
न्तं भावाभावोपबृंहितं सर्वं शिवमयं ध्यात्वा भूयो न जन्मनश्चाश्रया
दित्यनेन श्लोकेन पुरुषमहिमप्रवृद्धविद्यापरपर्यायज्ञानयोगल
क्षणमुक्तं एवं वैशात्म्यमापन्नस्य जीवन्मुक्तस्य प्राणा नोत्क्रामं
ति तथा च श्रुतिः न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्त
इति तत्त्वलक्षणबुद्धिरपि जिज्ञासोरेवं मां प्रतिपद्यते तस्माद्वैतलक्ष
णाज्ज्ञानेनैक्ये रेवं सर्वथा भेदाविगलनात् इत्यतो जिज्ञासोः सकाशा
त्तस्य वैशिष्ट्यं अतः स महात्मा महान् सर्वव्यापी आत्मा यस्य सोऽप
रिच्छिन्नदृष्टिर्जीवन्मुक्तः सर्वोत्कृष्टो न तत्समोऽन्योऽस्ति अधिक
स्तु नास्त्येव अतः सुदुर्लभः योगिष्वपि मध्ये तादृशो महानुभावो
लभ्यते न वेति १९ ॥

पँचोलीटीका

ज्ञानिनं पुनरपि स्तौति बहूनामिति ज्ञानवान् प्राप्तपरिपाकज्ञानः
बहूनां जन्मनामन्ते बहुजन्मोपार्जितात्मज्ञानसंस्कारेण समा
श्रो मां वासुदेवः सर्वमिति प्रपद्यते स महात्मा सुदुर्लभस्तत्समो
धिको नास्ति १९

एतादृशश्चकर्मयोगी अतिदुर्लभइत्याह बहूनामिति यः कर्म
योगीबहूनांजन्मनामंतेवसानेज्ञानवान् स्वोचितकर्मणिदृढ
निश्चयरूपज्ञानविशिष्टोवासुदेवः सर्वगः सर्वाश्रयश्चपरमेश्व
रः सर्वंसाध्यंसिद्धंसंपादयिष्यतीतिघोषः इत्यनयाबुद्ध्यामांप्रप
द्यतेभगवतीकुरुते समहादुर्लभः मनुष्याणांसहस्रेषुदुःखेना
99 पिलब्धुंनशक्यतेइत्यर्थः बहूनांजन्मनामंते इत्यनेनचैतदु
च्यतेबहुजन्मार्जितपुण्यपरिपाकवशाद्यातादृशास्वजात्युचितयुद्धा
दिकर्मविषयकनिश्चयदार्ढ्यमुत्पद्यतइति १९ ॥

मधुभाष्य

१९ ॥

भाषाअनुवाद

ऐसे भक्त अति दुर्लभ यह कहते है कि अनेक जन्मसे कछु
कछु प्राप्त संचित कहे इकही होने से शेष जन्ममे ज्ञानवा
नी होयकर यह जो चराचरात्मक कहे स्थावरजंगम रूप ब्र
ह्मांड सो सम्पूर्ण एक वासुदेवमात्र है इस प्रकार सर्वत्र
आत्म दृष्टिके द्वारा हमको भजता है अपरिछिन्न कहे
अबाधित दृष्टिसे ऐसा महात्मा ज्ञानी दुर्लभ है १९ ॥

दोहा

बहुत जन्मके अंतमो द्दि ज्ञानी प्रापत होय वासुदेव यह सर्व
है दुर्लभ महात्मा सोय १९॥

100

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः तं तं नि
यममास्थाय प्रकृत्या नियताः स्वया २० ॥

शांकरभाष्यं

कामैस्तैस्तैः

आत्मैव सर्वो वासुदेव इत्येवमप्रतिपत्तौ कारणमुच्यते कामैरिति पु
त्रपशुस्वर्गादिविषयैर्हृतज्ञाना अपहृतविवेकविज्ञानाः प्रपद्यन्ते
हृ अन्यदेवताः प्राप्नुवन्ति वासुदेवादात्मनोऽन्या देवतास्तं तं नियमं देवता
राधने प्रसिद्धो यो यो नियमस्तं तमास्थायाश्रित्य प्रकृत्या स्वभावेन ज
न्मान्तरार्जितसंस्कारविशेषेण नियता नियमिताः स्वया आत्मीयया २०

आनन्दगिरिकृतटीका

किमिति तर्हि सर्वेषां प्रत्यग्भूते भगवति यथोक्तज्ञानं नोदेतीत्याशंक्य
नमामित्यत्रोक्तं हृदि निधाय ज्ञानानुदये हेत्वन्तरमाह आत्मैवेति
२ कामैर्नानाविधैरपहृतविवेकत्वाज्ज्ञानस्य देवतान्तरनिष्ठत्वमेव प्रत्य
ग्भूतपरदेवताप्रतिपत्त्यभावे कारणमित्याह कामैरिति देवतान्त
रनिष्ठत्वे हेतुमाह तं तमिति प्रसिद्धो नियमो जपोपवासप्रदक्षि
णनमस्कारादिः नियमविशेषाश्रयणे कारणमाह प्रकृत्येति २०

स्वामिकृतटीका

२ तदेवं कामिनोऽपि संतः काम इत्युक्तं आर्तादयो मां परमेश्वरमेव ये भजन्ति ते कामान्प्राप्य मुच्यन्त
ये त्वत्यन्तं राजसास्तामसाश्च कामाभिभूताः क्षुद्रदेवताः सेवन्ते
तेषां संसारो न निवर्तत इत्याह २ कामैरिति चतुर्भिः येन तैस्तैः पुत्रकीर्तिशत्रुजयादिविषयैः कामैरप
हृतविवेकाः संतः अन्याः क्षुद्राः भूतप्रेतयक्षादिदेवता भजन्ति किं
कृत्वा तत्तद्देवताराधने यो यो नियम उपवासादिलक्षणं तं तं नियमं
स्वीकृत्य तत्रापि स्वकीयया प्रकृत्या पूर्वाभ्यासवासनया नियता वशी
कृताः संतो देवताविशेषं ये भजन्ति [illegible] ॥

पिशाचभाष्यं

कामैर्बहुविधैः अपहृतज्ञानाः प्रपद्यन्ते आश्रयन्तेऽन्यदेवताः मद्व्यति
रिक्तास्तं तं नियमं व्रतमास्थायाश्रित्य प्रकृत्या स्वभावेन नियता व
शीकृताः स्वया आत्मीयया २० ॥

रामानुजभाष्यं

गी॰ टी॰ स॰

तस्य ज्ञानिनो ऽतुल्यं भजनमेवोपपादयति कामैरिति कामैः सर्वेषु वाह्यैर्लौकि
काः पुरुषास्तया प्रकृत्या वासनया ऽनादिमायाभावविषया नियता नित्याः
नित्यं तैस्तैः स्ववासनानुरूपेणानायैरेव कामैर्हृतज्ञाना विषयभूतेहृतं ज्ञानं तस्य
रूपविषयज्ञानं यस्तात्कामसिद्ध्यर्थमन्यदेवतामद्व्यतिरिक्ताः केवलेन्द्रा
दिदेवतास्तं तं नियममास्थाय तत्तद्देवताविशेषसमाराधनाय साधारणं
नियममास्थाय प्रपद्यंते नाथवाश्रित्य चिद्रोपचित्रमन्त्ररूपं संश्रयंते २०

अभिनवगुप्तकृतटीकाऽप्यक्रमं २० त्रयोविंशतो उक्तार्थम्
स्पष्टार्थम्

परमार्थप्रपाटीका

अथ तदितराणां काम्यैस्तैस्तैर्हृतज्ञाना इति चतुर्भिः तैस्तैः पुत्रकलत्रमित्रधनजनयादि
विषयैः कामैरपहृतविवेकाः संतः अन्यमादिलक्षणाः सर्वेषु सर्व
ज्ञत्वसर्वान्तर्यामित्वादिसामर्थ्यवर्जिताः क्षुद्राभूतप्रेतयक्षादिदेवताः
भजंति किं कृत्वा तत्तद्देवताराधने यो यो नियम उपवासादिलक्षण
स्तं तं नियममास्थाय स्वीकृत्य तत्रापि स्वकीयया प्रकृत्या पूर्वाभ्यास
वासनया नियता वशीकृताः संतो देवताविशेषं भजंति नेत्यादि २०

वनमालीटीका

ज्ञानिन उक्त्वैवमुक्त्वा सकामानां त्रयाणां च भक्तानां देवतान्तरभक्तेभ्य उत्कृ
ष्टतां वक्तुं प्रतिज्ञातमुत्कर्षं विवृणोति यावदध्यायसमाप्ति आयासेन त्वे
पि मद्भक्ताः क्रमेण सर्वानुत्कृष्टं मोक्षाख्यं फलं लभन्ते तद्देवताभक्ता
स्तु तद्वैमव उत संस्थानितुच्छं फलं न तु परमपुरुषार्थफलकं भगवद्भ
जनमपि तुच्छफलेतरदेवताभजनेऽपि सर्ववासनाविशेषापवासाधा
रणो हेतुरित्याह कामैरिति मोहनस्तंभनमारणाकर्षणवशीकरणो
च्चाटनादिविषयकैः कामैः तैस्तैरभिलाषैर्भगवत्सेवयालब्धुमशक्यैर्वे
तैः तैस्तैर्हृतमपहृतं भगवतो वासुदेवाद्विमुखीकृत्य तत्फलदान
त्वाभिमतं तद्देवताभिमुखीनीतं ज्ञानं मनः करणं येषां तेऽन्यदेव
न्य॰ ताः सर्वेभ्यः परमात्मनो देवतान्तरं नियमं जपोवा सप्तदिनानमस्कारा य॰
दिरूपं तत्तद्देवताराधने प्रसिद्धमास्थायाश्रित्य प्रपद्यंते भजन्ते तद्दे
वतानां मध्येऽपि केचित्त्वादिदेवभजने स्वया प्रकृत्या नियताः आसा

धारणयापूर्वाभ्यासवासनयाजनितगुणादिप्रज्ञयावशीकृताःसंतः २०॥

[illegible]वैजयंतीटीका

प्रार्तादयस्त्वेवंविध ज्ञानाभावात्क्षुद्रफलप्राप्तिकामनया देवांतरमप्युप
सर्पंतीति दर्शयन् तस्य मूलभूतमाह कामैरिति तैस्तैरिति [illegible]रूपैर्जि
स्नाv तादृरूपैर्यत्प्राप्तिस्तैरेवकामैरभिलाषैर्हृतज्ञानाः हृतंनष्टमंतःकरण
णमात्मादिविषयकं ज्ञानं येषां ते तथाविधाः एव सज्ज्ञानभक्त्यादिदा
तारं श्रीशिवं पत्न्यादि दाक्षिणात्यमंगलदाना विघ्नहर्ता च स्व
११v र्गं सर्वरोगादिहर्ता विश्वं चिरकालसेवया कथंचिदपि प्रसन्नो भव
ति न वा यदि किं मद्यभीष्टं न ददाति प्रसन्नधनपुत्रादिकं सर्वं नाशयत्य
तोऽस्योपासनेन किं फलं स्यादित्येवं न ध्रुवहृदयइत्यर्थः एवं कुतस्ते
भवंतीत्यपेक्षायामाह यतः स्वया स्वकीयया प्रकृत्या अनादिराज
सतामसकर्मजनितवासनाजन्यस्वभावरूपया नियता यंत्रिताः
तं तं व्रतोपवासजपहोमप्रदक्षिणाप्रणिपातादिरूपमसाधारणं नि
यममास्थायाश्रित्यान्यदेवताः मदन्याः शिवशक्तिविनायकसू
र्यादीनां श्रुतानायकोपानल्लवत्फलदानदेवान् प्रपद्यंते संश्रयंते ते
षां नाहरणी प्रकृतिरेव याचिंत्यो विनंमत्स्वरूपमाकाशमनोविमुखा
करोतीत्यभिप्रायः २० ॥

मधुसूदनीटीका

मोहनस्तंभनाकर्षण[illegible]वशीकरणमारणोच्चाटनादिविषयैर्भगवत्से
v श्रा वयालब्धुमशक्यैस्तैस्तैः कामैरभिलाषैर्हृतमपहृतं भ
गवतो वासुदेवाद्विमुखीकृत्य तत्तत्फलदातृत्वाभिमतक्षुद्रदेवताभि
मुखं नीतं ज्ञानमन्तःकरणं येषां ते अन्यदेवताः भगवतो वासुदेवादन्याः
क्षुद्रदेवताः तं तं नियमं जपोपवासप्रदक्षिणानमस्कारादिरूपं तत्तद्दे
वताराधने प्रसिद्धं नियममास्थायाश्रित्य प्रपद्यन्ते भजन्ते तत्तत्क्षुद्रफल v न
नोंv प्राप्तीच्छया क्षुद्रदेवतामध्येऽपि केचित्कांचिदेवं भजन्ते स्वया प्रकृत्या v देवतां
v दास नियताः असाधारणया पूर्वाभ्यासेन या वशीकृताः सन्तः २० [illegible]
[illegible]
नैवांसनीयं यतः [illegible] ॥
[illegible]

सदानंदीटीका

गी॰ एवमार्तादिभक्तानांमध्येज्ञानीविशिष्यते इत्युक्तमधुनातेषांफलभाग्य-
टी॰ त्वमुक्तम्ः १ सकामत्वेनतथाभेददर्शित्वेचसमोपिहि देवतांतरभक्तेभ्यः
स॰ स्वभक्तानामुदारता २ प्रतिज्ञातापुरासैवसमाख्यायतेततः यतः
समानेप्यायासेक्षुद्रभक्ताःक्रमेणतु ३ सर्वोत्कृष्टंचमोक्षाख्यंलभंतेफ-
लमव्ययं येक्षुद्रदेवताभक्तास्तुक्ष्मेवपुनःपुनः ४ फलंतत्सरणात्मे-
१०२ वलभंतेमंदभाग्यतः पुरुषार्थफलंक्षीणंभजनंसममेवयत् भज-
नंक्षुद्रदेवानांतत्रकारणमुच्यते पुत्रपश्वादिविषयैःकामैस्तैस्तैर-
पहृतैः ६ तैस्तैर्भगवतोमत्तोविमुखीक्रियमानसंवदेवाभिमुखंच
नीतंयेषांमनोगिरां ७ तत्तत्फलप्रदात्वेनाभिमतायास्यदेवता ता-
स्याराधनयोग्यःप्रसिद्धोनियमोभवेत् ८ तंतंजपोपवासादिनि-
यमंसमुपाश्रिताः तत्तत्क्षुद्रफलप्राप्तिवांछयैवानिवंचिताः ९
४२ असाधारणयाप्यर्वाभ्यसर्वान्नयास्तया वशीकृताःपरित्यज्यमांभ-
जंतेन्यदेवताः १० ॥ २० ॥

नीलकंठीटीका

अन्येतुतैस्तैःकामैःपुत्रपश्वादिविषयैः हृतज्ञानाहृतंहृदीकृतंज्ञा-
नंविवेकोयेषांते अन्यदेवताः अहमेवतस्याराधितेनेष्टफल-
मवाप्स्यामीति भेदबुद्ध्याप्रपद्यंतेइंद्रादीन् तंतंनियमंचजपोप-
पवासादिकमास्थाय स्वयाप्रकृत्यावक्ष्यमाणविधयादैव्याआसु-
र्यावानियताःनिगृहीताः २० ॥

आनन्दीटीका

अन्यस्यदर्शयति तैस्तैःकामैर्वक्ष्यमाणस्वभावोत्थैःशांतिकपौ-
ष्टिकाभिचाराभिलाषैःकाम्यविषयैःहृतज्ञानाअपहृतस्वप्रका-
शाः अस्मान्मदाराध्यादिंद्रादेरपरःकर्मफलदःकश्चिदीश्वरोनास्ती-
तिमिथ्याज्ञानवंतःस्वयास्वात्मीययाप्रकृत्याहंकारिकयानामस्वा-
नियंत्रितात्वममःकार्पण्याग्रहेणवशीकृताः तंतंनियमंशांति-
कादिकर्मणांसांगिमाम्नायायाताःपरमपरमेश्वरव्यतिरिक्ताः

देहपितृभूतात्मिकादेवतास्तत्तत्कर्माधिष्ठात्रीः प्रपद्यंते [illegible]
[illegible] २० ॥

रामकंठीटीका

कस्मात्तथाविधः सुदुर्लभ इत्यत्र स्वबुद्धिमात्रमेकं कारणं प्रतिपादयितुमाह ॥

इह यथोक्तप्रकारेण नानाजीवभूतसूक्ष्मात्मकाः पुरुषा आसि
क्तोद्भावितकार्यकारणभावया गुणात्मिका प्रकृत्या तया तत्तत्स्व
रूपभेदेन प्रतिनियतकार्यकारणात्मना प्रत्येकं स्वतत्त्वमापन्नया
नियतामविभक्ति देहेंद्रियविषयाद्यात्मकतया परस्परभेदेन नि
र्यंत्रिताः संतः स्वस्वाद्यात्मके प्राकृते रूपमेवात्मत्वेन प्रतिपन्ना
अतएव स्वत्वापन्नतत्तत्प्राकृतस्वचितैस्तैस्तैः क्रियाफलतया प्राप्य
त्वेन काम्यमानैः कामैर्भोगैस्तत्तल्लोकांतरभोग्यैर्हृतज्ञाना अ
विपरमार्थलक्षणैकतत्त्वविषयबोधाः संतोऽन्यदेवताः प्रत्यगा
त्मलक्षणपरमदैवतव्यतिरिक्त हरिहरहिरण्यगर्भादित्यप्रभृ
तीस्तत्तत्स्वाभिमततत्तत्फलदायित्वश्रुतप्रभावा परस्परभिन्ना
स्तत्तया गम्यमानाः प्रपद्यंते भजंते कथं तेन तेन तद्रूपेण प्रसिद्धं
नियममितिकर्तव्यताविशेषरूपं व्यवस्थामाश्रित्यावलंब्य २०

लासिकी [illegible]टीका

न देवं ये कामयामये परमेश्वरमेव भजंते कामात्ताप्यणानेर्व्युच्यते
इत्युक्तं येतु कामाभिभूताः क्षुद्रदेवतापर्वसेवंते ते संसरंतीत्या
ह चतुर्भिः ॥ येतु तैस्तैः पुत्रपश्वादिविषयैः कामैरभिलाषैर्हृ
तज्ञाना मुषितविवेकाः संतः तं तं तद्रूपेण प्रसिद्धं नियममिति
कर्तव्यताविशेषरूपमाश्रायावलंब्यान्या आत्मन ईश्वराभिन्ना
दिलक्षणा देवताः प्रपद्यंते भजंते यतः स्वकीयया प्रकृत्या पूर्वा
भ्यासवासनया नियतावशीकृताः २० ॥

पंचोलीटीका

आत्मैव सर्वं वासुदेव इत्येवमप्रतिपत्तौ कारणमाह कामैरिति
स्वया आत्मीयया प्रकृत्या स्वभावेन जन्मांतरार्जितसंस्कारविशे
षेण नियता नियमिताः देवताराधनोपायप्रसिद्धस्तं तं नियममा
स्थाय आश्रित्य तैस्तैः कामैः पुत्रैश्वर्यादिस्वर्गविषयैः हृतज्ञानाः आ

हृतज्ञानाः आहृतविज्ञानाः अन्यदेवताः प्रपद्यंतेप्राप्नुवंति २०

रतावीरसमिद्धोयिनी॥

कामैस्तैस्तैरिति तैस्तैः सर्वप्रतिपादितस्वरूपैरनेकविधैः का
मैर्मानसिकसंकल्पैर्हृतं हृतीकृतं ज्ञानं निश्चयदार्ढ्यलक्षणं
येषांतेतथाविधाः कर्मप्रारभ्यप्रपदिपकनिश्चयात्मकज्ञान
त्वात्कामादिभिः प्रसभं प्रतिकूलंनीता इति यावत् अन्यदेवताः
अर्थात्पुरुहूयज्ञाधिदैवतभूतान्मत्तः सकाशादितरादेवता अ
ग्न्यादिकाः प्रपद्यंते किंकृत्वाप्रपद्यंते तंतंबहुप्रकारंनियमं
जपोपवासप्रदक्षिणनमस्कारादिरूपमास्थायाश्रित्य कीदृ
शास्ते स्वयाप्रकृत्यास्वकीयेन स्वभावेनराजामतलक्षणेनेति
यावत् नियतावशीकृताः यद्वा तैस्तैर्बहुविधैरुच्चाटनादिवि
षयैः कामैरभिहृतज्ञाना वासुदेवात्पुरुहूयज्ञाधिदैवतात्पुरुहूयज्ञ
फलदायकाच्चप्रत्यावर्तितांतःकरणाः संतः अन्यदेवताः वा
सुदेवादन्या उच्चाटनाद्यधिदेवताः यमादयः प्रपद्यंते यज्ञविधा
नेनभावयंति तंतंनियमंतत्तदुच्चाटनयोग्योपकरणासा
ध्यंजपोपवासहोमादिकंसमाश्रित्य स्वयाप्रकृत्यास्वकीये
नासुरस्वभावेननियतावशीकृताः असुरविजयिनस्ते अत्यर्थं
असुराअपिहिरणमध्यादंतर्धायोच्चाटनहोममालायांमंत्रसा
धनांकृत्वारिपून्माययाहिंसंतीति २०॥

मधुभाष्य

२०॥

भाषाअनुवाद

सतो गुणी कामना करिके जोमनुष्य परमेश्वर ही को भजते है
तो कामना प्राप्तहोय क्रमसे मुक्त होते है परंतु जो रजो गुण
तमोगुण का आलम्बन कर के कामना के वश होय और२
देवतो को उपासन करते है तेई संसार गतिको पावते हैं
इस श्लोक से चौथे श्लोक तक कहतेहै कि जो पुत्र कल
त्र धन शत्रुनाश आदिमनोरथ से हतबुद्धि होय भूत प्रेत
पिशाच यक्ष [illegible]इ कहे नीच देवतो को पूजते है वे नियम
उपास वलिदान अंगीकार करिके अपनी कामना की वास-
ना केवश होय प्रकृत्या कही स्वभाव से इन देवतो की से
ही
वा करते है १० ॥

दोहा

तिन तिन काम सें ज्ञानहृत प्रापैं और हि देव तिह तिह नियम
को आश्रित वंधे स्वभाव सें पव २०॥

104

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् २१ ॥

शंकरभाष्यं

तेषां च कामिनां यो य इति यो यः कामी यां यां देवतातनुं श्रद्धया संयुक्तो भक्तश्च सन्नर्चितुं पूजयितुमिच्छति तस्य तस्य कामिनोऽचलां स्थिरां श्रद्धां तामेव विदधामि स्थिरीकरोमि ययैव पूर्वं प्रवृत्तः स्वभावतो यो यां यां देवतातनुं श्रद्धयार्चितुमिच्छतीति २१ ॥

आनंदगिरिकृतटीका

ननु देवताप्रसादात् कामिनामपि सर्वेश्वरे सर्वात्मके वासुदेवे क्रमेण भक्तिर्भविष्यतीत्याशंक्याह तेषां चेति स्वभावतो जन्मांतरीयसंस्कारवशादित्यर्थः भगवद्विहितया स्थिरया श्रद्धया संस्कारस्थितया देवताविशेषमाराधयतोऽपि भगवदनुग्रहादेव फलप्राप्तिरित्याह यो यो यामिति ईहते निर्वर्तयतीत्यर्थः २१ ॥

तेषां मध्ये ॥

स्वामिकृतटीका

यो यो भक्तः यां यां तनुं देवतारूपां मदीयामेव मूर्तिं श्रद्धयार्चितुं प्रवर्तते तस्य भक्तस्य तस्य तत्तन्मूर्तिविषयां तां तामेव श्रद्धामचलां दृढामहमंतर्यामी विदधामि करोमि [illegible] २१ ॥

५मि २१

पिशाचभाष्यं

यो यो यां यां तनुं देवताविग्रहं श्रद्धयार्चितुमिच्छति तस्याचलां श्रद्धां तामेव तद्विषयां विदधामि करोम्यहं २१ ॥

रामानुजभाष्यं

ता अपि देवता मदीयास्तनवः यश्चादित्ये तिष्ठन्यमादित्यो न वेद यस्यादित्यः शरीरमित्यादिश्रुतिभिः प्रतिपादिता मदीयास्तनवः इत्यजानन्नपि यो यो यां यां मिंद्रियादिकां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याजानतोऽपि मत्तनुविषयैवास्य श्रद्धेत्यहमेवानुसंधाय ता

गी॰ टी॰ स॰

मेवाचलांनिर्विघ्नांविदधामि ॥ २१ ॥

अभिनवगुप्तकृतटीका [illegible] ॥ २१ ॥ त्रयोविंशतौऽप्युक्तार्थम्

स्पष्टार्थम्

परमार्थप्रपाटीका

तेषांमध्ये योयइति योयोभक्तोयांयांतनुंदेवतारूपांमदंतर्यामिताकृत्वामद्रूपां श्रद्धयार्चितुंप्रयततेतस्यतस्यभक्तस्यतत्तन्मूर्त्तिविषयांतामेवश्रद्धाम चलांदृढामहंभक्तानामंतर्यामीविदधामिकरोमि ॥ २१ ॥

105

वनमालीटीका

ननुतत्तद्देवताप्रसादात्तेषामपित्वयिसर्वेश्वरेत्वनंतसद्गुणालयेभक्तिर्भ विष्यतीतितत्राहयइति योयःकामीयांयांतनुंदेवतामूर्त्तिंश्रद्धयाज न्मांतरवासनाप्राबल्येनयाभक्त्यासंयुक्तःसन्नर्चितुमर्चयितुमिच्छति प्रवर्ततेचौत्पत्तिकस्यागजभावयद्देवरूपमिदं तस्यतस्यकामिनस्तामे वदेवतातनुंप्रतिश्रद्धांचपूर्ववासनावशात्तांभक्तिमचलांस्थिरांविद धामिकरोम्यहमंतर्यामीतत्तन्महिषयांश्रद्धांतस्यतस्यकरोमीत्यर्थः तामेवश्रद्धामितिव्याख्यानेयच्छब्दात्तत्वयःस्पष्टस्तस्याप्रतिपाद्योऽध्या हार्यव्याख्याने ॥ २१ ॥

अत्तमैवजयंतीटीका

ननुपरापरात्मत्वत्प्रकृतिद्वयाभिन्नादेवतास्त्वदन्याःकथंभवेयुर्वा सुदेवःसर्वमित्युक्तविरोधात्तथचतासांतेषांप्रपदनंकथंत्वदेकायनः प्रपदनस्यश्रद्धामूलत्वात् श्रद्धायास्तत्वत्प्रकृतिगुणकार्यत्वेनत्वद धीनत्वात् तेनकामाअपित्वत्प्रकृतिकार्यत्वेनत्वेवाधीनास्तैस्तैः कामैर्हृतज्ञानानांत्स्यापिनसंगच्छतेइत्याशंक्ययआदित्येतिष्ठन्नादि त्योनवेदयस्यादित्यःशरीरमित्यादिश्रुतिप्रतिपादितात्तद्देवताश्र पिममैवतनवस्ताःश्रद्धाकामादीनप्यहमेवददामीत्याहद्वाभ्यांय योयोयांयामिति आदित्यादिदेवताभगवत्तनवःपरस्यतावत्तनुःसत्ते योयः आर्त्तादिर्भक्तोयांयामादित्याग्न्यादिरूपांतनुंमूर्त्तिंश्रद्धयाप्र वंसंचितराजसतामसकर्मवासनाजनितया अर्चितुमाराधयितुमि च्छतितस्यतस्याज्ञानतोऽपिभक्तस्यतामेवतत्तद्देवविषयामेवतत्तन्म हिषयामचलांविघ्नरहितांश्रद्धामहमेवविदधाम्युत्पादयामितत्तत्सा

स्तद्देवताविदधामीत्यर्थः ॥ २१ ॥

तत्तद्देवताप्रसादात्तेषामेव भगवति सर्वेश्वरे **मधुसूदनीटीका** देवात्तद्देवे भक्तिर्भविष्यतीति न शंकनीयं यतः॥

तेषां मध्ये यो यः कामी यां यां तनुं देवतामूर्तिं श्रद्धयान्वितः जन्मांतरवासना

बलप्रादुर्भूतया भक्त्या युक्तः सन् अर्चितुमर्चयितुमिच्छति प्रवर्तते वा

रादिकस्यार्चयते नीति भावपदे रूपमिदं तस्य तस्य कामिनस्तामेव

देवतातनुं प्रति श्रद्धां पूर्ववासनावशात्प्राप्तां भक्तिमचलां स्थिरां वि

दधाम्यहं करोम्यहमंतर्यामी न तु मद्विषयां श्रद्धां तस्य तस्य करोमीत्य

र्थः तामेव श्रद्धामिति व्याख्याने यच्छब्दानन्वयः स्पष्टस्तस्मात्प्रति

प्राङ्मध्याह्नस्थव्याख्यानं ॥ २१ ॥

सदानंदीटीका

यो यः कामी तत्तद्यां यां देवतामूर्तिमिच्छति पूर्वाभ्यासोद्भूतया भक्त्या

संयुतोर्चयितुं सदा । कामिनस्तस्य तस्याहमंतर्यामी महेश्वरः

तामेव देवतामूर्तिं प्रति श्रद्धां स्थिरां नितां करोमि तत्तमद्भक्तिस्तस्य

तस्य करोम्यहं नानाकामग्रहग्रस्ता मद्भक्तौ नाधिकारिणः २ ॥ २१

नीलकंठीटीका

किंच यो यो भक्तः सात्विको राजसस्तामसो वा यां यां तनुं ताहृशीमेव

देवादिरूपां यक्षरक्षोरूपां भूतप्रेतरूपां वा मूर्तिं श्रद्धयाताहृश्यैव

अर्चितुमिच्छति तस्य तस्य भक्तस्य तामेव श्रद्धां सात्विकीं राजसीं ता

मसीं वाहं सर्वेश्वरोऽचलां विदधामि ॥ २१ ॥

आनंदीटीका

अत्रासक्तिप्रकारमाह ॥

यः यः पुरुषः यां यां तनुं मित्रादिमूर्तिं जन्मांतरवासनाविर्भूतया श्रद्धया

तत्तत्फलप्राप्तये अर्चितुमिच्छति तस्य तस्य पुंसः तामेव तादृशीमेव श्र

द्धामहं परमेश्वरः सर्वेषां तत्तत्कर्मफलप्रापकोऽचलां विदधामि तत्र

तत्रैवाहमेव स्थिरां करोमि न तु मच्छरणां इत्यर्थः ॥ २१ ॥

रामकंठीटीका

गी॰ इत्थंस्थितेयोयंदेवतत्वः फलाभिलाषानुरूपेणयांयांचतुर्भुजत्रिनेत्रा
टी॰ दिविभक्तविशेषणांतनुंमूर्तिंभक्तः समाश्रितः सश्रद्धयातावन्मात्रा
स॰ फलदायिभिन्नदेवताविषययातत्तत्फलप्राप्तयेपूजयितुंवांछति
तस्यतस्यतामेवतावन्मात्रफलदायिभिन्नदेवताविषयांनान्यां
परामेकतत्वविषयामचलांतद्विषयत्वेनास्थिरामहंददामि म
त्प्रभवसात्विकादिसर्वभावोद्भवस्यप्राक्प्रतिपादितत्वात् २१ ॥

लाभिकी [illegible]टीका

तत्रतेषांमध्ये योयोभक्तोयांयांतनुंदेवतारूपांमदीयामेवतनुंमू
र्तिंश्रद्धयार्चितुमिच्छतिप्रवर्तते तस्यतस्यभक्तस्यतामेवमूर्तिवि
षयांश्रद्धामचलांदृढामहमंतर्यामीविदधामि २१ ॥

पंचोलीटीका

तेषांकामिनांमध्ये योयइति योयः कामीयांयांदेवतातनुंश्रद्धा
युक्तः भक्तःसन्अर्चितुमिच्छतितस्यतस्यकामिनांअचलांस्थि
रांश्रद्धांतामेवविदधामिस्थिरीकरोमिनतुभेदंजनयेदज्ञानां
कर्मसंगिनामित्युक्तत्वात् २१

[illegible]वी[illegible]मित्रोदयिनी ॥

योयइति योयोभक्तः पुमान् यांयां तनुं देवतास्वरूपलक्षणां
श्रद्धयाफलाव[illegible]भाव [illegible] नार्चितुं पूजयितुमिच्छति
तस्यतस्य तत्तदे[illegible] मेव देवतातनुंप्रतिश्रद्धा
मचलांस्थिरामहं परमेश्वरो विदधामि मामवगाह्यपृथ
क्तं निहतंवा तत्रैवनिमज्जयामीतिभावः २१ ॥

मधुभाष्य

२१॥

भाषाअनुवाद

भक्तों के वीच जो जो भक्त मेरी मूर्ति विशेष को याने जिस मूर्ति को अर्थात् देवता रूप को श्रद्धासे पूजने मे प्रवृत्त होते है उसी उसी भक्तकी भावनाकी अनुसार वह इच्छा अंतर्यामी रूपसी मै हरी कर्त्ता हौं अर्थात् सोई मूर्ति धारण कर उनका इष्ट सिद्ध करता हूं ११ ॥

दोहा

जोजो जिह जिह भक्त जन सश्रद्धा पूज्यो चाहि तिह तिह श्रद्धा अचल हुं देता हो मे ताहि २१॥

107

स तया श्रद्धया युक्तस्तस्याराधनमीहते लभते च ततः कामान्मयैव विहितान्हि तान् ॥ २२ ॥

शांकरभाष्यं

स तयेति तया मद्विहितया श्रद्धया युक्तः सन् तस्या देवतायाः तस्या आराधनमीहते चेष्टते लभते च ततः तस्या आराधिताया देवतायास्ततः कामानीप्सितान् मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञतया विहितान्निर्मितांस्तान् हि यस्मात्ते भगवता विहिताः कामास्तस्मात्तानवश्यं लभत इत्यर्थः हितानिति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यं न हि कामा हिताः कस्यचित् ॥ २२ ॥

आनन्दगिरिकृतटीका

आराधितदेवताप्रसादात् फलप्राप्तौ किमीश्वरेणेत्याशंक्य तस्य सर्वज्ञस्य सर्वकर्मफलविभागाभिज्ञस्य तत्तद्देवताधिष्ठातृत्वात्तस्यैव फलदातृत्वमित्याह सर्वज्ञेनेति एको बहूनां यो विदधाति कामानित्यादिश्रुतिमाश्रित्य हितानिति पदद्वयं व्याचष्टे यस्मादिति हितानित्येकं पदमिति पक्षमन्याह हितानिति मुख्यत्वसंभवे किमित्यौपचारिकत्वमित्याशंक्याह न हीति ॥ २२ ॥

स्वामिकृतटीका

ततश्च स तयेति

स भक्तस्तया दृढया श्रद्धया तस्याः तत्तो राधनमीहते करोति ततश्च संकल्पिताः तान् कामान् ततो देवताविशेषाल्लभते किंतु मयैव तत्तद्देवतान्तर्यामिणा विहितान्निर्मितान् हि स्फुटमेतत् देवतानामपि मदंशत्वान्मत्कृतित्वाच्चेत्यर्थः [illegible] ॥ २२ ॥

कामाः

तत्र

धी

पिशाचभाष्यं

स तया विहितया श्रद्धया युक्तस्तद्देवताविशेषस्याराधनमीहते करो

गी॰ टी॰ स॰

ति लभते च ततश्चाराधनात्कामानीप्सितान्मयैव विहितान्हितान्मयैव विहितान्हितान्फलात् २२ ॥

108

रामानुजभाष्यं

स तयेति स तया निर्विघ्नया श्रद्धया युक्तस्तस्येन्द्रादेराराधनं प्रतीहते चेष्टते ततो मन्त्रभूतेन्द्रादिदेवाराधनाज्ज्ञानेनवाहिस्याभिलषितान् कामान् मयैव विहितान् लभते यद्यप्याराधनकाले इन्द्रादयो मदीयात्मतनव इति नयवन्तं च मदाराधनमिति न जानंति तथापि वस्तुतो मदाराधनत्वादाराधकाभिलषितमहमेव विदधामि २२ ॥

अभिनवगुप्तकृतटीका[illegible] ॥ त्रयोविंशतौ उक्तार्थम्

परमार्थप्रपाटीका

स तयेति स भक्तस्तया श्रद्धया युक्तः सन् तस्याराधनमीहते करोति ततो ये संकल्पितास्तान्कामान् मयैव विहितान्दत्तानंतर्यामित्वेन मयैव त्वाहेवनाविशेषात् लभते [illegible] २२ ॥

वनमालीटीका

स कामी तया मद्विहितया स्थिरया श्रद्धया युक्तस्तस्या देवतायास्तन्वा आराधनं कर्तुमीहते निर्वर्तयति उपसर्गरहितोऽपि ईहतिः पूजार्थः ततो देवतातन्वाः सकाशात् कामानीप्सितांस्तान् पूर्वसंकल्पितान् हि प्रसिद्धं मयैव सर्वज्ञेन सर्वकर्मफलदायिना तत्तद्देवतान्तर्यामिणा विहितांस्तत्फलविपाकसमये निर्मितान् हितान् मनःप्रियानित्येकपदं वा अहितत्वेऽपि हितत्वेन अनुमीयमानानित्यर्थः २२ ॥

[illegible]टीका

किंच स तयेति स भक्तस्तया मद्दत्तया श्रद्धया युक्तः सन् तस्या देवतायास्तन्वा आराधनं पूजनमीहते चेष्टते ततश्च तदाराधनात् मयैव विहितान्दत्तान्रचितान्वाननन्तरं वै तान्कामांस्तांस्तानीप्सितान्कामा

नभिलाषान्न लभते प्राप्नोति हि युक्तोऽसमर्थः ममाचेतनरूपायाः प्रकृतेस्तथा योगमा
स्त्वं तिनत्रसंतारणात् जीवानर्हत्वमिच्छामि तान्सात्विकं निष्कामं कर्म कारयित्वा सा
त्विकीं श्रद्धां दत्वा मत्स्वरूपाप्तिं कारयित्वा मत्स्वरूपप्राप्तान् दत्वा महोलोकं प्रापयामि
यांस्त्वस्मिन्संसारे निवृत्तुमिच्छामि तानाकृतान्मनुष्यान् राजसतामससका
मकर्म कारयित्वा राजसीं तामसीं तत्तद्देवविषयिणीं श्रद्धां मयि दत्वैहिका
मुष्मिकाभोगेच्छारूपैर्विविधैः कामैर्हन्तन्तान्कारयित्वा नानादेवतास्व
स्वामित्वपरत्वरूपां बुद्धिं कारयित्वा तदाराधने महिमत्वेन च नित्यं संसा
रिणः कारयामि स एव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते
स एवासाधुकर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषत इत्यादि श्रुतेः
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिष्विति स्मृतेश्च त्रयाणामानीलीला
त्वेनमयः किंचिद्विलक्षणत्वात्ते नित्यबद्धा न भवंति किंतु बद्धमुक्तावस्था
राः सर्वोप्येवं तस्य मुक्तत्वादिति ॥ २२ ॥

मधुसूदनीटीका

स तया मद्विहितया स्थिरया श्रद्धया युक्तः तस्या देवतातन्वा आराधन
मारराधनं पूजनमीहते निर्वर्तयति उपसर्गरहितोऽपि राधयतिः पूजार्थः सो
पसर्गत्वेव्याकारः श्रूयते लभते च ततस्तस्या देवतातन्वाः सकाशात्कामा
२ नीप्सितान्पूर्वसंकल्पितान् हि प्रसिद्धं मयैव सर्वज्ञेन सर्वकर्मफलदायि
नान्तत्तद्देवतान्तर्यामिनां विहितान् तत्तत्फलविपाकसमये निर्मितान्हि
तात्मनः प्रियानित्येकं पदं वा अहितत्वेऽपि हितत्वया प्रतीयमानानित्य
र्थः २२ [illegible] व
[illegible]
[illegible] ॥
व

सदानंदीटीका

सकामी श्रद्धया युक्तो मद्विनिर्मितयानया तस्याश्च देवतातन्वा ईहनं क
हते सदा १ तस्याराधिताः याः स देवतायाः सकाशात् ईप्सितान् लभ
ते कामान्मयैव विधिनिर्मितान् १ हि प्रसिद्धं अतो लोके स्वकर्मफ
लदायिनः भासमानान्हितत्वेनाहितत्वेपि निवार्यतः ३ ॥ २२

नीलकंठीटीका

ततश्च तया श्रद्धया युक्तः सन् तस्या मूर्तेराराधनं संसाधनं वशीकरणमीहते
इच्छति ततश्च कामान् विभूयात् लभते मयैव विहितान् आज्ञापितान् हिता
न्हीप्सितान् एतेन सर्वत्र देवतानां स्वाज्ञावशवर्तित्वं दर्शितं २२ ॥

आनंदटीका

तत्र स तया श्रद्धया मयास्थिरीकृतया युक्तः तत्तदाराधिता हिरण्यगर्भादेः कामां
ल्लभते च ईश्वरादीनां कथमेतत्फलदाने शक्तिरित्याह मयैव सर्वज्ञेन त
त्कर्मफलदायकेन विहितांस्तान्कामांल्लभते विचारितं येन तत्तद्विचारचिर
धर्मफलदायालनकर्मानिर्णयं विनेत्येतन्मायकैर्मायामलाद्युद्दयनाचार्यैः २२
[illegible] २२ ॥

रामकंठीटीका

स तया मद्दत्तया श्रद्धया युक्तः सन् तस्याः देवताविशेषस्याराधनं प्रसादनमी
हते मनोवाक्कायैश्चेष्टते ततश्च देवताविशेषादाराधितात्स्वतः पूर्वोक्तरू
पारमार्थिकेन पात् मयैवैकेन कर्त्रा विहितान् विसृष्टान् हितान् तत्तत्फलान्कामान्भोगान् ल
भते किं तमात्मैककामीश्वरं सर्वमनोरथप्रदं सम्यग्ज्ञानाभावादजानता मनु
ष्याः अल्पमतीनां तेषां परिमितभोगलब्धिः २२ ॥

लासिकी [illegible]टीका

किंच स कामी तया मद्दत्तया श्रद्धया युक्तस्तस्य देवताविशेषस्याराधनमीह
ते मनोवाक्कायैश्चेष्टते यथाविधि तस्याः तनोराधनं पूजनं उपसर्गरहितेना
पि राधनिःश्चार्थः ततश्चाराधिताद्देवताविशेषात्तान्संकल्पितान्कामा
नीप्सितांल्लभते हि यतो मयैव तत्तद्देवतान्तर्यामिणा विहितान् निर्मितान्
पृथग्विहितान् तत्फलान् [illegible]
[illegible] २२ ॥

पंचोलीटीका

यतो यद्भवति तदाह मयेति स कामी तया मद्विहितया श्रद्धया युक्तः त
स्याः देवतातनोः तस्य देवताविशेषस्य आराधनमुपास्तिमीहते चेष्टते तत
स्मात् देवतातनोः सकाशादीप्सितान् हितान् कामान् मयैव निर्मितान् लभते

सतयेति सइतितच्छ्रद्धेनतत्तद्देवता रूपार्चनाभिलाषुकप
रामर्षिः तथाच तत्तद्देवतामूर्तिपूजनेच्छुः तयामयैश्वरेण
वलीकृतयाश्रद्धयायुक्तः सन् तस्यादेवतातोनराराधनमी
हतेव्यापारविषयतांप्रापयतिकरोतीतियावत् ततःपूजावि
धानानंतरं हि निश्चयेनतानितिवीप्सयाव्याख्येयं तोस्तानी
प्सितांकामान् फलेनदिवश्वयादिलक्षणांल्लभते यतोमयैव
सर्वैश्वरेणसर्वांतर्यामिणाचविहितान्स्रष्टान् सर्वमेवदैक
र्मधर्म्यमधर्म्यंवा तेनतेनशुभाशुभेनफलेनसहितमेवम
योत्पादितमितिभावः २२॥

मधुभाष्य

२२॥

110

सोमेरा भक्त उस अपनी श्रद्धासी अन्य देवकी उपासना
है और काम सो को पावताहै परंतु कामना मेरी
मैही देवता हूं क्योंकि मैं सर्व देवमय
हौ और देवता मेरी अधीनहैं ११

दोहा

तेहिं श्रद्धायुक्त सो करैं आराधन ताहि तासोंलहैं सम मनोरथ
मेहीं देवों वाहि २२॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसां देवान्देव
यजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

शंकरभाष्य

यस्मादन्तवत्साधनव्यापारा अविवेकिनः कामिनश्च ते अतः अन्तवदिति
अन्तवद्विनाशि तु फलं तेषां तद्भवत्यल्पमेधसामल्पप्रज्ञानां देवान्देव
यजो यान्ति देवान्यजन्तीति देवयजः ते देवान्यान्ति मद्भक्ता यान्ति माम
पि एवं समानेऽप्यायासे मामेव न प्रतिपद्यन्ते अनन्तफलायाहो खलु कष्टं व
र्तत इत्यनुक्रोशं दर्शयति भगवान् ॥ २३ ॥

आनन्दगिरिकृतटीका

ये त्वेवं कारिणः कामानां हितत्वाभावे हेतुमाह यस्मादिति किं च ये
कामिनस्ते न विवेकिनस्तत्राविवेक एव कत्वात् कामनां कृतोऽहित
त्वाशंक्येत्याह अविवेकिन इति कामानामनन्तफलत्वेन हितत्वमा
शंक्याह अन्तवदिति तेषामविवेकपूर्वकत्वमतः शब्दार्थः तथाह्यवधा
रणार्थः कामफलस्यानाशित्वे किमिति कामिनिष्ठत्वं तत्कामिना
शंक्य अल्पमात्यादित्याह अल्पेति किं तर्हि साधनमनन्तफलायेत्या
शंक्य भगवद्भक्तिरित्याह मद्भक्ता इति अन्तरार्थमुक्तश्लोकस्य तात्प
र्यार्थमाह एवमिति देवताप्राप्तौ भगवत्प्राप्तौ चेति शेषः मामेव ता
दो देवताविशेषं प्रतिपद्यन्ते अन्तवत्फलायेति वक्तव्यं उक्तवैपरीत्य
कारणमविवेकातिरिक्तं नास्ति इत्यभिप्रेत्याह [illegible]
र अहो खल्विति ॥ २३ ॥

तदेवं यद्यपि सर्वा अपि देवता ममैव तनवः स्वामिकृतटीका ततोऽल्पदाराधनमपि वस्तुतो मदाराधनमेव अहमेव च तत्

फलवैषम्यं भवतीत्याह अल्पमेधसां परिच्छिन्नदृष्टीनां तत्साधनमपि तत्फलं अन्तवत् विनाशि भव फलदातापि तथापि तु सा
ति तदेवाह देवानिति देवान्यजन्तीति देवयजः ते देवान् तत्तत्स्वयं यान्ति न्नात् मद्भक्तानां च तेषां च
मद्भक्ताश्च मामनाद्यनन्तं परमानन्दं प्राप्नुवन्ति [illegible]
[illegible] ॥ २३ ॥

श्री: टी: स: त्वं

पिशाचभाष्यं

अंतवत्फलं तत्तेषां विनाशो विघ्नेनयस्मात्तदंतवत्फलं तत्तेषां देवतानां तरल्पकामानां अत्यंमेधसामल्पबुद्धीनां देवानभिमतान्यजंतीति देवयजः मांनिराकृत्य मयि भक्ता भक्ताया यांति मामपि तस्मादनंतफलं २३ ॥

रामानुजभाष्यं

अंतवत्तु तत्तेषामल्पमेधसामल्पबुद्धीनामिंद्रादिमात्राराधनां तदाराधनफलं अल्पमंतवत्तु भवति कुतः देवान्देवयजो यांति इंद्रादिदेवांस्तद्याजिनो यांति इंद्रादयोपि परिच्छिन्नफलपरिमितकालवर्तिनश्च ततस्तसाम्यंप्राप्ता तैसह प्रच्यवंते मद्भक्तापि तेषामेव कर्मणां मदाराधनस्वरूपतां ज्ञात्वा परिच्छिन्नफलसंगत्यक्ता मत्प्रीणनैकप्रयोजना मामेव प्राप्नुवंति न च पुनर्निवर्तंते मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यत इति वक्ष्यति २३ ॥

अभिनवगुप्तकृतटीका

येऽन्तः केवलमेतेनोत्तमादिकामनात्मभावेन विचित्रेण परिच्छिन्नमनसो कामनापहृतचेतनास्तत्समचित्ता मेव ममैवावांतरतत्तद्देवताविशेषमुपासते अतो मत्त एव कामफलमुपाददते किंतु तस्यांतोस्ति कामनयैव तया परिमितीकृतत्वात् अत एवेंद्रादिभावनानंत्येण यागादिकुर्वतस्तथाविधमेव फलमुपाददते मद्याजिनस्तु मामेव २३

परमार्थप्रपाटीका

अंतवदिति अल्पमेधसां परिच्छिन्नदृष्टीनां मयादत्तमपि तत्फलं अंतवद्भवति विनाशि भवति तदेवाह देवान्यजंतीति देवयजः तेन्तवतो देवा न्यांति मद्भक्ता मामनाद्यंतं परमानंदं प्राप्नुवंति श्रुतिरपि यान्यपोत्याहिता नं तद्वत्त सलोकं जयत्यथ यो हैतानंतेनानुयात्येतं नंतं स लोकं जयतीति अव्ययात् प्राप्नोति योवै सर्वे ॥ वंतउपासतेनं

वनमालीटीका

तदेवं यद्यपि सर्वा अपि देवता ममैव तनवः अतस्तदाराधनमपि वस्तुतो ममाराधनमेव अहमेव तत्फलदाता तथापि साक्षान्मद्भक्तानां तेषां च फलवैषम्यं भवतीत्याह २३

112

ननु एवं तर्ह्यमितया भगवानेवाराध्यः फलदश्चेति तर्हि तदुक्तस्य फलस्य भ्रूभेदः
आराध्यात् फलात् को विशेषस्तत्राह अन्तवदिति अल्पमेधसां मन्दप्रज्ञत्वेन
वस्तुविवेकासमर्थानां तत् तद्देवताभक्तानां मया विहितमपि तत्तद्देवता
राधनजं फलमन्तवदेव विनाश्येव न तु मद्भक्तानां विवेकिनामिवानं
न्तं तेषामित्यर्थः कुत एवं यतो देवानिन्द्रादीन् अन्तवत एव यजन्ते मदन्यदेवता नै
राधनपरा मामन्तर्यामिनं न तु वस्तुगत्यापि तं सर्वेज्ञात्वा ग्राहकं सर्वफल
दं चाजानन्तो यान्ति नश्वरैर्देवैस्तत्तल्लोके सह तन्नश्यन्तीत्यर्थः मद्भक्ता
स्तु ये सकामाः प्रथममभीष्टान् कामानवाप्नुवन्ति ततो मद्भजनपरि
पाकात् मामनन्तमानन्दघनमक्षरं यान्ति अतः समानेऽपि सकामानाम
न्यदेवताभक्तानां मायासे महदन्तरम् तस्मात्साधूक्तमुदाराः २०
सर्व एवैत इति २३ ॥

अथममैवजयंतीटीका

ननु यदि देवतान्तरं तवः तनवः स्युस्तर्हि तदाराधनादपि संसारनिवृत्तिः कुतो न
स्यादिति चेत्तत्राह अन्तवदिति तेषामादित्यादिभक्तानां अतएवाल्पमे
धसां स्वल्पबुद्धीनां यन्मयैव विहितमपि तत्फलमभीष्टं तत् निश्चयेन अन्तव
त् अन्तो विनाशो विद्यते यस्य तत्तथा भवति तेषामल्पबुद्धित्वं नातिशयित
तत्त्वात् भगवत्तनवो भगवदधीना भगवद्दत्तैश्वर्या देवता इति ज्ञाना
भावेन मद्व्यतिरेकेणैव तात्त्विकाः सेवन्ते अतो यथा देवानामनित्यत्वं तथा
तत्फलमपि नाशवदित्यर्थः एवं कुतो भवतीत्यपेक्षायामाह देवानि
ति देवयजो देवभक्ता देवान् परिच्छिन्नैश्वर्यानादित्यादीन् यान्ति प्राप्नु
वन्ति देवानां परिच्छिन्नैश्वर्यत्वेनानित्यत्वेन तथा तद्भक्तानां तत्फला
नां चानित्यत्वं स्यादित्यर्थः मद्भक्ता मत्सेवानिरताः मदेकचित्ता अपि
ह्यवधारणार्थकः मामपि मामेव यान्ति प्राप्नुवन्ति तत्र हेतुः कर्णादिव
न्तोऽत्रार्थः मत्संधानि ममापरिमिताखण्डानापरिच्छिन्नस्वरूपगुणशा
क्तित्वेनापरिमिताखण्डैश्वर्यत्वान्मद्भक्तानामक्षयफलत्वं स्यादतो
न्यदेवभक्तानां न संसारनिवृत्तिः स्यादिति भावः २३ ॥

+ यद्यपि सर्वा अपि देवताः सर्वात्मनो मम एव तनवः मधुसूदनीटीका तदाराधनं अपि वस्तुतो मदाराधनमेव सर्वत्रापि च
+ अल्पमेधसां मन्दप्रज्ञत्वेन वस्तुविवेकासमर्थानां तेषां तद्देवताभक्तानां
त न्मया विहितमपि तत्तद्देवताराधनजं फलमन्तवदेव विनाश्येव न तु म

फलदाता अहमेव तथापि साक्षान्मद्भक्तानां चेतेषां च वस्तुविवेक
अविवेककृत फलवैषम्यं
भवतीत्याह ॥ +

113

भक्तानामविवेकिनामिवानंतंनफलंतेषांइत्यर्थः अतएवंइत्तोदेवानिंद्रादीनंत
वतनयवदेवयजोमदन्यदेवताराधनपरायणानियामवंति मद्भक्तास्तुयः
सकामाः पणमंमत्प्रसादादभीष्टकामानामवंति अपिषाहुल्प्रयोगात्
ततोमदुपासनापरिपाकात् मामनंतमानंदघनमीश्वरमपियांतिप्रामु
वंति अतःसमानेपिसकामत्वेमद्भक्तानामन्यदेवताभक्तानांचमहदंतरं
तस्मात्साधकामदाराःसर्वएवेनइति २३ [illegible]
[illegible] ॥

सदानंदीटीका

वस्तुतोदेवताःसर्वामामेवतनवोहरेः तत्पूजनंममैवास्तिइतिनैवकार्य
नः १ समस्तांतर्यामितयाफलदाताहमेवच तथापिसाक्षान्मन्नाये य
ताश्चपरायणाः २ विवेकतदभावाभ्यांफलंतेषांपृथक्पृथक् अल्पंतु
हिनपुरावस्तुविवेकात्नमचेतसां ३ देवतांतरभक्तानांनश्वरफल
नेफलं विनाशपेवतत्तस्यापिमद्भक्तानांतुनोनथा अतएवंयतोदेवा
निंद्रादीनेवताश्रिताः मदन्यदेवताज्ञानत्पराःप्राप्नुवंतितान् ५
मद्भक्तास्तुसकामायेतेनावैमत्प्रसादनात् अभीष्टान्प्राप्नुवंत्यवंतः
तोमामेवरहये ६ उपास्तिपरिपाकातेप्राप्नुवंत्यक्षरंपदं समानेपिस
कामत्वेमद्भक्तानांमहात्मतां ७ देवतांतरभक्तानांमहदस्त्यंतरंयतः
उदाराःसर्वएवैतेतस्मात्साधकामित्यपि ८ ॥ २३ ॥

नीलकंठीटीका

अल्पमेधसां अल्पयोग्यान्यफलानित्यकुर्वंति अन्यमन्तेन्यद्विज्ञानानि
नवल्पमितिश्रुतेः हैतंअल्पंतत्रैवमेधायेषांते बाह्यार्थाभिलाषिणामि
त्यर्थः तेषांतत्फलंअंतवत् सर्वस्यबाह्यार्थस्यानवत्वादेव तपाहेतुःभ
देनेश्वरभक्तेभ्योविभेदार्थः यतोदेवयजोदेवान्यजंतेइतिदेवयजस्तेदे
वानयंतपुक्तानेवयांति एवंयदादेवोभक्तायदान्तीनेवयांति भूतये
तभक्ताअभूतादीनेवत्यपिदृष्टव्यं मद्भक्तास्तुमामेवानंतंयांति अ
नंतःअनंतफलभाजइत्यर्थः २३ ॥

आनंदीटीका

प

परमेश्वरार्चनान्यदेवतार्चनयोर्विशेषमाह ॥

पितॄन्यांति पितृव्रताः भूतानि यांति भूतेज्याः अस्यां टीकायामधिकम्

तदुक्तं तेषामिंद्रादिभक्तानामंतवदल्पमेव फलं अल्पप्राज्ञादेवत्वाईश्वरो
नास्तीति परिमितात्मज्ञानमयामेधा बुद्धिर्येषां फलं स्वर्गादिकं तत्र
देवाराधनफलं अंतवद्विनश्वरं भवति न तु परमेश्वराराधनवदनंतमि
त्यर्थः शक्रादिभक्तानां भक्तितारतम्येन तत्तल्लोकयायादिप्राप्ता ना
मपि नियतमयः एतन्नमितिनन्यैवलद्विपिच्छानि रागागमेग्रली
यं ते प्रभवं न्यहरणमेइति एतदेवाह देवयजः इंद्रादीन् हविष
स्वाहाकारेण यजंतः देवान्यांति देवलोकं यांति पितृव्रताः स्वधा
कारेण पितॄन्यजंतः पितृलोकं यांति भूतेज्याः भूतान्बलिहरणनमस्का
रेण यजंतः भूतानि यांति तां तां भोगभूमिं प्राप्नुवंति देवादिलोकप्रा
प्यफलत्वे येज्ञ न आवर्तंते इत्यर्थः लब्ध्वा ति चैतदा ब्रह्मभुवनादि
ति [illegible]
[illegible] ४ ॥

रामकंठीटीका

फलं मंतवदनित्यं भवति ते ज्ञानमोहिताः संत आत्मानं देवतां
फलं च नानात्वेन प्रतिपद्यंते ततश्च देवान्नानात्वेन प्रतिपन्नान्व ये
तादिभिरंतवद्भिः क्रियाविशेषैर्यजंते प्रीणयंति ते देवान्यांति तत्र
देवताधिकरणभूतं तं तं देवलोकं गच्छंति ये तु मां यथोक्तस्वरूप
मेकं तत्त्वं यथाप्रतिपादितं क्रमेण मदिच्छयैव प्रेर्यमाणाः सं
नेज्ञानि त्वदर्शनाधिरोहपर्यंतेन भक्ताः समाश्रितास्ते मामेव पर
मकारणं यांति अहमित्यभेदेन समापद्यंते [illegible]
[illegible] ५ ॥

यद्यपि तद्देवताराधनं मदाराधनमेव किंतु

लासिकी [illegible]टीका

तेषां तद्देवताभक्तानामल्पमेधसां परिच्छिन्नदृष्टीनां तत्फलं त्वम
पि फलमंतवदनित्यं भवति नित्येष्वेव वासनया परिमितीकृत
त्वात् ननु मदाराधनं फलं तत्त्वं उपेत्यावामस्तमाधानं यथा

गी॰ टी॰ स॰ यंत्यन्यदेवताः भिद्यंतेभूरिविघ्नैस्तेभिद्यितापिभक्तिताः इति अत्र
त्रापि उपेत्यनतीर्थयात्राजपादीनवकुर्वतो पिदंसमस्तस्त्यकोल
ह्नि न्यायेप्रापनेदिति अतएवं यतोदेवयजस्तत्रदेवतायाससकाम
नादेवातंतवतोयांति प्राप्नुवंति मद्भक्तामामेश्वरस्यमद्भक्तामामतो
यंतं यांति अतःसमानेपिसकामत्वे मद्भक्तानामन्यदेवतानांभक्ता
नांचमहदंतरं तस्मात्साधुक्तमुदाराः सर्वएवैतेइति २३ ॥

पंचोलीटीका

114

एतेषांकामिनांफलस्यतुच्छमाह अंतवदितित्वपुनःतेषांअल्पमे-
धसांअल्पप्रज्ञानांतत्फलमंतवत्विनाशिभवतिदेवयज्ञःदेवान्य
जंतीतिदेवयज्ञःदेवान्यांतिप्राप्नुवंतिमद्भक्तामामपियांतिप्राप्नु
वंतिएवंसमानेप्यायासेअनंतफलायमामेवनप्रपद्यंते अहोवत्
कष्टमित्यनुक्रोशंदर्शयतिभगवान् २३

रत्नावीरसमिद्धोयिनी॥

नतुयदिभवानेवसर्वकर्मस्रष्टा सर्वकर्मकारयिता सर्वकर्मफ
लदाताच तत्कोविशेषस्तेषांभवद्भक्तानांचेत्याह अंतवत्विति
तुपाद्योविशेषे तेषांतद्देवतामूर्त्याराधकानांतत्फलंसंकल्पि
तकामलाभरूपमंतवत्साववधानंभवति तत्कामात्रस्थित्याधी
ब्रंनश्यतीत्यर्थः यतस्तेल्पमेधसः अदृढनिश्चयेसेनबुद्धिही
नाइत्यर्थः अतएवदेवयजोदेवतांतरपूजकादेवान्यांति अनित्यां
स्तल्लोकान्गच्छंति मद्भक्तामामपियांतिमत्सायुज्यमाप्नुवंति
संसारान्मुच्यंत इतिभावः २३

मधुभाष्य

२३॥

भाषाअनुवाद

अब कहतेहैं कि यद्यपिदेवता मेरी ही मूर्तिहैं और उनकी इच्छाभी मेरी ही इच्छा है तथा कर्म्म फलदाता भी हम ही हैं पर तौभी इन अल्प बुद्धियों को अंतवंत कहे विनाशी फल होता अर्थात् स्वर्ग आदि सात्विक स्वल्प कछु दिनके लिये होता है क्यों कि साक्षात् मेरी उपासना नहीं कियाहै और जो जिस देवता को भजते हैं सो उसी को प्राप्त होता और मेरे भक्त जन्म नाश रहित होयके मेरीहीको प्राप्त होता है २३ ॥

दोहा

फल तिनके नाशहि सहित अल्पमतिनको होय देव यजी देव
हि मिलें मम भक्त मिलहैं मोय २३ ॥

115

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः । परं भावमजा
नन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

शांकरभाष्यं

किंनिमित्तं त्वामेव न प्रपद्यन्ते इत्युच्यते अव्यक्तमिति अव्यक्तमप्रकाशं
व्यक्तिमापन्नं प्रकाशं गतं इदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वरमपि
सन्तमबुद्धयोऽविवेकिनः परं भावं परमात्मस्वरूपमजानन्तोऽविवे
किनो ममाव्ययं व्ययरहितमनुत्तमं निरतिशयं मदीयं भावमजा
नन्तो मन्यन्त इत्यर्थः २४ ॥

आनन्दगिरिकृतटीका

भगवद्भजनस्योत्तमफलत्वेऽपि प्राणिनां प्रायेण तन्निष्ठत्वाभावे
प्रश्नपूर्वकं निमित्तं निवेदयति किंनिमित्तमित्यादिना अप्रकाशं
शरीरग्रहणात् पूर्वमिति शेषः इदानीं लीलाविग्रहपरिग्रहाव
स्थायामित्यर्थः प्रकाशस्तर्हि कदाचित्कत्वे भगवति प्राप्ते नेत्या
ह नित्येति कथं तर्हि भगवन्तमागन्तुकप्रकाशं मन्यन्ते तत्राबुद्ध
य इत्युक्तं न हि बुद्धोऽनिपरमिति परमनुत्तममिति विशेषणद्वयं
सोपाधिकनिरुपाधिकभावार्थं २४ ॥ ^मि

^ ननु च समाने प्रयासे महति च फलविशेषे सति सर्वेऽपि किं देवतान्तरं हित्वा
त्वामेव न भजन्ति तत्राह ॥

स्वामिकृतटीका

^ अव्यक्तमिति अव्यक्तं प्रपंचातीतं मां व्यक्तिं मनुष्यमत्स्यकूर्मादिभावं
प्राप्तमल्पबुद्धयो मन्यन्ते तत्र हेतुः मम परं भावं स्वरूपमजानन्तः ^मद्
कथंभूतमव्ययं नित्यं न विद्यते उत्तमो यस्मात् तं भावमतो जगद्रक्ष ^भावो
णार्थं लीलया विशुद्धोर्जितसत्त्वमूर्तिं मां परमेश्वरमक
र्मनिमित्तभौतिकदेहं च देवतान्तरसमं पश्यन्तो मन्दमतयो मां ना
तीवाद्रियन्ते प्रत्युत क्षिप्रफलदं देवतान्तरमेव भजन्ति ते चोक्तप्रका
रेणान्तवत्फलं प्राप्नुवन्तीत्यर्थः २४ ॥

पिशाचभाष्यं

किंनिमित्तं भगवन्तं विहाय देवतान्तरं यजन्तीति प्रश्नेन वचनमाणं

गी॰ टी॰ स॰

क्याह अव्यक्तमविद्यमानव्यक्तिभावमिमं संसारिभ्रूष्टवदायत्तं प्राप्तं मन्य
ते जातं निमामबुद्धय अविवेकिनः लोकिकाजनाः ममपरं ब्रह्मस्वरूपं परमा
त्मभावमजानंतः अचेतयंतः अव्ययमविनाशिनं अनुत्तमं निरुत्तमं
मां विहाय देवतांतरं भजयंति २४ ॥

116

रामानुजभाष्यं

इतरेषुसर्वसमाश्रयणीयत्वायमंमनुष्यादिष्ववतारमपिकिंचित्कारं
कुर्वंतीत्याह अव्यक्तमिति सर्वैःकर्मभिराराध्योहंसर्वेश्वरःपरमकारु
णिकआश्रितवात्सल्यात्सर्वसमाश्रयणीयत्वायाजहत्स्वभावएववसु
देववृष्णावतीर्णइतिममपूर्वंपरंभावमव्ययमनुत्तमंअजानंतःप्रा
कृतराजसूनुसमानमितिःएवंमनभिव्यक्तमिदानींकर्मणाजन्मवि
शेषंप्राप्यव्यक्तमापन्नमबुद्धयोमामन्यंतेअतोमांनाश्रयंतेनक
र्मभिराराधयंतिच २४ ॥

अभिनवगुप्तकृतटीका

ननुसर्वगतेभगवतिक्किमितिदेवतांतरोपासकानांमितंफलम्
उच्यते नेवल्वल्पबुद्धित्वात्मत्स्वरूपंपरमार्थिकमविद्यमानाविज्ञ
कंनयमाभिजानंते अपितुनिजकामितामनाविताकारविशिष्ट
ज्ञानस्वभावांव्यक्तिमेवापन्नांविदंति नान्यथा अतएवतात्पाका
रेवाकस्मिग्रहाः किंतुसिद्धांतोयमत्रयःकामनापरिहारेणयत्किं
चिद्देवतारूपमालंबतेनतस्यतत्कुत्तमव्यक्तभावेनपर्यवस्यति विप
र्ययात्तुविपर्ययइति २४ ॥

परमार्थप्रपाटीका

+नत्रुचसमानेप्रयासेमहतिचफलवि शेषेसतिसर्वेपिदेवांतरं हित्वाकि मितित्वामेव नभजंतीत्याह॥ +

अव्यक्तमिति अव्यक्तंप्रपंचातीतंमनुष्यमत्स्यकूर्मादिदेहधारित्वे
नव्यक्तिमापन्नंप्राप्तमामित्यल्पबुद्धयोमन्यंते तत्रहेतुः ममपरंभा
वंत्वात्त्विकंस्वरूपमजानंतः कथंभूतंभावंअव्ययंअनुत्तमंनवि
द्यतेउत्तमंयस्मात् जगदुद्धारणार्थमविकृतएवाहंसत्वस्वरूपः कृष्ण
फलदातारमजानंतस्तुकालफलदंदेवतांतरमुपासतेतेषामंत
वत्फलंभवति २४ ॥

वनमालीटीका

ननु तर्हि जनास्त्वत्सेवं फलकत्वेन त्वद्विमुखाः सन्तः कथमन्यदेवानुपासते
जीवास्तत्राह अव्यक्तमिति अव्यक्तं इन्द्रियाद्यगोचरं भोगादृष्टादिभा
वेनानित्यदेहशून्यं नित्यप्राकृतभौतिकदिव्यविग्रहं जगदनुग्र
हाय कृपयैव स्वेच्छयैवाविर्भूतं सन्तं मयीश्वरं मां देहग्रहणान्नाकार्यं
व्यक्तिमिदानीं वसुदेवगृहे व्यक्तिं भौतिकदेहप्राप्त्यकार्यं न मनागप्य
संजीवसाधारणमबुद्धयो नाथविषयानन्दविवेका मन्यन्ते यद्वा अ
व्यक्तं सर्वकारणमपि मत्स्याद्यनेकनित्यरूपैः स्थितं कृपया कदाचि
त्तत्तद्रूपेणाविर्भूतं सन्तं मां व्यक्तं कार्यरूपं तो मत्स्याद्यनेकावतारस्वरूपे
णाग्रामे मन्यन्ते अबुद्धयस्तत्त्वं विदुषोऽपीति परं भावं सर्वजगद्धृदया
दिकर्तृत्वं सर्वान्तर्यामित्वं सर्वाधारत्वं चेत्यादि अव्ययं ध्वंसप्रागभा
वादिरहितानन्तत्रगुणदेहादिवैभवम् अनुत्तमं सर्वोत्कृष्टं मम
वसुदेवसूनोरजानाहंगैश्वर्यमजानन्तो मां विहाय देवान्तरं भजं
ति ततस्तान्तवदेवफलं प्राप्नुवन्तीत्यर्थः २४ ॥

श्रीमद्वैजयन्तीटीका

अप्सानांनाविजेत्तमन्तस्वरूपज्ञानाभावः मन्यपदेन [illegible] भावस्य प्रसज्जन
सर्वेश्वरस्य मम मनुष्यादिष्ववतारमपि प्राकृतजीववत्कर्माधीन
मसमर्थेन मन्यन्ते इत्याह अव्यक्तमिति अबुद्धयो मत्स्वरूपान्यथा
ज्ञाना महिम्नाथायेन्य ननालेन मम नित्यस्वाभाविकानन्तकल्या
णगुणात्मकस्यानन्तशक्तेरनन्तधर्माश्रयस्य सविशेषस्य अनन्तमे
नाल्पज्ञमनुकृत्वायस्माल्लनयाति प्राय सामर्थ्यशून्यमित्यर्थः अव्य
यं व्ययशून्यं कर्माधीनप्राकृतजीववज्जन्मवत्परिणामादिरहितं दि
व्यमित्यर्थः परं धर्मफलदानाय धर्मविनाशाय सतां समाश्रयणाय
सतां मोहनं यं [illegible] निखिलनिजदिव्यापरिमितपराक्रम ऐश्वर्यादि
गुणगणाश्रयादिकं मन्यन्तेनल्वेवयदुवंशे वसुदेवाद्देवक्यामवतीर्णं इ
त्याकारकं भावं तत्त्वभावस्वभावं प्राय चेष्टा जन्मनां लक्षिया
लीलापदार्थेषु विभूतिषु यन्नत्विनि मेदिनीकोणान्नवणादो
त्व नराश्रयवाचकः स्वेच्छया प्राप्नुर्भावं नतु जीववत्कर्माधीनं अजा

गी० टी० म० 117

नेनः संतो यन्मायामोहितत्वेन मद्भक्तिविमुखत्वाद्दविवेकिनः संतोऽव्यक्तं स
र्वप्रपंचातीतं शास्त्रादिसूक्ष्मत्वेन स्थितं निर्विशेषमनभिव्यक्तमिदानी
नं व्यक्तिमापन्नं मायिकगुणेन कर्मणा च व्यक्तिं मायाकृतमनुष्य
देहमापन्नं प्राप्तं मामहमर्थं स्वरूपं मायागुणरहितं नित्यानंदादिव्य
कारुण्यादिकल्याणगुणगणविभूषितं मां सर्वेश्वरं प्राकृतजनवज्जन्मा
दिमन्तं मन्यंते न जानंति अतो मामनादृत्य ते न प्रपद्यंत इत्यर्थः २४ ॥

मधुसूदनीटीका

एवं भगवद्भजनस्य सर्वोत्तमफलत्वेपि कथं प्रायेण प्राणिनो भगवद्विमुखा इत्यत आह भगवान् ॥

अव्यक्तं देहग्रहणात्प्राक्कार्याक्षमत्वेन स्थितमिदानीं वसुदेवगृ
हे व्यक्तिं भौतिकदेहावच्छेदेन कार्यक्षमतां प्राप्तं कंचिज्जीवमेवम
न्यते मामीश्वरमप्यबुद्धयो विवेकशून्या अव्यक्तं सर्वकारणमपि मां
अनेका व्यक्तिं कार्यरूपतां मत्स्यकूर्मवनावताररूपेण प्राप्तमिवा कथं ते जीवा दि
त्मानं विविंचंति तत्राह यदनिहितं विहृणोति परं सर्वकारणरूपं उक्तं
अव्ययं नित्यं मम भावं स्वरूपं सोपाधिकमजानंतः तथा निरुपाधिक
मपि अनन्तमं सर्वोत्कृष्टमनतिशयाद्वितीयपरमानंदघनमनंत
ममस्वरूपमजानंतो जीवानुकारिकार्यदर्शनाज्जीवमेव कंचिन्मां
तो मन्यंते तं मामनीश्वरत्वेनाभिमन्य विहाय प्रसिद्धं देवतांतरमेव भजं
व ते ते न ममानंदरूपफलं प्राप्नुवंतीत्यर्थः अग्रे वक्ष्यते अवजानंति मां व
मूढा मानुषीं तनुमाश्रितमिति २४ ननु जन्मकालेपि सर्वयो
गिध्येयं श्रीवैकुंठस्थानेश्वरमेव रूपमाविर्भावितवानसि संप्रति च श्री
वत्सकौस्तुभवनमालाकिरीटकुंडलादिदिव्योपकरणशालि
नि कंबुकमलकौमोदकीचक्रवरधारि चतुर्भुजे श्रीमद्वैनतेयवा
हने निखिलसुरलोकसंपादितराजराजेश्वराभिषेकादिमहावै
भवे सर्वसहस्रनेत्रादिविविधदिव्यलीलाविलासशीले सर्वाव
तारशिरोमणौ साक्षाद्वैकुंठनायके निखिललोकदुःखनिस्तारा
यभुवमवतीर्णे विरिंचिप्रपंचासंभविनिरतिशयसौंदर्यसारस
र्वस्वमूर्तौ बाललीलाविमोहितविधातरि तरणिकिरणोज्ज्वलदि
व्यपीतांबरे निरुपमश्यामसुंदरीकरदीकृतनपारिजातार्थपराजि

नपुरंदरेवाणगुरुद्दविजितनरणपांकुपेरवरे समस्तसुरासुरविजयिनरक
प्रभृतिमहादैतेयप्रकरग्रासपर्यंतसर्वसंहारिणि श्रीमदादिपुर
मरूकामहावैभवकारिणियोऽपासहस्त्रदिव्यरूपधारिणापरिमेय
गुणगरिमणिमहामहिमनिनारदमार्कंडेयादिमहामुनिगणा
स्तुतेत्वय्येकपणमविवेकिनोपिमनुष्यबुद्धिजीवबुद्धिर्वाऽस्यज्ञेन
णंकामपिनिनीषुराह भगवान् ॥

सदानंदीटीका

सर्वोत्तमफलंश्रीमद्भगवद्भजनंयदि कथंप्रायेणलोकास्तेभावा
हिमवाश्नुति १ अपेक्षायांहरिःप्राहस्वयंहेतुंजगद्गुरुः अव्यक्तम
प्रकाशंमांमायादेहग्रहणात्स्थितं वसुदेवगृहेव्यक्तिमसमदादि
वदागतं इतिमन्यंतइत्यनेनविवेकरहिताजनाः सर्वकारणमी
शानंमांव्यक्तिकार्यरूपतां मत्स्यकूर्मादिरूपेणप्राप्तमेवेत्यर्थंइष्यंता
अविवेकतयामूढाविचारंनाश्रियंतीति सर्वकारणरूपंयत्तेत्व
स्मि सोपाधिकंमम ५ स्वरूपमजानंतस्तथैवनिरुपाधिकं सर्वोत्कृ
ष्टपरानंदघनमद्वैतमव्ययं ६ निर्विकल्पस्वरूपंमे विहितस्यमहे दू
शितुः अजानंतोल्पलोकानुकारिणंमानवंविदुः ७ ततोमामीह
शंमत्वादेवतांतरमाश्रिताः यंतवंतफलंप्राप्यसंसारेऽपि भ्रम
तीति ८ मत्स्वरूपपरिज्ञानंमहाभाग्यफलंयतः तस्मात्त्वंमांविजा
नीहिसच्छुद्धंनिर्गुणंचवा तावन्मात्रेणमुक्तिस्तेभवितेत्याशयोऽह
रेः १० २४ ॥

नीलकंठीटीका

एवंनहिज्ञनस्त्वामेवसर्वेनप्रतिपद्यंतइत्याशंक्याज्ञानादित्याह
अव्यक्तमिति अव्यक्तंसर्वोपाधिशून्यत्वेनअस्पष्टमपिवासुदेवशा
रीरेणव्यक्तिमापन्नं अस्मदादिवच्छरीरेभिमानितेनमामबुद्धयोमन्य
ते यतःममपरंभावंपरत्वंउत्कृष्टत्वमजानंतः उत्कृष्टत्वमेववि
शिनष्टि अव्ययंनवेनीत्यव्ययंअविनाशिनं अतएवमत्परंमत्प्रसादत्व
उत्कृष्टंवनास्तिनिरतिशयमखंडैश्वर्यरूपमित्यर्थः २४ ॥

आनंदी टीका

परमयोगिभिरनेकजन्मयत्नप्रत्यक्षीकरणीयमपीदानींभवंतमीश्वरंलोकानांभाग्य
वशादत्रप्रत्यक्षेवर्तमानंकथंनसर्वेभजंतेइत्याह ॥

गी॰ टी॰ स॰

118

आनंदीटीका

नास्तिव्ययोविकारोयस्यसोव्ययम् नविद्यतेउत्तमः कश्चित्कारणंय
स्मात् जगत्कारणानांसर्वेषांपरमकारणं ईदृशंममपरंसर्वोत्तमं
भावंस्वभावमजानंतः अतएवाबुद्धयोस्वल्पमतयोभिभवान्हीनही
नाः मांप्रपंचात्प्राक्स्थितमपिअव्यक्तंव्यक्तिमापन्नंमन्यतेकेचनप्रा
कृतजीवमिवदृश्यंशरीरग्रहणान्पूर्वमव्यक्तमदृष्टमेवमिदानींश
रीरग्रहणेनव्यक्तिंप्रदर्शनतामापन्नंमन्यंतेप्राक्कर्मवशादवजातंमां
सामान्यंजीवंमन्यते [illegible] २४ ॥

रामकंठीटीका [illegible] २४ नास्ति

लासिकी [illegible]टीका

ननुसमानेपिप्रयासेमहतिचफलविशेषेसति सर्वेपिकिमितिदे
वतांतरंहित्वात्वामेवनभजंते इतिनत्राह ॥ अबुद्धयः परिच्छिन्न
देहादिनिष्ठबुद्धयोमंदा प्रज्ञाममेश्वरस्याव्ययंस्वरूपादप्रच्युत
मनुत्तममनुत्तमंपरंभावमनुत्कृष्टंस्वभावमजानंतः अप्रज्ञाभिजानंतः
अव्यक्तंप्रपंचातीतंसंतंमांव्यक्तिंमनुष्यमत्स्यादिभावंप्राप्तंमन्यंते
अतोमामीश्वरमपिकारणनिमित्तभौतिकविग्रहंदेवतांतरंचसम
पश्यंतोमांनभजंते अन्यतदेवतान्तमेवभजंते तेषामल्पमेधसा
मार २४ ॥

पंचोलीटीका

किंनिमित्तंमामेवनप्रपद्यंतेइत्यत्राह अव्यक्तमिति अबुद्धयोमा
मव्यक्तस्यहंसंसारातीतंस्थावरजंगमादिरहितमव्ययमनिरतिश
यंव्यक्तिंस्पष्टतामापन्नंप्राप्तंमन्यंतेजानंतिमामीश्वरमपिसंतंमम
परंभावंपरमात्मस्वरूपंअव्ययंव्ययरहितमनुत्तमंनिरतिशयंभा
वमजानंतइत्यर्थः २४

एवमासुरं दैवं च सर्गमुक्त्वा तेषां कर्म च तत्तत्फलविशेषसहित
मुक्त्वेदानीं तस्मिन्नसक्तं वैषम्यं परिहर्तुमाह अव्यक्तमिति
अबुद्धयो निश्चयात्मकज्ञानहीनाः अव्यक्तं चक्षुरादिभिरग्रहीत
मप्रकाशं सन्तं मां व्यक्तिमापन्नं मनुष्याकृतिधारिणं मन्यंते अय
मेव मनुष्येष्वेक इति जानंति न पुनः परमकारणत्वेन मन्यंते
यतस्ते मम परं भावं सूक्ष्मं स्वरूपं न जानंतीति अजानंतः कीदृ-
शमव्ययं अविनाशिनं अत एवोत्पत्तिहीनमपि असत्त्वेव वस्तु
त्वयत इति तथा च नित्यमिति पर्यवसितोऽर्थः अनुत्तमं सर्वोत्त
मं अथवा भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्विति नामा
नुशासनात्परं भावं सूक्ष्ममभिप्रायं जगत्पालनाय धर्मसंस्था-
पनाय च तत्तद्देहधारणमजानंतः तत्र अव्ययमिति नित्यप्र-
तिज्ञांतत्स्वीकारात् अनुत्तममिति अत्युत्तममित्यर्थः अत
एवमदभिप्रायानभिज्ञानादेवदेववत्तांतरं यजंत इति २४॥

मधुभाष्य

अव्यक्तमिति कार्यदेहादिवर्जितं तद्धानिवप्रतीयत इत्यत आ
ह व्यक्तिमापन्नमिति कार्यदेहाद्यापन्नं तदुक्तं सदसतः
परं न तस्य कार्यं अपाणिपादः आनंददेहं पुरुषं मन्यंते गो
णादेहिकमित्यादौ भावं पापार्थं तथाब्रवीव याथातथ्यम-
जानंतः परं तस्याविमोहिता इत्यादि अज्ञानेवमदिच्छयेत्या
ह २४॥

119

भाषाअनुवाद

और जो ऐसी शंका करे कि ध्यान पूजा आदि प्रयत्न तो समान और फलमे वैषम्य कहे बड़ा अंतर है तो फेरि सब देवतों को त्याग करि तुम ही को कौन सब भजें इसपर कहते हैं कि अल्प बुद्धि मनुष्य प्रपंच रहित हम को मनुष्य कूर्म स्वरूप ठहराते है इ मत्स्य सका कारण यहकि वे लोग मेरे श्रेष्ठ रूपको नहीं जानते हैं सोई रूप प्रकाशित करतेहै कि जो अव्यय कहे नाश रहित और जिससे और कोई उत्तम नहीं है परंतु संसार की रक्षाके अर्थ लीलासे विशुद्ध सत्व प्रधान जो मै तिसको कर्म्मोसे उत्पन्न भौतिक कहे पंचभूतमय देहधारी और देवता की नाई जानिकै हमारे प्रति अधिक आदर नहीं करते है वरु शीघ्र फलदाता और देवतोंको भजते है वेई अंतवंत फल पावते है २४ ॥

दोहा

बिना रूपयुत रूपमोहि मानत हे मतिहीन परमभावनहि
जानहि अव्यय मोर अहीन २४ ॥

120

नाहंप्रकाशःसर्वस्ययोगमायासमावृतः मूढोयं
नाभिजानातिलोकोमामजमव्ययम् २५ ॥

शंकरभाष्य

तदज्ञानंकिंनिमित्तं इत्युच्यते नाहमिति नाहंप्रकाशःसर्वस्यलो
कस्यकेषांचिदेवमद्भक्तानां प्रकाशोहमित्यभिप्रायः योगमाया
समावृतः योगोगुणानां युक्तिर्घटनंसैवमायायोगमाया तयायो
गमाययासमावृतासंछन्न इत्यर्थः अतएवमूढोलोकोयं नाभिजा
नाति मामजमव्ययं २५ ॥

आनन्दगिरिकृतटीका

अविवेकरूपमज्ञानंभगवन्निष्ठाप्रतिबंधकमुक्तं तस्मिन्नपि निमित्तं
प्रश्नपूर्वकमनाद्यज्ञानमुपन्यस्यति तदज्ञानमित्यादिना निर्गु
णमैश्वर्यनिरुपाधिकरूपस्याप्रतिपत्तौकारणमुक्तमधुनासोपाधि
कस्याप्रतिविशेषं गृहीत्वाव्याचष्टे नाहमिति नहिभगवद्भक्ति
रतप्रयुक्तेत्याशंक्याह केषांचिदिति सर्वस्यलोकस्य तदप्रकाशेह
मित्यत्रहेतुमाह योगेति अनाद्यनिर्वाच्याज्ञानाछन्नत्वादेव म
द्विषये लोकस्यमोहस्ततश्चमदीयस्वरूपविवेकाभावान्मन्निष्ठत्व ता
दुर्लभमित्याह अतएवेति २५ ॥

नाहमिति स्वामिकृतटीका

तेषांस्वाज्ञानेहेतुमाह सर्वस्यलोकस्यनाहंप्रकाशः प्रकटोनभवामि
किंतुमद्भक्तानामेवयतोयोगमाययासमावृतः योगोयुक्तिः मदीयः
कोपिचिंत्यः प्रज्ञाविलासः सएवमायाअघटमानघटनापटीयस्त्वा
त्तयासंछन्नः अतएवमत्स्वरूपज्ञानेमूढःसन्नयंलोकोअजंअव्ययं म
चमांनजानाति [illegible]

पिशाचभाष्य

नाहंप्रकाशःसर्वस्यलोकस्यकेषांचिदेवभक्तानांमत्प्रकाशोहमि
त्यभिप्रायःअतोयोगाएवमायायोगमायासमावृतः मूढोयम

गी॰ टी॰ स॰

मिथ्याविवेकी लोको नाभिजानाति मामजमव्ययं उत्पत्तिविनाशरहितं २५

रामानुजभाष्यं

अत एवं तत्प्रकाशनं न कृतवानहं नाहमित्यमनुष्यत्वादिसमानसंस्था-
नयोगमायया समावृतोऽहं न सर्वस्य प्रकाशः मयि मनुष्यत्वादि-
समानसंस्थानमात्रेण मूढोऽयं लोको माम तीन्द्रियकर्माण- य॰
मतिसूर्याग्नितेजस्समुपलभ्यमानमपि अजमव्ययं निखिलजगदेक- ग१
कारणं तेवैश्वरं मां सर्वसमाश्रयणीयतया मनुष्यत्वसमानसंस्था-
नमास्थितं नाभिजानाति २५ ॥

अभिनवगुप्तकृतटीकायामुक्तं (?) २५

सर्वेषां नाहं गोचरतां प्राप्नोमि २५

परमार्थप्रपाटीका

तेषां स्वाज्ञानहेतुमाह नाहमिति सर्वस्य लोकस्य नाहं प्रकाशः
अन्तर्यामित्वेन वर्तमानोऽपि परतत्त्वप्रकाशको न भवामि किंतु मद्भ-
क्तानामेव यतोऽयं लोकः योगमायासमावृतः सन् मूढोऽस्ति अतो
मामजमव्ययं न जानाति यद्वा सर्वस्य लोकस्य ज्ञानरूपः प्रकाशः
अविवेकस्यर्यया योगमायया समावृतोऽस्ति परं तेनाहं समावृतः
यतो योगमाया तत्स्वाश्रया व्यामोहिनी यथा घनाव[illegible]तेन कलु- स्य
षोदकेन प्रतिबिंबप्रकाशाप्यावियते न सूर्यः अत एव मूढो लो-
कः एवंविधमपि तो वर्तमानेन न जानाति अत एवा न वस्तुफलं ल-
भते मद्भक्तस्तु अजमनादिमव्ययमनंतं मां जानाति अतोऽनन्त-
र्यफलं लभत इत्यर्थः तदुक्तं दिव्यालोकास्त्र चित्तं विश्वस्वरूप
आत्मनिकर्णमायावृतत्वं भवेन्मान्तेषु सममसावियते किमहो कि-
वीक्षणं परयतो अतोऽनेन पिधीयते जलमचेव वार्कस्तदुक्तं विथावि-
द्येयावरणाभिधम्मुनि वैरे मोहस्य पार्श्वकृषयामिति अत्र अकृणावी-
याम्भुनिरपि अजस्य नाभावप्येकमर्पितं यस्मिन्विश्वानि भुवना-
स्पु नि त[illegible]ः न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव नीहा-
रेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीनि सायार्थ स्वरूपं भा- कृ
ष्यं अजस्य जननरहितस्य महाभूतात्मकस्य विराजो नाभावप्येकमपि हिर-

।एगर्भाव्यमेकं लिंगदेहमपितं नत्वस्तामिवाप्तिं तं यस्मिन्नाले लिंगदेहे विश्वानि
सर्वाणि भुवनानि भूर्भुवः स्वरादीनि निसृष्टानि मायागुणाइवंति इति
नमितस्ततेरणान्वयः हे नराः त्वं विश्वकर्मणामीश्वरे स्वयं न विद्रावयन वि
जानीथास्तकाः इयमाइमानिजानानन्तरूपाणि रेणुपविष्टान्त्यादित
वात् देवदत्तोहं यज्ञदत्तोहमित्याकारेणावयं न जानीमः इति यदुच्यते
तदसत् न सहं यत् त्यगवानं जीवरूपं विश्वकर्मणः परमेश्वरास्यत
त्वे किंतु युष्माकमहंप्रत्ययगम्यतोप्रत्यक्ष अहंप्रत्ययगम्या इति
त्वं सर्ववेदांतवेद्यमीश्वरतत्त्वं बभूव भवति विद्यते जीवरूपत्वेनापि
कृतोनवेद इति चेत् नीहारेणप्रावृता यूयं नीहारसदृशेनाज्ञानेन
प्रावृताः प्राछन्नाः अतो न जानीथा यथा नीहारो नास्त्येतन्मसत् हरूप
वरकत्वात्काष्ठपाषाणादिवांतरमेदेवोहम् अज्ञानवान्नात् एवम सी
नमपि नास्त्येतन्मसत् ईश्वरतत्त्वावरकत्वात् नापि सत्त्वबोधमात्रवि
वर्त्यत्वात् ईदृशेनाज्ञानेन भवंतः सर्वे जीवाः प्रावृताः न केवलमा
वृतत्वं किंच जल्प्याः देवोहं मनुष्योहमित्याद्यनृतजल्पपराः किं
च असुतृपः केनाप्युपायेनासून् तर्पयंतो उदरंभरा इत्यर्थः न तु प
रमेश्वरं तत्त्वं विचारयंतः किंच न केवलमिहलोकभोगमात्रे त्रि
माः उक्थशासः नानाविधमुग्यज्ञेषु उक्थ स्वर्गादिफलेप्संतः ख
ण्डिवांचरंति ।। हिंदवंसश सर्वांतरात्मानाहिनपारिके त्वर्वाय
तिवेदाहमिति २५ ।।

वनमालीटीका

ननु जन्मकाले योऽमितैश्वर्यं श्रीवैकुंठस्थमेश्वररूपमेवमाविर्भावय
ति संप्रति च श्रीवत्सकौस्तुभाद्यसाधारणलौकिकोपकरणपालि
तिकेतुकमलकौमोदकीचक्रवरधारिचतुर्भुजश्रीमद्देहनेयवाह
नेसर्वमहामहराजेन त्रिविविधदिव्यलीलाविलासे साक्षाद्वैकुंठना
यके लोकानुग्रहाय भुवावतीर्णे विरिंचिप्रपंचसंभवनिरतिशय
सौंदर्यसारसर्वस्वमूर्तौ बाललीलाविमोहितनिखिलान्तरिक्षिणि कि
रणोज्ज्वलदिव्यपीतांबरानिरूपमप्रणामहृंदरे कारदीक्षितमपरिज्ञाता
र्थपरानितपुरंदरे वा गृहविजितपानिकेठे नारदादिभिर्निगम्

गी° टी° सं°

122

पापस्य पर्यन्तं भजनेन त्वयि कथमविवेकिनोपि मनुष्यबुद्धिर्जीवबुद्धिर्वेत्याशंका
ह्य मप्याह नाहमिति नाहं सर्वलोकस्य न प्रकाशः स्वेन रूपेण प्रकटो न
भवामि किंतु केषांचिन्मद्भक्तानामेव कथं सर्वस्य लोकस्य न प्रकटत्वं त
त्राह योगमायासमावृतः योगो मम संकल्पस्तद्वशवर्तिनी माया यो
गमाया तया समावृतः जनो मायया यथार्थतो न जानाति निःसंकल्पा
द्व न विषयान्मायया तान् प्रति मत्स्वरूपं नावृतः सत्यपि देहादौ तानका
रणेन ज्ञानविषयत्वायोगपीड्डनः नच भगवतो व्यामोहकत्वे वैष
म्यापत्तिः तत्कर्मणां प्रवाहानादीनां सर्वस्येवं तत्कर्मापेक्षमत्सं
कल्पाधीनात्वो विपरीतभावना हेतुः मामेव व्यामोहकत्वेन ममवैष
म्याद्यसंभवात् १५ ॥

अथ वैजयंतीटीका

ननु भक्ताभक्तानां सर्वेषामिंद्रियगोचरत्वप्राप्तमपि त्वां नेकस्मादेते
जानंतीत्यपेक्षयामाह नाहमिति योगमायासमावृतः नलचरव
न चरनरस्तादिसमानसंस्थानरूपयोगपाद्भवाच्यः सैव मायाम
हिमत्वजनमोहनात्मिकातया समावृतमावृत्ते स्वरूपगुणादिके त्वनमिवा
यस्य तथा सोहं ममस्वरूपवाच्यः प्रकृष्टोत्रमः स्यामतः सर्वस्य मद्भक्तेत
रस्य सकलस्य जनस्य प्रकाशः प्रकटो न भवामि अत एव च यया माया
य यया मूढो मोहितोऽयं कुलिनिर्दिष्टो लोकः मामयं हाति कोजनो ज
र नत्वांहितमव्ययमपच्युतस्वरूपगुणशक्तिकं सर्वेश्वरं मां नाभिजाना
त्य ति प्राकृतत्ववन्मनुष्यवन्मन्यत इत्यर्थः यद्वाममसंकल्पजनितत्व एव
प्रावर्तित्वायशोदायश्च आविनया वलात्स्वावासिनया विषयाः पिका या
योगमायया समावृतो विस्मृतस्वपरस्वरूपोयं लोकोऽतएव मूढ
स्तथैव योहितो मां नाभिजानाति अत एवाहं सर्वस्य प्रकाशो न भवा
मीत्यर्थः १५

अथ हनुवनीटीका

अहं सर्वस्य लोकस्य न प्रकाशः स्वेन रूपेण प्रकटो न भवामि किंतु के
षांचिन्मद्भक्तानामेव प्रकटो भवामीत्यभिप्रायः कथं सर्वस्य
लोकस्य प्रकटत्वं तत्र हेतुमाह योगमायासमावृतः योगो मम संक म

म

त्यतस्वरूपावर्तिनी मायायोगमायातयावृतमज्ञोजनः मांस्वरूपेणानजा
नातिनित्संकल्पानुविधायिन्या माययासमावृतः सत्यपिज्ञानकार
णेज्ञानविषयत्वायोग्यः कृतः अतोयदुक्तं यंभावमज्ञानंतदस्यवम
मसंकल्पयवकारणमित्युक्तंभवति अतोममाययाछन्नत्वाहृतज्ञा
नः सत्त्वयंचतुर्विधभक्तविलक्षणोलोकः सत्यपिज्ञानकारणेमाम
जमव्ययमनाद्यनंतंपरमेश्वरंनाभिजानाति किंतुविपरीतदृष्ट्यामन
ष्यमेवकिंचिन्मन्यतइत्यर्थः विद्यमानवस्तुस्वरूपमावृणोति अ
विद्यमानंचकिंचिद्रूपंयनीतिलौकिकमायायामपिप्रसिद्धमेतत् २५
अतोमाययाल्पधीनयात्सर्वं [illegible] ॥ ना

सदानंदीटीका

ननुश्रीमन्नमावसरस्हसौंदर्यजलधिस्वरूपंयद्यंस्मरमनिगणे रै
घर्यप्रदे स्वयंप्राज्ञभूतेनिरवधिगुणोस्वयंसहितेकथंतत्रावस्थाभवा
निमित्तहेतुरपिहरौ १ तथाभूताकौस्तुभांक्रोडलांछितेकिरीटपा
भावनमालमालिनि चतुर्भुजेकंबुगदाब्जपाणिभिनित्यदर्पणाल
कृतपाणिपंकजे १ श्रीकांतिभूत्यादिविलाससंयुतेश्रीवत्ससौंदर्य
गुणालयेविभो समस्तदेवासुरसिद्धनायकेवैकुंठनाथेहिविग
णावाहने २ देवेंद्रसंपादितराजराजेश्वराभिषेकादिमहाविभूतौ
समस्तदेवासुरनेतरीशेब्रह्मादिभिर्वंदितपादपीठे ४ अनेकली
लाव्रजविलासशीलेसमस्तलोकांतरसर्वधर्मे समस्तलोकोद्दर
णेमुकुंदेस्वभक्तावतीर्णेभवमञ्जनाभे ५ विचित्रप्रपंचोत्तरधामसेतु
नेमहातिसौंदर्यरसाकरेहरौ उदारलीलाप्रविमोहिताखिलेत्रिप्र
गीतामलकीर्तिधामनि ६ समाश्रिताभूनलदिव्यकांतिमत्पीतां
बरेनूतनमेचकद्युते प्रभौस्वधामादिविहारिणानतेस्वभक्तरक्षार्थमि
हास्थयंतरि ७ स्वरूपमाधुर्यजितप्राकृतास्तनेवामणस्वराजीवजितचं
द्रशोभे स्वराविंदपीतमहात्रयातिनित्यभावसिद्धाखिलदिव्यकर्म
णि ८ पराशरव्यासशुकसनकनारदादिभिर्महद्भिर्मुनिभिःसदास्तुते
त्वयीदृशे स्यात्कथमल्पचेतसामपीडमानत्वबाधिया स्वपदेवाण इ
त्याशंक्यांतरमादिदेवाभिलक्ष्यावाक्यमदाजहार पत्नाहृतस्तेहंभ

वतायथोक्तः सर्वस्यलोकस्यनचाहंगोस्मि १० स्वेनरूपेणासर्वस्यप्रकटोन
भवाम्यहं किंतुकेषांचिदेवंवमद्भक्तानांभवाम्यहं कथंसर्वस्यलोकस्य
नप्रकाशाइत्यतआह योगोमुमैवसंकल्पोमायायातदृशावर्तिनी ११ अभक्ता
यंजनोमांनजानात्यव्ययंमहेश्वरं स्वरूपेणेतिसंकल्पानुसारिण्यैवमा
यया १२ ज्ञानगोचरतायोग्यःस्वस्यविज्ञानकारणे कृतोनःप्राग्भयायोग्या
नंपरंभावमितीहवे १४ गुणानांघटनेयोगःसैवमायातयाप्यहं संकु
न्नोलोकदृष्ट्यावेत्यर्थोभाष्यकृतांमतः १५ अभक्तानांममाज्ञानेसंकल्पा
मेस्तिकारणं यतोमेमायायाछन्नात्तानात्सन्मन्यपराङ्मुखः १६ लोका
यंमामजंनित्यमनंतंपरमेश्वरं नाभिजानातिसर्वज्ञंसत्यविज्ञानकार
णं १७ किंतुमूढजनोयंमांविपरीतदृशान्यथा केचिन्मनुष्यमेवात्र
मन्यतेमाययावृतः १८ विद्यमानंयथावत्तत्स्वरूपंयदनुत्तमम्
अविद्यमानंयत्किंचिन्मायादर्शयतीत्यपि १९ प्रसिद्धमस्तिभोःपा
र्थलोकोयंत्याशयोहरेः २०॥ २५ ॥

नीलकंठटीका

कृतस्तर्हिवयमज्ञानं लोकस्येत्यतआह नाहमिति हेयोगयोगिन्
अर्थाप्राप्यव्रुपन्नयोनोयंयोगयाह्यः अहंतस्यदार्थःसर्वस्ययोगिनस्त्वे
पदार्थमात्रभिन्नस्यनप्रकाशोस्मिनत्वंहेतुः मायासमावृतइति भा
वोत्वयोगोयुक्तिःगुणानांघटनंसैवयोगमायाचित्तसमाधिर्वायोगोभ
गवतस्तत्कृतामायेति भगवत्संकल्पवशावर्तिनीमायेत्यर्थः उत्तरा
र्धःस्पष्टार्थः २५ ॥

इहास्मिन्नेवदेहेकृतैरन्यान्यैर्वैःकर्मभिः आनंदीटीका गोवर्द्धनोद्धरणब्रह्मवंचनशंकरजयादिभिस्तवपारमेश्वर्य

मैत्रप्रसिद्धमेवतत्कथं
नांपरमेश्वरत्वेनतजानं
तीत्याह ॥

योगभूतयज्ञयहंकाराद्यात्मकोयःसंघातः सचासौमायादैवीह्येषागुण
मयीत्यत्रोक्ताममत्रिरोधानकारणंतयासमावृतः आच्छादितोमत्रका
यइ्वस्तुर्योहंपरमेश्वरस्वरूपः सर्वस्यलोकस्यप्रकाशोनास्मियतोयंलो
कःमूढोमाययामोहितः अन्यथाज्ञानविपर्यासकृतः मामजमनव्य
यमीश्वरंनाभिजानातिसविकारंकाचनजीवंजातंमांमन्यते [illegible]
[illegible] २५ ॥

रामकंठीटीका

ननुकस्मात्सर्वेदेवंत्वमर्गमयेवसेक्त्या यादितोलोको मायाव्यायाविद्याशक्त्याच प्रहत्तिनि
हन्नोर्धर्मयोर्निगुह्यमानं संसारापवर्गलक्षणंफलंप्राप्नोतीति संग्रहेण प्रतिपादितमाह

वैश्वरूपेष्वद्वयचिन्मात्रस्वरूपावस्थानाः परिच्छिन्नलक्षणे वैश्वरसमा
धियोगरूपेणाच्छन्नाः तथाविधयोगमहिम्नोत्पादिता या माया मत्स्वरू
पान्यथाप्रतिपत्तिहेतुः शक्तिस्तया समावृतो व्यवहितः सन् अ
हं सर्वस्य मत्प्रकृतिमोहितस्य लोकस्य भावस्य जन्तोर्न प्रकाशः आ
त्मतया न प्रत्यभिज्ञेय इत्यतस्तत्सर्वो मूढो लोकोऽयमजमव्ययं नि
त्यत्वाज्जन्मविनाशरहितं मां नाभिजानाति आत्मत्वेन न प्रत्यव
स्यतीत्यतः २५ ॥ लासिकी [illegible]टीका

तेषांस्वातानेहेतुमाह

अहमीश्वरः सर्वस्य लोकस्य प्रकाशः प्रकटः आत्मतया प्रत्यभिज्ञेयो
न भवामि किं तु मद्भक्तानामेव अतोऽहं योगमायासमावृतः यो
गो वैश्वरूप्येऽपि अद्वयचिन्मात्रस्वरूपावस्थानापरिच्छिन्नलक्षण
ऐश्वरः समाधिः अथवा योगो शक्तिरघटमानघटनापटीयस्त्वं
यामा तदुत्पादितया मत्स्वरूपान्यथाप्रतिपत्तिहेतुर्भेदप्रथारूपया शक्ति
या समावृतो व्यवहितः सन् अत एव मत्स्वरूपज्ञाने मूढोऽयं लोको
ऽजमव्ययं नित्यत्वाज्जन्मविनाशरहितं मां नाभिजानाति आत्मत्वे
न न प्रत्यवमृशति २५ ॥

पंचोलीटीका

किंनिमित्तमित्यत्राह नाहमिति अहं योगमायासमावृतो गुणत्रय
घटनं योगः सा एव माया तया समावृतो युक्तः सर्वस्य लोकस्य प्रका
शो दृश्यो न किं तु कस्यचिद्भक्तस्य एव अत एवायं मूढो लोकः अजम
व्ययं नाभिजानाति २५

रसावीरसमिद्बोधिनी ॥

ननु कुतो न त्वां सर्वेऽपि जानंतीत्याशंक्य स्वाज्ञानादेवेत्याह नाह
मिति अहं सर्वेश्वरः सर्वस्य जगतः प्रकाशः स्वस्वरूपेण प्रत्यक्षो
न भवामि किं तु नः केषांचिद्भक्तानामेव प्रकटो भवामि यतो यो
गमायासमावृतः योगस्तत्कर्तृसंबंधः स एव माया तया समाह

तस्माच्छादितोस्मि मायाव्यपि हि स्वमायया रूपांतरेणाच्छादित
त्वेन न ज्ञानविषयो भवति अतएव अयं बहुविधभक्तविल
क्षणो लोको मोहितांतःकरणत्वेन मामजमव्ययमनुत्पत्ति
विनाशरहितं नाभिजानाति किंतु विपरीतदृष्ट्या मनुष्यमेव
124 कंचिन्मन्यत इति २५॥

मधुभाष्य

नाहमिति योगेन सामर्थ्योपायेन मायया च मयैव मूढो ना
भिजानाति तथाह पाद्मे आत्मनः आकृतिं चैव लोकवित्तस्य
बंधनं स्वसामर्थ्येन देव्याचक्रकृते समहेश्वर इति न च मां मा
याव भातीत्याह २५॥

भाषाअनुवाद

मूढलोगोंके अज्ञानमे कारण कहतेहै कि उन लोगोंके समाने
हम प्रगट नही होते परंतु अपने भक्तो के सामने प्रगटहोते है
क्यों कि मूढ लोग मेरी योगमाया से आवृत है तो फेरि कहो
कैसे अव्यय स्वरूप हमको जानि सके २५ ॥

दोहा

नाहि विकाशों सभहि को योगमाया हत होय जाने मूढ न मो
हि जन अज अव्यय मोहि सोय २५ ॥

125

वेदाहं समतीतानि वर्तमानानि चार्जुन भविष्याणि च
भूतानि मां तु वेद न कश्चन २६ ॥

शांकरभाष्यं

यया योगमायया समावृतं मां लोको नाभिजानाति नासौ योगमा-
या मदीया सती मम ईश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति यथान्य-
स्यापि मायाविनो मायाज्ञानं तद्वत् यत एवमतः वेदाहमिति अ-
हं तु वेद जाने समतीतानि समतिक्रान्तानि भूतानि तथा वर्तमाना-
नि चार्जुन भविष्याणि च भूतानि वेदाहं मां तु वेद न कश्चन मद्भ-
क्तं मच्छरणमेकं मुक्त्वा मत्तत्त्ववेदनाभावादेव न मां भजते २६ ॥

आनन्दगिरिकृतटीका

मायया भगवानावृतश्चेत्तस्यापि लोकस्येव ज्ञानप्रतिबंधः स्यादि-
त्याशंक्याह यथेति न हीयं माया मायाविनो विज्ञानं प्रतिबध्ना-
ति मायात्वात् लौकिकमायावत् अथवा नेश्वरो मायाप्रतिबद्धज्ञा-
नो मायावित्वात् लौकिकमायाविवदित्यर्थः भगवतो मायाप्रति-
बद्धज्ञानत्वाभावेन सर्वज्ञत्वमप्रतिबद्धं सिद्धमित्याह यत इति लो-
कस्य मायाप्रतिबद्धविज्ञानत्वादेव भगवदनभिज्ञत्वमित्या-
ह मां त्विति कालत्रयपरिच्छिन्नवस्तुपरिज्ञाने प्रतिबं-
धो नेश्वरस्यास्तीति द्योतनार्थस्तुशब्दः मां त्विति लोकस्य भगवत्त-
त्त्वज्ञाने प्रतिबंधं द्योतयति नहि त्वद्भक्ता अपि फलेत्याशंक्याह मद्भ-
क्तमिति नहि सर्वोऽपि त्वद्भक्तिद्वारा त्वां ज्ञास्यतीत्याह मत्तत्त्वेति
विवेकवतो मद्भजनं न त्वविवेकशून्यस्य सर्वस्यापीत्यर्थः २६ ॥

+सर्वोत्तमं मम स्वरूपं न जानन्तीत्युक्तं तत्र देवस्य सर्वज्ञत्वमना-
वृतज्ञानशक्तित्वेन दर्शयन्नन्येषामज्ञा-

स्वामिकृतटीका

नमाह॥+ वेदाहमिति समतीतानि विनष्टानि वर्तमानानि च भावीनि च त्रि-
कालवर्तीनि च भूतानि स्थावरजंगमानि सर्वाण्यहं वेद जानामि मा-
याश्रयत्वान्मम तस्याः स्वाश्रयव्यामोहकत्वाभावात् मां तु न कोऽपि
वेत्ति मन्मायामोहितत्वात् प्रसिद्धं हि लोके मायायाः स्वाश्रयाधीनत्व

126

मन्मोहकत्वं च [illegible]
[illegible] २६ ॥

पिशाचभाष्यं

वेदजानामिअहंसमतीतानिअतिक्रान्तानि वर्तमानानिचार्जुन भवि
ष्याणिभावीनिचभूतानि[illegible]मांतुवेदविजानातिनकश्चनकोपी
ति २६ ॥

रामानुजभाष्यं

अतीतानिवर्तमानानिअनागतानिचसर्वाणिभूतान्यहंवेदजाना
मि मांतुवेदनकश्चन मायानुसंधीयमानेषुकालत्रयवर्तिषुभूमामे
वंविधंवासुदेवंसर्वंसमाश्रयणायावतीर्णंविदित्वामामेवसमाश्रय
त्य॰ न्नकश्चिदुपलभ्यतइत्यर्थः अतोज्ञानीदुर्लभएव २६ ॥

अभिनवशंकरकृतटीका स्पष्टार्थम्

[illegible] नतुचकर्माण्येवक्रियमाणानिप्रलय
कालेमोहंविदधाति अन्यथाकिमितिमाहप्रलय [illegible]
णाकायामापद्यते २६ ॥

परमार्थप्रपाटीका

तदेवंस्वस्यसर्वज्ञत्वमन्यत्राहत्वशक्तित्वंदर्शयति ॥
वेदाहमिति॥समतीतान्यतिक्रान्तानिवर्तमानानियथाभविष्याणिएवंत्रिकाल
वर्तीनिभूतानिस्थावरजंगमात्मकानिसर्वाण्यहंवेदजानामिमाया
श्रयत्वान्ममतस्याश्चाश्रयव्यामोहकत्वाभावात्मांचकोपिनवेत्ति
मन्मायामोहितत्वात्मायायाःस्वाश्रयाधीनत्वमन्यमोहकत्वंप्रसिद्ध
मेव २६ ॥

वनमालीटीका

मायायामदधीनत्वेनाहं नित्याप्रतिबद्धज्ञानइत्याह वेदेति अहं
कालत्रयाप्रतिबद्धसर्वविषयकज्ञानोमया यासर्वलोकामोहयन्न
पिसमतीतानिचिरविनष्टानिवर्तमानानिभविष्याणिचैवंकाल
त्रयवर्तीनिभूतानिस्थावरजंगमानिसर्वाणिवेदजानाम्यतोहंसर्व
ज्ञःपरमेश्वरोमांसर्वदर्शिनंमायास्वामिनंमायाविनमिवतन्माया
मोहितःकश्चनकोपिमदनन्यभजनेमज्ज्ञानंविनानवेद मन्मा

यामोहितत्वात् अतो मद्भक्तज्ञानाभावादेव जीवा मां न भजंत इति
भावः २६ ॥

ब्रह्मवैजयंतीटीका

ननु यदि त्वमपि योगमायावृतोसि नहि यथा मायावृतो जीवो ज्ञानी स्या-
त्तथा किं त्वमपि भवसीत्यत आह वेदाहमिति हेऽर्जुन समतीतानि भू-
तकालवर्तीनि च पुनः वर्त्तमानानि वर्त्तमानकालवर्तीनि च पुनर्भ-
विष्याणि अनागतकालवर्तीनि निखिलानि भूतानि चेतनरूपाण्य-
चेतनरूपाणि च सर्वज्ञो मायापतिः स्वतंत्रोऽहं वेद जानामि कश्चन को-
पि पुरुषः सर्वकारणं सर्वोत्तमं सर्वज्ञं सर्वनियंतारं सर्वेषां शरण्यं के-
शवं माधवमतिकैरवैंद्यपादारविंदं जगज्जन्मरणाय भूभारावतारणा-
य च वसुदेवगृहेऽवतीर्णं सर्वसमाश्रयणार्थं धृतानिकमनीयवि- व॰
ग्रहमेवंभूतं सर्वेश्वरं मां न वेद न जानाति तत्र हेतुः नयः कश्चिदित्थं-
भूतस्वरूपं मां वेद स तु कोटिषु यातिदुर्लभोऽस्तीति सूचितम् २६

अतो मायया स्वाधीनया सर्वव्यामोह[illegible]कत्वात् सर्वस्य चाप्रतिबद्धज्ञानात् ॥

मधुसूदनीटीका

अहमप्रतिबद्धसर्वज्ञानः मायया सर्वाल्लोकान्मोहयन्नपि सम-
तीतानि चिरविनष्टानि वर्त्तमानानि च भविष्याणि चैवं कालत्रयव-
र्तीनि भूतानि स्थावरजंगमानि सर्वाणि वेद जानामि हेऽर्जुन अ-
तोहं सर्वज्ञः परमेश्वर इत्यत्र नास्ति संशय इत्यर्थः मां तु तत्र ह्याज्ञा-
त न प्रतिबंधज्ञानतार्थः मां सर्वदर्शिनमपि मायाविनमिव तन्मा-
या मोहितः कश्चन कोपि मदनुग्रहभाजनं मद्भक्तं विना न वेद म-
न्मायामोहितत्वात् अतो मत्तत्त्ववेदनाभावादेव प्रायेण प्राणिनो द
न मां भजंत इत्यभिप्रायः २६ [illegible] ज्ञानप्रति-
बंधे हेतुम्भवादिरहेंद्रियसंयोगाभिमानानि [illegible] वेदाभिमानि-
वेदां हि वेत्तत्त्वमाह ॥

सदानंदीटीका

मम स्वाधीनया परया मायया मोहितो जनः नाभिजानाति मामी-
शं सगुणं निर्गुणं तथा १ ममैश्वर्यस्य विज्ञाने प्रतिबंधोऽस्ति नैव सा
मदाय ज्ञानमाहात्म्यात्सर्वं पश्याम्यपापविन् १ मायाविनो यथान्य

गी॰ टी॰ स॰

स्यमायानप्रतिबंधिका तथामेहोपितमायाममायत्नास्तिसर्वज्ञः इ
त्याहभगवान्स्वीयभक्तानांबोधहेतवे अहंसर्वेश्वरोलोकान्मायया
मोहयन्नपि ४ अतिक्रांतानिभूतानिवर्तमानानितत्वतः भविष्या
णिचजानामिकालत्रयगतान्यपि ५ अतः परमसर्वज्ञोमायावी
परमेश्वरः अहमस्यत्रसंदेहोनकार्योभवतार्जुन ६ मदनुग्रहपा
त्रंवैमद्भक्तंसद्गुरुंविना कोपिवेदनमांलोकोमन्मायामोहितस्ततः
मतत्ववेदनाभावान्नभजंतेमांनमूढधीः येजनाःभुंजानिसकलेह
दिवाविवर्तीयवीविनैवविधिरुदनंतहिकोपि येनाततंनिखिल
तिर्य मेवनमंयस्मैदेवायतोजगादिदंनमनंभजेनहं ९ २६ ॥ ८

127

नीलकंठीटीका

ननुत्वदभिन्नंलोकंत्वन्मायामोहयतिचेत्त्वांकुतोनमोहयतीत्यत
आह वेदाहमिति सत्यपिलोकस्यममचाभेदेऔपाधिकभे
दस्यसत्वात् उपाधिधर्माभिमानित्वाल्लोकोमूढः तदभावाच्चाहं
सर्वज्ञइतिविशेषः अन्यदर्थःस्पष्टः २६ ॥

आनंदीटीका

स्वस्येश्वरात्मतांदर्शयति ॥ २६ ॥

स्पष्टम् २६ ॥

रामकंठीटीका

शरीराणांहिनित्यप्रकृतिपरिणामपर्यवसितात्मेहंप्रत्ययत्वात्सर्वतो
वच्छेदवंतोवेदपरिणामापन्नान्यतएवातीतवर्तमानभविष्यत्स्वदविशे
षाणिभूतानिशरीरिणोहंपरमार्थवेदकत्वभावएकएववेदजाना
मिमांपुनर्नित्यत्वात्कालकलाघवच्छेदविरहितमहिमानंनकश्चिच्छ
रीरीवेदजानाति इत्यनेनातःनत्यसाधारणवेदकैकस्वभावत्वंपरस्य
कारणस्य तत्कार्यस्यचजगतस्तद्व्यतिरिक्तस्वरूपस्यवेद्यत्वमेवप्रति
पादितं ~~[illegible]~~ २६ ॥
२६

लासिकी दत्तगतीटीका

ननुनवापियोगमायासमावृतत्वेज्ञानपाकथावरणमशक्तिःस्यात्ते

त्याह ॥ अहमीश्वरस्त्रिकालवर्तीनि सर्वाणि भूतानि स्थावरजंग
मात्मकानि जानामि अतो न मम ज्ञानशक्तेरावृतत्वं मायाश्रयत्वा
न्मम तस्याः स्वाश्रयव्यामोहकत्वाभावात् तदुक्तं आश्रयत्ववि
षयत्वभागिनी निर्विभागचितिरेव केवला पूर्वसिद्धतमसो हि
पश्चिमो नाश्रयो भवति नापि गोचर इति तुः पक्षान्तरे कश्चनको
पि मदनुग्रहभाजनं मद्भक्तं विना मामीश्वरं न वेद न जानाति म
न्मायामोहितत्वात् प्रसिद्धं हि लोके मायायाः स्वाश्रयाधीनत्व
मन्यव्यामोहकत्वं च २६ ॥

पैशोलीटीका

मदीया माया मदीयं ज्ञानं न प्रतिबध्नाति अन्ये मायाविन इवेत्या
ह वेदाहमिति हे अर्जुन अहं भूतानि समतीतानि समतिक्रान्ता
नि तथा वर्तमानानि भविष्याणि च वेद जानामि तु पुनः मद्भक्तं वि
ना कश्चित् मां न वेद २६

रत्नावीरसमिद्धोधिनी ॥

अथ स्वात्मनः पारमेश्वर्यं त्रैकालिकज्ञानवत्त्वेनान्येषामात्मवि
षयकज्ञानप्रतियोगिकाभावाश्रयत्वेन च दर्शयति वेदाहमि
ति हे अर्जुन अहं स्वमायया सर्वलोकमोहयितापि समतीता
नि विश्वविनष्टानि वर्तमानानि भविष्यन्ति चेत्येवं कालत्रयवर्ती
नि भूतानि स्थावरजंगमानि सर्वाणि वेद जानामि ततश्चाहं स
र्वज्ञः सर्वेश्वरश्चास्मीति निःसंपाद्य मां तु सर्वज्ञमपि कश्चिदपि
न वेद न जानाति यन्मायामोहितत्वात् मद्भक्तं विनेति शेषः
अयं भावः मत्स्वरूपानभिज्ञानेनैव न मां भजन्तीति २६ ॥

मेधुभाष्य

वेदेति न कश्चनापि समर्थोऽपि स्वसामर्थ्यात् इंहमोहेन सर्वदुः
खादिविषयमोहेन इच्छाद्वेषयोः प्रवृद्धयोर्नेति किं विज्ञातं पामं

128

कारणांतरमेतत् सर्गेसर्गकाले प्रारभ्यैव प्राणीवेद्विसतीच्छा
दयः सर्वविज्ञानमात्रं विपरीतास्त्वके विसंतीत्याह २८॥

भाषाअनुवाद

मेरी सर्वोत्तम स्वरूपको अज्ञानी लोग नहीं जानतेंहैं यह जो पूर्व मेंकहा सोई स्वस्वरूपकी उत्तमता औ अनावृततत्त्वज्ञान रूपसे दे खावने ज्ये औरों की अज्ञानता कहतेहैं कि जिस हेतु हे अर्जुन हम मायाके आश्रय है इससे भूतकाल वर्तमान काल औ भविष्यतकाल इन तीनो काल के वर्ती चरा चर सब को हम जानतेहै क्यों कि माया अपने आश्रय को मोह नहीं कर सकती है परंतु मेरी मायासे मोहित कोई भी हमें नहीं जा नि सकै है माया अपने आश्रय के अधीन तथा औरोंको मो हती है यह प्रसिद्ध है २६ ॥

दोहा

जानों भूत भविष्यकों वर्तमानहों सोय सभीभूतको अर्जुन मो
कहुं जानत कोय २६ ॥

129

इच्छाद्वेषसमुत्थेनद्वंद्वमोहेनभारत सर्वभूतानिसंमो
हंसर्गेयान्तिपरंतप २७ ॥

शांकरभाष्यं

केनपुनस्त्वेवंतनप्रतिबंधेन प्रतिबद्धानि संतिजायमानानि सर्वभूतानित्वांनविंदंति इत्यपेक्षायामिदमाह इच्छेति इच्छाद्वेषसमुत्थेन इच्छाचद्वेषश्च इच्छाद्वेषौताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थस्तेन इच्छाद्वेषसमुत्थेन केनेति विशेषापेक्षायामिदमाह द्वंद्वमोहेनेति द्वंद्वनिमित्तोमोहोद्वंद्वमोहस्तावेव इच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वंद्वशब्देनाभिधीयेते तत्रयदा इच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्यालब्धात्मकौ भवतस्तदातौ सर्वभूतानांप्रज्ञायाः स्ववशापादनद्वारेण परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबंधकारणं मोहं जनयतः नहीच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषयज्ञानमुत्पद्यते बहिरपि किमुवक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबंधेज्ञानंनोत्पद्यत इत्यतस्तेनेच्छाद्वेषसमुत्थेनद्वंद्वमोहेनभारत भरतान्वय सर्वभूतानिसंमोहितानि संतिसंमोहं संमूढतां सर्गेजन्मनि उत्पत्तिकाल इत्येतत् यांतिगच्छंति हेपरंतप मोहवशान्येवसर्वभूतानिजायमानानिजायंतइत्यभिप्रायः २७ ॥

आनन्दगिरिकृतटीका

भगवत्तत्त्वविज्ञानप्रतिबन्धकं मूलाज्ञानातिरिक्तं प्रश्नद्वारेणोदाहरति केनेत्यादिना पुनःशब्दात् प्रतिबंधकांतरविवक्षा गम्यते प्रश्नपूर्वकमवांतरप्रतिबंधकमिदमाहेत्यनेन विशेषमाकांक्षापूर्वकं निरूपयति केनेति विशेषापेक्षायामिति द्वंद्वशब्देन गृहीतयोरपि इच्छाद्वेषयोर्ग्रहणं द्वंद्वशब्दार्थोपलक्षणार्थमित्यभिप्रेत्याह तावेवेति तयोरपर्यायमेकत्रानुपपत्तिं गृहीत्वा विशिनष्टि यथाकालमिति न च तयोरनधिकरणं किंचिदपि भूतं संसारमण्डले संभवतीत्याह सर्वभूतैरिति तथापि कथं तयोर्मोहहेतुत्वमित्याशंक्या

गी॰
टी॰
स॰

13°

ह. नचेति तयोराश्रयः समष्ट्यर्थः उक्तमेवार्थं कैमुतिकन्यायेन प्रपंच
यति नहीति एतेन भागानन्तवादस्पृष्टं कमनन्तरभागेन कलितमाह यत
इति मत्प्रणामन्यहङ्कारादिप्रतिबन्धप्रभावतो ज्ञानेन्द्रियेन संभवोऽ
नःप्राह्यार्थः ज्ञानप्रयुक्तमूहिम्ना स्वरूपणाज्ञायाचयुक्तस्यैव यथाज्ञप्र
तिबन्धप्रतिविधानसामर्थ्यमिति योजनार्थं भारतपरंतपेति संबोधन
द्वय तत्त्वज्ञानप्रतिबन्धप्रकृतमवोनरकारणमुपसंहरति मोहेति
२७ ॥

स्वामिकृतटीका

तदेवं मायाविषयत्वाज्जीवानां परमेश्वरज्ञानमुक्तं तस्य चाज्ञानस्य दृढत्वे कारणमा
ह॥ इच्छेति सर्गः सर्गे स्थूलदेहोत्पत्तौ सत्यां तदनुकूले इच्छा तत्प्रति
कूले च द्वेषः ताभ्यां समुत्थः समुद्भूतो यः शीतोष्णसुखदुःखादिद्वन्द्वनि
मित्तो मोहो विवेकभ्रंशः तेन सर्वभूतानि संमोहं अहमेव सुखी दुःखी यान्ति
चेति गाढतरमभिनिवेशं प्राप्नुवन्ति अतस्तानि मत्ज्ञानाभावात्
मां न भजन्तीति भावः [illegible] २७

पैशाचभाष्यं

इच्छाद्वेषसमुत्थेन प्रकाशितेन द्वन्द्वमोहेन सुखं मे स्याद्दुःखं मे माभू
दित्येवमर्थरूपेण द्वन्द्वमोहेन सर्वाणि भूतानि संमोहं भ्रमं सर्गे सृष्टौ यान्ति
परंतप २७ ॥

रामानुजभाष्यं

तथाहीच्छेति इच्छाद्वेषाभ्यां समुत्थेन शीतोष्णादिद्वन्द्वाख्येन मोहेन सर्वभूता
नि सर्गे जन्मकाल एव संमोहं यान्ति एतदुक्तं भवति गुणमयेषु सुखदुःखे
ष्वादिषु द्वन्द्वेषु पूर्वपूर्वजन्मनि यद्विषयाविच्छाद्वेषौ रागद्वेषाववभ्यस्तौ तद्
वासनया पुनरपि जन्मकाल एव तदेव द्वन्द्वाख्यमिच्छाद्वेषयुक्तत्वेन संप्र २८
प्तेन भूतानां संमोहो भवति तेन मोहेन सर्वभूतानि संमोहं यान्ति तद्विष
येच्छाद्वेषस्वभावानि भवन्ति न मत्संश्लेषवियोगसुखदुःखस्वभावानि ज्ञा
नी तु मत्संश्लेषवियोगैकसुखदुःखस्वभावः न तत्स्वभावं किमपि भूतं
जायत इति २७ ॥

श्रीअभिनवगुप्तकृतटीका

२७ नन्वेवं कर्मा
ण्येव क्रियमाणानि प्रलयकाले मोहं विदधति अन्यथा
किमिति महाप्रलय उपजायते इत्याशंकायामारभते इच्छाद्वेषेत्याद्यध्यायान्तेन २७

परमार्थप्रपाटीका

तदेवं जीवानां मायामोहितत्वेन परमेश्वरज्ञानमयुक्तं तत्रैव ज्ञानस्य हेतु
त्वेकारणमाह इच्छाद्वेषेति समुत्थत इति समुत्थः तस्मिन् सर्गे स्थूलदेहोत्प
त्तौ सत्यां तदनुकूले इच्छा प्रतिकूले द्वेषस्ताभ्यां समुत्पन्नो यः शीतोष्ण
सुखदुःखादिद्वंद्वनिमित्तो मोहो विवेकभ्रंशः तेन सर्वभूतानि संमोहं
अहमेव सुखी चेति गाढतमाभिनिवेशं प्राप्नुवंति अतस्तानि मज्ज्ञाना
भावान्मां न भजंत इति भावः २७ ॥

वनमालीटीका

योगमायां भगवत्तत्त्वज्ञानप्रतिबंधे हेतुं मत्वा देहेंद्रियसंघाताभिमाना
तिशयपूर्वकभोगाभिनिवेशं हेत्वंतरमाह इच्छेति इच्छाद्वेषाभ्या
प्रतिकूल मनुकूलविषयाभ्यां समुत्थेन शीतोष्णसुखदुःखादिद्वंद्वनिमित्तेन
मोहेनाहं सुखी अहं दुःखीत्यादिविपर्ययेण सर्वाण्यपि भूतानि संमो
हं अविवेकायोग्यत्वं सर्गे देहस्योत्पत्तौ सत्यां यांति न हीच्छाद्वेष
रहितं किंचिदस्ति न च ताभ्यामाविष्टस्य बहिर्विषयमपि ज्ञानं यथार्थं
संभवति किं पुनः परमार्थविषयकं अतो रागद्वेषव्याकुलचित्तत्वा
त् सर्वाण्यपि भूतानि मां सर्वेश्वरं सदनंतगुणालयं वासुदेवं न जा
नंति न भजंते चेत्यर्थः २७ ॥

अथमैवैजयंतीटीका

ननुरपि ज्ञानिनां मोहं दर्शयंस्तस्य ज्ञानिनोऽतिदुर्लभतां प्रतिपाद-
यति इच्छाद्वेषसमुत्थेनेति हे भारत वंशज हे परंतप शत्रुतापने
ति संबोधनाभ्यां न वोत्तमकुलजन्मत्वाच्छत्रुतापनस्वभावाच्चे
च्छाद्वेषात्मकशत्रुविजये त्वयोपि मयाऽसौ नस्यादिति सूचितम् इच्छा
द्वेषसमुत्थेन इच्छाऽनुकूले विषये रागपूर्वकं तत्प्राप्तिकामरूपा
द्वेषः प्रतिकूले विषये अप्रीतिपूर्वकं तन्निवृत्तिविचारस्ताभ्यां स
मुत्तिष्ठतीति इच्छाद्वेषसमुत्थस्तेन द्वंद्वमोहेन शीतोष्णसुखदुःखाव
दुःखाभिधानेन द्वंद्वेन निमित्तभूतेनोत्थितो यो मोहो वैचित्यरूप
स्तेन सर्गे स्वोत्पत्तिसमये एव सर्वाणि ब्रह्मादिपिपीलिकांतानि
आत्मादीनि देवतांतरोपासकानि तत्तमंत्रभक्तियुक्तानि भूतानि च
तत्तद्रूपाणि संमोहं पुत्रकलत्रवित्तादिनेशसतिग्रहमेवानिमंद

गी॰ भागीतिरतिशयदुःखिमतोन्ये सर्वे जनाः दुःखिनः सुखं पुत्रादिप्राप्तौ च मत्वा
टी॰ ग्रहमेवमहज्ञाण्यवानतिशयसुखी मत्तोन्यः कोपि नास्तीत्येवं प्रकारेण
स॰ निरतिशयदुःखनराभिनिवेशं यांति प्राप्नुवंति यथैवेन्या कृतविषय
स्त्रीपुत्रादीनां संयोगे सुखं वियोगे च दुःखं प्राप्नुवंति मत्संयोगे वियो
गे च न तथा ज्ञानी यस्मात् अतो मम हि योगे त्वां अपि प्राणधारणं न
131 करोत्यतोः निरत्न लभो ज्ञानीति भावः २७ ॥

योगमायां भगवत्तत्त्वविज्ञानप्रति **मधुसूदनीटीका** बंधहेतुभूतकाद्देहेंद्रियसंघा
ताभिमानातिशयपूर्वकं भोगाभिनिवेशहे तुतरमाह ॥

इच्छाद्वेषाभ्यामनुकूलप्रतिकूलविषयाभ्यां समुत्थितेन प्रतीतेन सु
खदुःखादिद्वंद्वनिमित्तेन मोहेन अहं सुखी दुःखीत्यादिविप
र्ययेन सर्वाण्यपि भूतानि संमोहं विवेकायोग्यत्वं सर्गे स्थूलदेहोत्प
त्तौ सत्यां यांति हे भारत हे परंतपेति संबोधनद्वयस्य कुलमहिम्ना
स्वरूपप्रज्ञया च त्वां द्वंद्वमोहाख्यः शत्रुर्नाभिभवितुमलमिति भावः
नहीच्छाद्वेषरहितं किंचिदपि भूतमस्ति न च ताभ्यामाविष्टस्य बहिर्वि
॰ते षयमपि ज्ञानं भवति किं पुनरात्मविषयं अतो रागद्वेषव्याकुलांतः
करणत्वात् सर्वाण्यपि भूतानि मां परमेश्वरमात्मभूतं न जानंति
अतो न भजंति भजनीयमपि २७ यदि सर्वभूतानि संमोहं यांति
कथं तर्हि [illegible] भजंते [illegible] येन ते
[illegible] क्षीणपापत्वादित्याह ॥

सदानंदीटीका

मतत्त्ववेदनाभावान्मां भजंते न ये जनाः रागद्वेषग्रहग्रस्ता भ्रमं
त्येते उ संसृतौ १ भोगाद्यभिनिवेशेन सदेत्याह जगत्पतिः इच्छा
द्वेषसमुद्भूतसुखादिद्वंद्वहेतुना १ मोहेनाहं सुखी दुःखीत्या
दिभ्रांतिमयेन च समस्तान्यपि भूतानि विवेकायोग्यतां परं स्थू
लदेहोद्भवे यांति हे भारत परंतप त्वत्तु वंशमहिम्नैव द्वंद्वमोहा
रिघातकः ४ सुखदुःखादिसंप्राप्त्या रागद्वेषोद्भवो यदा तदा मो
हं प्रयांत्येव सर्वभूतानि सर्वशः ५ नहीच्छाद्वेषदोषेण विवशी
कृतचेतसां बहिर्गोचरमप्यस्ति सम्यग्ज्ञानं प्रमापहं ६ किं च वा

गु

यंनदानाभ्यांसमाविष्टधियांत्वरणां प्रतिगात्मनिनज्ञानंसम्भवत्यपतनइत्य
पि २७ ॥

नीलकंठीटीका

केनपुनर्निमित्तेनातीतानागतानिभूतानिनजानंतीत्याशंक्याह इच्छेति
इच्छारागः द्वेषोनाभ्यांसमुत्थितोद्वंद्वमोहः शोभनाशोभनसत्यासत्य
नित्यानित्यात्मनात्मसुविपर्ययः अशोभने शोभनबुद्धिः शोभनेवाअ
शोभनबुद्धिरित्येवंरूपस्तेन हेभारतभारतान्वयसर्वभूतानिसर्गेस्र
ष्टिविषयेमोहंअविवेकंयांतिहेपरंतप अयंभावः योहिस्रष्टेस्तस्य
स्वरूपंचतत्त्वतोजानातिसब्रह्मवित्सर्वज्ञत्वादतीतादीन्जाना
ति स्रष्टेश्चसर्वेषांमोहोस्ति अशोभनेस्त्र्यादौशोभनाध्यासात् अ
सत्येप्रपंचेसत्यत्वाध्यासात् सत्येचात्मनोऽसंगत्वेऽसत्यत्वाध्यासात्
अनित्येस्वर्गादौनित्यत्वाध्यासात् अनात्मनिदेहादावात्माध्यासात्
अनोविपर्ययेणास्तृष्टिज्ञानंप्रतिबद्धंनेनचसर्वज्ञत्वंनजायतेऽस्मदादी
नामिति २७ ॥

आनंदीटीका

कथंनवेदेत्याह रागद्वेषोद्भवेनद्वंद्वमोहेनइदमनुकूलंमयाग्राह्यमि
दंप्रतिकूलंमयात्याज्यमितिद्वंद्वोद्भवेनमोहेनाहंकारेणेवतमसास
र्वाणिभूतानिप्राणिनः अस्मिन्सर्गेसंसारेमोहंयांतिआसर्गप्राप्ता
मोनाभिजानंतीत्यर्थः २७ ॥

रामकंठीटीका

कस्मात्त्वांनवेदकश्चिदित्यत्राह ॥
यतएतानिसर्वभूतानिमन्मायागुणादन्योन्यभिन्नान्यनित्यशरीरात्म
कत्वाज्जन्मविनाशाभ्यांत्रिसर्गेस्त्रष्टौसत्यांतंमोहंपरमार्थिकस्वरूपा
विमर्शरूपमज्ञानंयांतिकेनहेतुनाद्वंद्वमोहेन द्वंद्वानिस्वावयवैःस्वा
त्मकानिसयएवमोहस्तत्त्वाप्रतिपत्तिस्तेनकीदृशेनेच्छाद्वेषसमुत्थेन
रागद्वेषप्रभवेन इदमत्रतात्पर्यं मन्मायोद्भाविनगुणमयप्रकृति
रूपसर्गसंमोहिताःसर्वप्राणिनः परस्परभिन्नाःनित्यगुणपरिणा
मात्मकमेवजगदिदंमन्यमानाःक्वचिदन्यतः किंचिदिष्टंतःसंसा
रचक्रपरिवर्तनेनमननभवंत्यतोयथोक्तस्वरूपंमांनित्यनिर्विकारैक

चित्स्वभावंपरमात्मानंनभजंते केचनत्वांभजंतेइत्यत आह २६ ॥

लाक्षिकी ~~[illegible]~~टीका

ननुत्वांकश्चिदपिकिमितिनवेदेत्यत आह ॥ सर्वभूतानितावत्स्वरूपापरिज्ञानात्मोहात्मकान्येवान्यथाभूतत्वापायात् तानिसर्गेस्थूलदेहोत्पत्तौसंमोहंसम्यग्गाढतमंअविवेकंप्रयांति केनकृतंस्थूलदेहानुकूलेइच्छातत्प्रतिकूलेचद्वेषस्ताभ्यांसमुत्थेनोद्भूतेनद्वंद्वमोहेनसुखदुःखादीनांमोहेनाहंसुखीअहंदुःखीत्यादिनास्वात्मन्याध्यारोपाध्यासेन अतोमांभजनीयमपिनभजंते २७ ॥

पंचोलीटीका

कानिघ्रनमत्तत्त्ववेदनप्रतिबंधेनप्रतिवभातिसंतिज्ञायमानानि सर्वभूतानिमांनविंदंतीत्यपेक्षायामाह इच्छाद्वेषेति हेभारतहेपरंतपसर्गेउत्पत्तिकालेसर्वभूतानिइच्छाद्वेषसमुत्थेनद्वंद्वमोहेनइष्टवस्तुनिअभिलाषइच्छाअनिष्टवस्तुनिविरागःद्वेषस्ताभ्यांइच्छाद्वेषोद्भवशब्दवाच्यौतज्जनितेनमोहेनात्मज्ञानप्रतिबंधकेनाविवेकेनसंमोहंयांतिप्राप्नुवंतितेनमांनजानंति २७

रत्नवीरसमिद्धायिनी ॥

इच्छाद्वेषेति अयंभावः सृजादीनदंतव्यइत्येवंरूपोरागइच्छाप्रवृत्तिनिरोधकः पुत्रमित्रादिविषयकस्नेहरूपरागेवइच्छाद्वेषश्चसर्वेषांबंधादीनांविच्छेदकोयंदुष्टमार्गः कथंद्वितःस्यादितिक्रोधः ताभ्यांसमुत्थेनोत्पन्नेनद्वंद्वमोहेनद्वंद्वंकलहयुग्मयोरितिनामानुशासनाद्वंद्वंद्वंद्वं तयोर्मोहस्तेन हेअर्जुनसर्वभूतानिसर्वेप्राणिनःसर्गेयुद्धारंभेसंमोहमितिकर्तव्यताविषयेदोलायमानचित्तत्वंयांतिप्राप्नुवंति अतोनमांभजंतीति तेषांयुद्धाचरणरूपधर्मज्ञानेनभयलोकभ्रंशःप्राप्तइतिभावः २७ ॥

ਸਪੂਰਣ

੨੭॥

133

भाषाअनुवाद

माया से मोहित जीवों को परमेश्वर विषयक ज्ञान का अभाव जो कहा सोई अज्ञान की दृढता में कारण कहते है कि हे भारत सृष्टि कहे स्थूल देह धारण होने से जो देह के अनु कूल विषय मे इच्छा और इस देह के प्रति कूल मेंजो द्वेष और उन दोनो इच्छा औ द्वेष से उत्पन्न जो सुख दुख आदि तिस से भया जो विवेक का नाश इस से प्राणी मोह को प्राप्त है अर्थात् हम सुखी हमदुखी ऐसो निश्चय रखतेहै इसी से ये अज्ञानी हम को नही भजते है २७ ॥

दोहा

इच्छाद्वेष उत्पन्नसें द्वंद्व मोहसें हे पार्थ जीवसभीनर मोहतें जा
हिं सृष्टियाथार्थ २७॥

134

येषामन्तगतं पापं जनानां पुण्यकर्मणां तेद्वंद्वमोह
निर्मुक्ता भजन्ते मां दृढव्रताः २८ ॥

शंकरभाष्य

यत एवमनेन द्वंद्वमोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमो
हितानि ममात्मभूतं न जानंति अत एवात्मभावेन मां न भजंते
के पुनरनेन द्वंद्वमोहेन निर्मुक्ताः सन्तः त्वां विदित्वा यथाशास्त्र
मात्मभावेन भजंत इत्यपेक्षितमर्थं दर्शयितुमुच्यते येषामिति
येषां तु पुनरन्तगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां
पुण्यं कर्म येषां सत्वशुद्धिकारणं विद्यते ते पुण्यकर्माणः तेद्वंद्व ते येषां पुण्यकर्मणां
यथोक्तेन द्वंद्वमोहेन निर्मुक्ताः मोहनिर्मुक्ता भजंते मां परमात्मानं दृढव्रता एवमेव परमार्थतत्वं
नान्यथेत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञाना दृढव्रता उच्यंते
२८ ॥

आनन्दगिरिकृतटीका

जायमानभूतानां मोहपरवशत्वे फलितमाह यत इति भगवत्तत्ववे
दनाभावे तन्निष्ठत्ववैधर्यं फलतीत्याह अत एवेति यदि सर्वाणि
भूतानि जन्म प्रतिपद्यमानानि संमूढानि संति भगवत्तत्वपरिज्ञा
नशून्यानि भगवद्भजनपराङ्मुखानि नहि शास्त्रानुरोधेन भगव
द्भजनमुच्यमानं [illegible] मपि कार्याभावादनर्थकमापद्यतेति
शंकते केपुनरिति अनेकेषु जन्मसु सुकृतवशादपाकृतदुरिता
नां द्वंद्वप्रयुक्तमोहविरहिणां ब्रह्मचर्यादिनियमवतां भगवद्भ
जनाधिकारित्वान्न शास्त्रविरोधोस्तीति परिहरति उच्यत इति त
दपेक्षितमर्थमाह पुनरिति मुक्तेर्बीजासिद्ध्यर्थं समाप्तप्रायमि
त्युक्तं प्रकृतोपयोगं पुण्यस्य कर्मणो दर्शयितुं विशिनष्टि सत्वे
ति उभयविधशुद्धेर्द्वंद्वनिमित्तमोहनिवृत्तफलमाह तेद्वंद्वेति
मोहनिवृत्ते भगवन्निष्ठापर्यंतत्वमाह भजंत इति तेषां नानापरि
ग्रहवतां भगवद्भजनप्रतिहतिमाशंक्याह दृढेति २८ ॥

135

स्वामिकृतटीका

गी॰ ज्ञातस्तर्हि केचन त्वां भजन्तो दृश्यन्ते ॥

टी॰ तत्राह येषामिति येषां तु पुण्याचरणशीलानां सर्वप्रतिबन्धकं पापं अन्तगतं नष्टं ते द्वन्द्वनिमित्तेन मोहेन निर्मुक्ताः दृढव्रताः एकान्तिनः सन्तो मां भजन्ते २८

स॰ [illegible] २८ ॥

पिशाचभाष्य

येषां त्वन्तगतं पापं अन्तं गतं जनानां पुण्यकर्मणां ते पुण्यकर्माणः द्वन्द्वमोहनिर्मुक्ताः द्वन्द्वभ्रमरहिताः सन्तो ते सेवन्ते मां दृढव्रताः दृढसंकल्पाः २८ ॥

रामानुजभाष्य

येषामिति येषां त्वनेकजन्मार्जितोत्कृष्टपुण्यसंचयात् गुणमया द्वन्द्वेच्छाद्वेषहेतुभूतं मदौन्मुख्यविरोधितानादिकालप्रवृत्तं पापमन्तमनुयातं तेनैवोत्कृष्टेन सुकृतेन तारतम्येन मां शरणमनुप्रपद्य गुणमयान्मोहाद्विनिर्मुक्ताः जरामरणमोक्षाय प्रकृतिविमुक्तात्मस्वरूपदर्शनाय महते चैश्वर्याय मन्मामयेच दृढव्रताः दृढसंकल्पा मामेव भजन्ते २८ ॥

अभिनवगुप्तकृतटीका व्याख्यातं २८

विष्णुना तु कृतार्थः २८

परमार्थप्रपाटीका

ज्ञातस्तर्हि केभजन्तो दृश्यन्ते तत्राह येषां सुकृताचरणवतां सकलनिम तिबन्धकं पापमन्तगतं नाशं प्राप्तं ते द्वन्द्वनिमित्तेन मोहेन विमुक्ताः सन्तो मां भजन्ते नैनं पाप्मानं तपतीति श्रुतेः [illegible] येषामिति

[illegible] २८ ॥

वनमालीटीका

यदि सर्वभूतानि संमोहं यान्ति तर्हि कथमक्षं च तद्विधा भजन्ते मामित्य न आह येषामिति येषां त्वितरविलक्षणानां सफलजन्मनां पुण्यकर्मणा मनेकजन्मसु पुण्याचरणशीलानां तैस्तैः पुण्यैः मदाराधनरूपैः स्तोचि ततैः कामकर्मभिर्मद्विषयकपापमन्तगतं मन्तमवसानं प्राप्तं तेषां

याभावेन तन्निमित्तेन द्वंद्वमोहेन रागद्वेषादिनिबंधनविपर्यासेन त्यक्तप्र
निर्मुक्ताः दृढव्रता अचलसंकल्पाः सर्वथा भगवानेव भजनीयः श्रेष्ठः
स चैवंरूप एवेति प्रमाणजनिताप्रामाण्यशंकाशून्यविज्ञानाः संतो मां
सर्वेश्वरं भजंते अनन्यशरणाः संतः सेवंते अतः सत्वशोधकमहापुण्योपचय
रूपतिः कामकर्मानुष्ठानाय यतनीयमिति भावः २८ ॥

अथ वैजयंतीटीका

ननु यदि सर्वाण्येव भूतानि जन्मकाल एव मोहं प्राप्नुवंति तर्हि किं केचि-
दपि त्वां न सेवंत इत्याशंक्य ये पापिनो मद्विमुखा देवांतरोपासकास्त ए
व मोहं यांति ये तु पुण्यकर्माणस्ते द्वंद्वमोहविनिर्मुक्ताः संतो मामेव भ
जंतीत्याह येषां त्वंतगतमिति पुण्यकर्मणां पुण्यं पवित्रमनेकजन्मा
र्जितं स्ववर्णाश्रमोचितं मदाराधनलक्षणं कर्म येषां तेन तथा तेषां यद्वा
पुण्यं चारु कर्म येषां तेषां पुण्यं तु चार्वपीत्यमरः सोचितानेकजन्मोपा
र्जितपुण्येन लब्धमज्जनसंगप्राप्तविविधभक्त्यर्थमंत्रजपार्चन
कीर्तनवंदनपादसेवनादिलक्षणं वा सत्कर्मवतामित्यर्थः तुश
ब्दोऽवधारणार्थकः येषामेव जनानां मद्भक्तिभक्तमतां पापं मदन्यदेवो
पासनरूपं प्राकृतविषयसेवनरूपं वा अंतगतं नष्टप्रायं त एव जना
द्वंद्वमोहनिर्मुक्ताः सन्तः प्राचीनकर्मवासनाजनितरागद्वेषादिरूपप्रा
कृतविषयाभिनिवेशरूपद्वंद्वनिमित्तकमोहात् निर्मुक्ता निःशेषे
ण त्यक्ताः प्राकृतविषयासक्ता दृढव्रताः संतो दृढमनेकविघ्नैरप्यखं
डितं व्रतं चरणोदकं विनान्यजलं न पिबामि हरेः सार्चनं विनाऽन्यका
र्यं न करोमि हरेरर्पणं विनाऽन्यद्वस्त्रस्नानादिकं नांगीकरोमीत्या
दिरूपं व्रतं संकल्पो येषां ते न तथा संतो मां सर्वेश्वरं भजंते मच्छरणं प्रपद्य
मामुपासत इत्यर्थः २८ ॥

यदि सर्वभूतानि संमोहं यांति कथं तर्
कंसमस्तुतकृतातिशयेन तेषां क्षीण

अथ मधुसूदनीटीका

र्हि चतुर्विधा भजंते मामित्यु
पपत्त्वादित्याह ॥

येषां त्वितरलोकविलक्षणानां जनानां फलजनकत्वपुण्यकर्मणाम
नेकजन्मसु पुण्याचरणशीलानां तैस्तैः पुण्यैः कर्मभिर्ज्ञानप्रतिबं
धकं पापमंतमवसानं गतं प्राप्तं ते पापाभावेन तन्निमित्तेन द्वंद्वमो

गतमन्त

गी॰ द्वेन रागद्वेषादिनिबंधनविपर्यासेन त्यक्तास्त एवं निर्मुक्ताः पुनरावृत्त्ययोग्यत्वे
टी॰ न त्यक्ताः दृढव्रताः अर्चनस्य संकल्पाः सर्वथा भगवानेव भजनीयः स
स॰ चैवं रूप एवेति प्रमाणजनिता प्रमाणप्रशंका शून्यविज्ञानाः संतो मां पर
मात्मानं भजंते अनन्यशरणाः संतः सेवंते यत्ताहं एवाय एव च तविभज
ते मामित्यत्र तुह द्वितीयाहेतोक्ताः अतः सर्वभूतानि संमोहं यांतीत्युत्सर्गः
तेषां मध्ये ये सुतिनस्ते संमोहशून्या मां भजंत इत्यपवाद इति न विरोधः
प्रथमेवोत्सर्गः प्राणापिप्रतिपादितः त्रिभिर्गुणमयैर्भावैरित्यत्र तस्मा
त्तत्प्रतिबंधकपुण्यकर्मसंचयाः सर्वदा यतनीयमिति भावः २८ अथे
दानीमर्जुनस्य प्रश्नार्थ यावषिन्नत्तत्र श्लोकद्वयेन सूत्रयति इह
तिष्यानीयतु सप्तमोध्यायो भविष्यति ॥

सदानंदीटीका

यदि सर्वाणि भूतानि संमोहं यांति तर्हि कथं चतुर्विधा भजंते मामित्युक्त
मिति चेच्छृणु १ येषां प्राकृतभिन्नानां जनानामधिकारिणां बहुज
न्मसु शास्त्रीयधर्मानुष्ठानतो महत्त २ पुण्याचरणशीलानां तैस्तैः
पुण्यैः स्वकर्मभिः धीप्रतिबंधकं पापमवसानं गतं हि ते ३ पापाभा
वे च तद्धेतुरागद्वेषादिरूपिणा द्वंद्वमोहेन निर्मुक्ताः सम्यक्प्रहीय
यान्विताः ४ अतएव चाल्पसंकल्पा विमुक्ता महता सदा सर्वथा भ
गवानेव भजनीयः स आदरात् स चैवंरूप एवेति विनिश्चितधियो
बुधाः अनन्यशरणाः संतः सेवंते मां चिदद्वयं ६ चतुर्विधा भजंते
मामित्येते प्रोक्तास्ते ईदृशाः तस्माद्धीशोधिकं पुण्यं यतितव्यं मनीषि
भिः ७ श्रोतव्योति यतो भगवान्ध्येयो हि तयोर्चीश्च सतत ८ २८ ॥

नीलकंठीटीका

केषां तर्हि सर्वज्ञत्वं भवतीत्याशंक्याह येषामिति द्वाभ्यां येषां पुनर्जना
नां पुण्यकर्मणा पापं अंतगतं अंतं नाशं प्राप्तं द्वितीयाश्रितेति समा
सः ते द्वंद्वमोहलक्षणस्तेन निर्मुक्ताः संतः प्रथमं दृढव्रताः ए
तदमादिदार्ढ्यभाजो भूत्वा मां भजंते २८ ॥

आनंदीटीका

येषां पुण्यकर्मणां रजस्तमोनाशकं कर्म तत् पुण्यं येषां तु अन्तगतं जनानां देव
तर्गभाजां पापं तमोरूपमंतं दूर्यं गतं ते द्वंद्वमोहात् अहंकारात् निर्मुक्ता आ
भिभूताः रजस्तमसः दृढव्रताः सन्तं मद्भजनोपायेषु यत्नवन्तः स्थिरबु
द्धयो मां भजंते तदेवमस्मिन्नध्याये परमेश्वरस्वरूपं चातुरात्म्यं कं य
थावल्लक्षितं आरब्धं पंचमे षष्ठे अध्याये षडंगयोगाभ्यासेन प्रधा
नतया पर्यंतेन सक्ततद्धृढभूमि जयानां ग्रस्मेकया मिथ्या पर्यायत्रक्रिदे
शितासा च देहे सति न संभवति मुक्तिर्हि बंधाभावः बंधश्च भूतेन्द्रिया
नःकरणसंघातरूपेण देहेन संबंधः ततश्चैवमनेकजन्मसंसिद्धस्य च
रमदेहपातोत्तरकालमेव ब्रह्मसंपत्तिरिति सर्वश्रुतिस्मृत्यागमप्रसि
द्धिदर्शनाद्ब्रह्मसामीने देहांतत्र सत्यतां शुरो होम्यांत नित्याम्भोयित त्वमुपक्रम २८
ते २८ ॥

रामकंठीटीका

केपुनस्त्वां भजंते इत्यत्राह ॥
येषां पुनर्जनानां महदनुग्रहाद्देवप्रदत्तविधायाप्तांतोस्तनामन
पवपुण्यकर्मणा ज्ञानेनापापमज्ञानलक्षणमंते गते विनाशं
प्राप्ते यथोक्ता द्वंद्वमोहान्निर्मुक्ता दृढव्रताः स्थिरनियमाः संतो
मामेकं देवतं भजंते मद्भेदप्रतिपत्तिपर्यंतया सामाश्रयंते [illegible] सपर्यया
२८ ॥

लासिकी [illegible]टीका

कथं तर्हि चतुर्विधा भजंते मामित्यायुक्तेन केचन त्वां भजंते इत्यत आ
ह ॥ येषां सफल[illegible]जन्मतां तल्लोकविलक्षणानां पुण्यप्र
क्तरूपेण कर्मयोगेन सत्वशुद्धिहेतुः कर्म येषां तेषां जनानां प्रा
नप्रवज्ञानप्रतिबंधकं पापमंतं गतं नष्टं ते द्वंद्वमोहेन यथोक्तेन
निर्मुक्ता निःशेषेण त्यक्ता दृढव्रताः स्थिरसंकल्पा मामीश्वरं भजं
ते २८ ॥

पंचोलीटीका

केपुनः अनेकद्वंद्वमोहेन निर्मुक्ताः संतस्त्वां विदित्वा यथाशास्त्र
मात्मभावेन भजंतीत्यपेक्षितमर्थं दर्शयितुमाह येषामिति

तु पुनः येषां पुण्यकर्मणां जनानां पापमंतगतं क्षयं प्राप्नुवंति ते द्व
वैंकेन द्वंद्वमोहेन निर्मुक्ता दृढव्रता दृढं निश्चितं परमार्थतत्त्ववि
षयं व्रतं ज्ञानं येषां ते मां परमात्मानं भजंते २८

रणवीरसमिद्धोपिनी ॥

ननु यदि सर्वेषां भूतानां सुखदुःखे संमोहं प्राप्नुवंति तर्हि वद्धजन नस्य सु
दुरन्यदावसर इति तेनैवोभयसिद्धिप्रदेन जातायां कृतार्थतायां
सुखविषयको वारं वारं भवत्कृतो नियोगो निष्फल एव सत्यं सु
कृतातिशयेन क्षीणपापानां चतुर्विधानां भक्तानां संमोहाभावा
दस्त्येव सुखदुःखे मद्भजनावसर इत्याह येषामिति येषामनादि
विशेषेण चतुर्विधानामितरजनविलक्षणानां जनानां पूर्वभ
वार्जितपुण्यकर्मवात्यापं प्रहृतिनिरोधकं कल्मषमंतं गते ना
शं प्राप्तं ते द्वंद्वमोहेन सुखविषयकेण कश्मलेन निर्मुक्ताः परि
त्यक्ता मां सर्वेश्वरं भजंते कीदृशा दृढव्रताः दृढं चालयितुमश
क्यं व्रतं सुखाचरणविषयो नियमो येषां परमेश्वर एव सिद्धसि
द्ध्योः परमं कारणमत एव शरणीकार्य इति मद्भजनविषयकसंक
ल्परूपं व्रतं वा दृढं येषां एतादृशा महावीरप्रयोगिकं युद्धं महद्भिः
पुण्यराशिभिः क्षत्रियाणां लभ्यमिति भावः ततश्च सर्वभूतानी
ति सामान्योक्तिरेव न पुनर्यावद्भूतविषयिकेति भावः एतेन च द्वि
तीयाध्याये यदृच्छया चोपपन्नमित्यादिना सूचितोऽर्थो विवृतः
२८ ॥

मधुभाष

येषामिति ॥ २८

भाषानुवाद

जो फेरि कोई कोई जो हमारी भजन करते हैं इस श्लोक में कहतेहैं कि जो पुण्य कर्म आचरण शील हैं उन के सर्व प्रतिबन्धक स्वरूप सब पाप नष्ट होगये हैं वे लोग सुख दुःख आदि द्वंद्व से मुक्त औ एकाग्रचित्त होय हम को भजते हैं २८ ॥

दोहा

सुकृति जनको जेहि को पापनाश भयो जोय मो कों भजहिं दृढ़ व्रती द्वंद्व मोह तजी सोय २८ ॥

138

जरामरणमोक्षाय मामाश्रित्य यतंति ये । ते ब्रह्म तद्विदुः
कृत्स्नमध्यात्मं कर्म चाखिलं ॥ २९ ॥

शांकरभाष्यं

ते किमर्थं भजंते इत्युच्यते जरेति जरामरणमोक्षाय जरामरणमोक्षार्थं मां परमेश्वरं आश्रित्य मत्समाहितचित्ताः संतो यतंति प्रयतंते ये ते यत् ब्रह्म परं तद्विदुः कृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु तद्विदुः कर्म चाखिलं समस्तं विदुः ॥ २९ ॥

आनंदगिरिकृतटीका

यथोक्तानामधिकारिणां भगवद्भजनफलं प्रश्नद्वारा दर्शयति ते किमर्थमिति जरामरणलक्षणो यो बन्धस्तद्विश्लेषार्थं भगवद्भजनमित्यर्थः संप्रति सगुणस्य सप्रपंचस्य मध्यमानुग्रहार्थं ध्येयत्वमाह ममाश्रित्येति जरादिसंसारनिवृत्त्यर्थं निर्गुणं निष्प्रपंचं मामुत्तमाधिकारिणो जानंतीत्युक्तं मामेव ये प्रपद्यंत इत्यादावित्याह जरेति मध्यमाधिकारिणं प्रत्याह मामिति परमेश्वराश्रयणं नामविषयविमुखत्वेन भगवदेकनिष्ठत्वमित्याह मत्समाहितेति प्रयतनं भगवन्निष्ठासिद्ध्यर्थं बहिरंगाणां यज्ञादीनामंतरंगाणां च श्रवणादीनामनुष्ठानं प्रागुक्तं जगदुपादानं परं ब्रह्म कथं ब्रह्म विदुरित्यपेक्षायां समस्ताध्यात्मवस्तुत्वेन सकलकर्मत्वेन च तद्विदुरित्याह कृत्स्नमिति ॥ २९ ॥

स्वामिकृतटीका

एवं च मां भजंतः ते सर्वं विज्ञेयं विज्ञाय कृतार्था भवंतीत्याह ॥
जरामरणयोर्निरासार्थं मामाश्रित्य ये प्रयतंते ते तत्परं ब्रह्म विदुः कृत्स्नमध्यात्मं च विदुः येन ब्रह्मणा आत्मना तत्प्राप्त्युपायं देहादिव्यतिरिक्तं शुद्धमात्मानं च जानंतीत्यर्थः तत्साधनभूतमखिलं सरहस्यं कर्म च जानंति [illegible] इत्यर्थः
[illegible] २९ ॥

पिशाचभाष्यं

जरामरणमोक्षाय मामाश्रित्य यतंति प्रयतंते ते ब्रह्म तद्विदुः विजानंति कृत्स्नं
अध्यात्ममध्यात्मभूतं प्रत्यगात्मभूतं कर्म चाखिलं समस्तं [illegible] विदुः २९
२९

गी॰
टी॰
स॰

ननुतेषांत्रयाणांभगवंतंभजमानानांज्ञानतश्चविशेषेणतयादेयांश्चप्रत्येति
जरामरणमोक्षायप्रकृतिविमुक्तात्मस्वरूपदर्शनायमामाश्रित्ययेभजंते
तेब्रह्मविदुः अध्यात्मंचकृत्स्नंविदुः कर्मचाखिलंविदुः २९ ॥

अभिनवगुप्तकृतटीकाव्यवतं २९

त्रिशतानुक्रमणं: २९

परमार्थप्रपाटीका

^ अथस्वकृताचरणेपिमदाश्रयव्यतिरेकेणविराग्यत्वावबोधोवानभवतीत्याह॥

जरेति अत्यंतजरामरणस्वरूपयोर्जरामरणयोर्दुःखधर्मयोर्मोक्षायतायायमा
परमात्मनमाश्रित्ययेयतंतेयोगाभ्यासादिप्रयत्नंकुर्वंति तेतत्परंब्र
ह्मविदुः तं निरुपायस्वरूपंकृत्स्नंसमग्रमध्यात्मंचविदुः तथातन्निमित्तभू
तमखिलंफलाभिसंधिरहितंकर्मचविदुः
॥

139 १३

वनमालीटीका

मांभजंतः इत्युक्तानुवादेनोक्तमेवभगवद्भजनस्यविज्ञानाख्यफलंत
दन्योपायनिर्हृत्यर्थमाह जरेति जरामरणादिविविधदुःखसहसंसारदुः
खनिरासायमांसर्वेश्वरंसद्गुणगणालयमाश्रित्यशरणागतंप्राप्ततत्
यतंतेमदर्पितानिफलाभिसंधिरहितानि स्वोचितानिविकर्माणिकु
र्वंतितेक्रमेणशुद्धचित्ताःसंतःब्रह्मतत्पूर्णंब्रह्ममांविदुःकृत्स्नमध्या
त्मंविदुरखिलंकर्मचविदुः २९ ॥

ऊत्तमवैजयंतीटीका

एवंचतुर्विधेषुस्वभक्तेषुज्ञानिनोनिष्कामत्वेनश्रेष्ठत्वंत्रयाणांतुसकाम
त्वेप्यंतेस्वप्रपत्तिपूर्वकंस्वयामिअश्वाक्तेनदेवोपासकानांनसंसारप्राप्तिः
स्यादित्युक्तमिदानीमेनेभ्योन्येपिममसकामाभक्ताःसंतीत्याह ज
रामरणमोक्षायेति जरामरणमोक्षाय जराचमरणंचजरामरणेताभ्यांमो
क्षार्थंविमुक्तयेप्रकृतिसंबंधरहितस्वस्वरूपावलोकनायतन्मात्रकामा
येवेत्यर्थः मामाश्रित्यमांप्रपद्ययेयतंतेनिरंतरंकुर्वंतितेजनाःकृत्स्नंसम
ग्रंसमष्टिरूपंतत्प्रकृतिविमुक्तंशुद्धंब्रह्मब्रह्मशब्दाह्निर्दिष्टंतेत्रतत्स्वरूपंवि
दुर्जानंतिचपुनःकृत्स्नमध्यात्मंजीवस्वभावंविदुःपुनःअखिलंसर्वंक
र्मविसर्गरूपंविदुः २९ ॥

+ अथेदानीमर्जुनस्य प्रश्नमनुत्थापयितुं सूत्रभूतौ श्लोकावुच्येते अनयोरेव वृत्तिस्थानीय उत्तरोऽध्यायो भविष्यति ॥+

जरामरणमोक्षाय मधुसूदनीटीका

+ येऽसंसारदुःखान्निर्विण्णा जरामरणादिविविधदुःखसहसंसारदुःखनिरासाय तदेकहेतुं मां सगुणं भगवन्तमाश्रित्य तत्परः सर्ववैमुख्येन शरणं गत्वा यतन्ति यतन्ते मदर्पितानि फलाभिसंधिशून्यानि विहितानि कर्माणि कुर्वन्ति क्रमेण शुद्धान्तःकरणाः सन्तः तज्जगत्कारणं मायाधिष्ठानं शुद्धं परं ब्रह्म निर्गुणं तत्पदलक्ष्यं मां विदुः तथात्मानं शरीरमधिकृत्य प्रकाशमानं कूटस्थं सर्वोपाधिपरिच्छिन्नं त्वंपदलक्ष्यं विदुः कर्म च तदुभयवेदनसाधनं गुरूपसदनश्रवणमननाद्यखिलं निरवशेषं फलाव्यभिचारि विजानन्तीत्यर्थः २९ ॥

सदानंदीटीका

संसारदुःखान्निर्विण्णा जरामरणमुक्तये नानादुःखसहसंसारदुःखोच्छेदाय ये जनाः १ दुःखोच्छेदैकहेतुं मां वासुदेवं चतुर्भुजं घनश्याममरमानाद्यं किरीटोज्ज्वलमस्तकं २ शंखचक्रगदापद्मवनमालाविभूषितं ध्येयत्वेन समाश्रित्य सगुणं ब्रह्म विग्रहं ३ विहायेतरकर्तव्यं गत्वा शरणमादरात् मदर्पितानि कर्माणि विहितान्याचरन्ति ते ४ क्रमात् शुद्धधियः सन्तस्तज्जगत्कारणं परं मायाधिष्ठानमद्वैतं शुद्धं ब्रह्म च निर्गुणं ५ विदुस्तत्पदलक्ष्यं मां साकल्येन यथा तथा शरीरमधिकृत्यैव भासमानं चिदात्मकं ६ देहाद्युपाध्यसंस्पृष्टं त्वमोलक्ष्यं विदुः परं कर्मापि तद्द्वयज्ञानसाधनं शास्त्रसंमतं ७ श्रवणाद्यखिलं चैतज्ज्ञानं निर्व्यभिचारि यत् ८ २९ ॥

नीलकंठीटीका

ततश्च जरामरणयोः प्रवाहात् आत्मनो मोक्षाय मामाश्रित्य मयि समाहितचित्ताः भूत्वा ये यतन्ति यतन्ते ज्ञानलाभाय वेदान्तश्रवणादौ ते तत्सर्ववेदान्तप्रसिद्धं कृत्स्नं ब्रह्म विदुः विराडाद्युपासकाः कृत्स्नब्रह्मविदः सूत्रकारणयोर्निष्कलस्य चाज्ञानात् श्रीगोपालबालोपासकास्तु न तद्दलत्वात् कृत्स्नब्रह्मविदः तेऽध्यात्मादिकं कार्त्स्न्येन जानन्ति सर्वविदो भवन्तीत्यर्थः अनेन यत् ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यत इत्येकविज्ञानात् सर्वविज्ञानप्रतिज्ञाया एवं कृत्स्नस्याप्युपसंहारो दर्शितः अध्यात्मं आत्मनि शरीरे अधिष्ठानं प्रत्यगात्मविषयं वस्तुशुद्ध

गी॰ टी॰ स॰ त्वंपदार्थमित्यर्थः कर्म च तत्त्वंपदार्थज्ञानयोः साधनं श्रवणादिकं सर्वं
विदुः २९ ॥

आनंदीटीकाउपक्रमं २९ समाप्तम् ॥ तदेवमनेकजन्मसंसिद्धस्य च
रमदेहप्राप्त्युत्तरकालमेव ब्रह्मप्राप्तिरिति सर्वश्रुतिस्मृत्यागमप्रसिद्धं दर्शितं ब्रह्मप्राप्तौ नैवदेव्यां सर्वप
येदेहात्मकातिलत्वायित्तमुपक्रमते ॥ रामकंठटीका

140 इत्यंच मां यथोक्तस्वरूपमाश्रित्य च तद्विषया भक्त्यालंबनीकृत्य ये जरामरणा
दिद्वंद्वदोषविमुक्तये यतन्ते मयि लग्ना योगिनो भवन्ति ते च युक्तचेतसो य
थोक्तसमाधिसंपन्नाः समाहितमनसो ब्रह्मस्वरूपादिभेदेन समनन्त
गध्यायव्याख्यास्यमानमर्थविधिविज्ञानं हृष्टा मां विदुर्मे ज्ञानतश्च
योगम् २९ ॥ लासिकी धनपतीटीका

अथ वैराग्यपूर्विकायाभक्तेः पार्यंतिकमनन्तमंकृतं कृतमनाविधाय
फलमाह ॥ ये जरामरणाद्युपात्तं सावजः स्वान्निर्विणाः तत्तच्छ
लार्णवे व्याघ्रीवैनिजराचायुर्यातिभिन्नघटांबुवत् निम्नंतिरिपु
वज्रोगास्तस्मात्श्रेयः समभ्यसेत् संपदः स्वप्नसंकाशा यौवनं कुसुमं
मोपमं तडिच्चपलमायुष्यं कस्यस्याज्जानतोधृतिः अयमेव कलत्रं
मे धनं मे बांधवा मम लपंतमिति मर्त्याजं हंतिकालवृकोदरः
तस्मात्तायतनं निरासायैवनत्वातिं निवारणायार्थामयेवामामीश्व
क्लि रं भक्त्याश्रित्य भक्तवशीकृत्य यतंते मत्पयात्मकारमत्प्रयात्विसे
वंतेतनन्निर्विशेषं कृत्स्नस्वरूपं ब्रह्म विदुः प्रत्यभिजानंति अध्यात्मं
च विदुरखिलं अध्यात्मिकादीनि च ममैवरूपांतराणि कर्म च वि
दुरिति तत्रांतरसंज्ञितस्य दार्शवत्वावशेषयुक्तं ॥ एवं जीवन्मु
क्तानां वैश्यात्यमापन्नानां सम्यमाध्यायपर्यंतं तारतम्येनोपची
यमानं वृत्तमुक्ता ॥ ~~एवं देवतत्वज्ञानं तंत्वत्तदध्यायेविव~~
~~दर्शीविभूतं ब्रह्मस्यानीयं स्थायीन~~ २९ ॥ पंचोलीटीका
ते किमर्थं भजंतित्याह जरामरणेति ये मामाश्रित्य समाहितचित्ताः
संतो जरामरणमोक्षार्थं यतंते ते यत्नं कुर्वंति ते यत्परं ब्रह्म तत्कृत्स्नं
समग्रं विदुः यदध्यात्मं प्रत्यगात्माविषयं वस्तु तदपि समग्रं विदुः
कर्म चाखिलं समग्रं तत्साधनभूतं रहस्यं विदुः २९

रणवीरसमिद्धोधिनी॥

जरामरणेति ये तु मां सः जन्ममरणमोक्षाय अजरामरभा
वाय मां परमेश्वरमाश्रित्य शरणीकृत्य यतंति स्ववर्णाश्रमो
चिते कर्मणि प्रयतंते ते तद्ब्रह्म कृत्स्नं संपूर्णमध्यात्मं च अ
खिलं कर्म च विदुर्जानंति अयमभिप्रायः ब्रह्मादिसमस्तपदार्थ
ज्ञाने सत्येव स्वाचारोचिते कर्मणि प्रवृत्तिर्दृढा भवति ततोज
रामरत्वं वाव्यभिचारिमत्सायुज्यादि प्राप्नोतीति २९॥

मधुभाष्य

जरामरणमोक्षायेत्यन्यकामनिवृत्त्यर्थं मोक्षे सक्तिः स्वस्य
र्थं वा न विधिः मुमुक्षोरथमुक्तस्य वरीयसैकांतभक्तिर्मार्गिती
नरस्त्रतेनारदीये नात्यंतकमिति च देवानां गुणलिंगानामा
नुश्राविककर्मणां सत्वएवैकमनसो वृत्तिः स्वाभाविकी तु
या अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसी जरयत्याशु या को
शं निगीर्णमनलो यथेति भागवते लक्षणाच्च आह च सर्वे वे
दाश्च देवाद्या देवा नारायणार्थकाः नारायणश्च मोक्षार्थे मो
क्षो नान्यार्थ इष्यते एवं मध्यमभक्तानामेकांतानां न कस्य
चित् अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमिति गीताक
ल्पे त एव च विदुः मय्येवैषहृत्प्राणतः श्रुतिस्मृतेः २९॥

141

भाषाअनुवाद

और ऐसे जो मेरे भक्त जन तेई जानवे जोग वस्तु को अच्छीतरह
जानि के कृतार्थ होते है यह कहते है कि जरा मरण निवारणा
र्थ मेरी आश्रय ले जो मनुष्य यत्न करते है वेई परब्रह्म को
जानि सकें है और सम्पूर्ण अध्यात्म विद्या जाने है अर्थात् अ
ध्यात्मज्ञान मे शामिल सोई देहादि से भिन्न शुद्ध आत्मा को भी
जानते है और तत्वज्ञान के साधनरूप कर्म भी जानि सकतेहै
२९

दोहा

जरामृत्युसें मोक्षको करे यत्नमो आश्रयजोय तेजाने ब्रह्महिं स
कलकर्म अध्यात्मकोय २९

142

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः प्रयाणकालेऽपि
च मां ते विदुर्युक्तचेतसः ३० ॥ इति श्रीभगवद्गीता
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विज्ञानयोगो नाम स
प्तमोऽध्यायः ७ ॥

शांकरभाष्यं

साधीति साधिभूताधिदैवं अधिभूतं चाधिदैवं च अधिभूताधिदैवं ते
न सह अधिभूताधिदैवेन वर्तते इति साधिभूताधिदैवं मां ये विदुः साधि
यज्ञं च सह अधियज्ञेन साधियज्ञं ये विदुः प्रयाणकाले मरणकाले
ऽपि च ते मां विदुः युक्तचेतसः समाहितचित्ता इति ३० ॥ इति श्री
भगवद्गीताभाष्ये सप्तमोऽध्यायः ७ ॥

आनन्दगिरीकृतटीका

न केवलं भगवन्निष्ठानां सर्वाध्यात्मककर्मात्मकब्रह्मवित्त्वमेव किं
त्वधिभूतादिसहितेन तद्वेदित्वमपि सिध्यतीत्याह साधिभूतेति अध्या
त्मे कर्मादिभूतमधिदैवमधियज्ञं चेति पंचकं कर्म तद्ब्रह्म ये विदु
स्तेषां यथोक्तज्ञानवतां समाहितचेतसामापद्दवस्थायामपि भगव
त्तत्त्वज्ञानमप्रतिहतं तिष्ठतीत्याह प्रयाणेति अपिचेति निपाताभ्यां
तस्यामवस्थायां करणग्रामस्य व्यग्रतया ज्ञानसंभवेऽपि मयि समाहि
तचित्तानामुक्तज्ञानवतां भगवत्तत्त्वज्ञानमयत्नलभ्यमिति द्योत्य
ते तदनेन सप्तमेनोत्तममधिकारिणं प्रति ज्ञेयं निरूपयता तद
र्थमेव सर्वात्मकत्वादिकमुपदिशता प्रकृतिद्वयद्वारेण सर्वकार
णत्वादिति च वदता तत्पदवाच्यं तत्त्वं चोपपादितं ३० ॥

इति आनन्दगिरिकृतटीकायां सप्तमोऽध्यायः ७ ॥

स्वामिकृतटीका

नन्वेवंभूतानां योगभ्रंशाशंकापीत्याह ॥
साधिभूतेति अधिभूतादीनां स्वरूपं भगवानेवानंतराध्याये व्या
ख्यास्यति अधिभूतेन अधिदैवेन च सह अधियज्ञेन च सह मां ये जा

गी॰ नंति तेन युक्तचेतसः मय्यासक्तमनसः प्रयाणकालेपि मरणसमयेपि ते
टी॰ मां विदुः न तु तदापि व्याकुलीभूय मां विस्मरंति अतो न मद्भक्तानां योगभ्रं
स॰ शाशंकेत्यर्थः कृष्णभक्तैरयत्नेन ब्रह्मज्ञानमवाप्यते इति विज्ञानयो
गोऽत्र सप्तमे संप्रकाशितः ७ ॥३०॥ इति सुबोधिन्यां टीकायां सप्तमः

143

पिशाचभाष्यं

साधिभूताधिदैवं अधिभूताधिदैवसहितं साधियज्ञं यज्ञसहितं च ये विदुः विजानंति प्रयाणकाले मरणकाले चापि मां ते विदुः विजानंति युक्तचेतस इति ३० इति पैशाचभाष्ये सप्तमोऽध्यायः ७ ॥

रामानुजभाष्यं

अथ इति पुनर्निर्देशात्पूर्वनिर्दिष्टेभ्योऽन्येऽधिकारिणो ज्ञायंते साधिभूतं साधिदैवं मामैश्वर्यार्थिनो ये विदुरित्यनंतरवाच्यस्वरूपमाप्राप्यार्थत्वात्तद्विधायकमेव तथा साधियज्ञमित्यपि त्रयाणामधिकारिणामविशेषेण विधीयतेऽर्थस्याभावात्त्रयाणां नित्यनैमित्तिकरूपमहायज्ञाद्यनुष्ठानमवर्जनीयं तेन च प्रयाणकालेपि स्वप्राप्यानुगुणं मां विदुर्नेत इति चकारात्सर्वं जरामरणमोक्षायतमाना य
अप्रयाणकाले विदुरिति समुच्चीयते अनेन ज्ञानिनोऽप्यर्थः स्वभावात्साधियज्ञं मां विदुः प्रयाणकालेपि स्वप्राप्यानुगुणं मां विदुरिति युक्तं भवति ३० इति श्रीमद्रामानुजाचार्यविरचिते गीताभाष्ये सप्तमोऽध्यायः ७ ॥

अभिनवगुप्तकृतटीका

रागद्वेषक्रोधमोहादिभिस्तावत्तावन्मोहात्मक एव संसारः स्फीतीभावमुपनीयते ॥ येन प्रकृतिजबंधनवैचित्र्यमसमग्रमेव जगन्निजकार्यकारणमात्रादेकमेव प्रसृमरतामवलंबते अमोहवासनानुभावात्प्रतिदिनं रात्रिसमयसौभगमवत् तत्तनावनाविमुक्तरूपतामोहानुभावसमासीनोत्तनविचित्रव्यापारसंसारदर्शनात् येन तु विनिष्टनामसाः पुण्यपुण्यपरिहृयते मीक्षतास्मान्तत्त्वविपादिन महामोहविनाशः सर्वमेव भगवदर्पितमवचितं जरामरण

मयनमिस्थसुतंब्रह्मविदंति अर्थात्मिकाधिभौतिकाधिदैविकाधियज्ञा
कानिचममैवरूपांतराणिप्रयाणकालेचनित्यंभगवद्भावयुक्तानंतःकरण
त्वान्मांजानंति यतोयेषांजन्मपूर्वमेवभगवतत्त्वेनैतनकालेपरमेश्व
रंसंस्मरेयुः किंजन्मासेवनयेतियेमन्यंतेतेषांनूनंसीभावएवशोभ
नइतिशिवम् ३० अत्रसंग्रहश्लोकः स्पष्टंभगवतोभक्तिरागहिताक
ल्पमंजरी साधकेच्छासमुचितोयेनापूर्णंपरिपूरयेत् ॥ इतिश्रीमच्छ्र
ज्ञानकाभिनवगुप्तविरचितेश्रीभगवद्गीतार्थसंग्रहेसप्तमोध्यायः ७

नोधिवंभूतानांयोगभ्रंशशंकापीत्याह ॥ परमार्थप्रपाटीका

साधि॰ भूतेति अधिभूताधिदैवैःसहवर्तमानंमांयेविदुस्तेप्रयाणकालेनिर्या
णसमयेपियुक्तचेतसःतन्मरणावनःसंतोमांविदुः मांज्ञात्वानतेजा
नंति नतत्रदेहांतवेदनाभिर्व्याकुलेक्रियंते किंतुमत्प्रसादात्सावदा
नाःसंतस्तन्मयतांयांतीत्यर्थः ३० अर्थाध्यायतात्पर्यं ॥ चित्तंविरूप
तोनहृदयमनुगतोभासते प्रत्यगात्माबाह्यभूम्यादिभूतेषुप्रतिष्ठा
नगुणैःसंप्रविष्टोविभाति वेदेयोंकाररूपःसवितरिमहसावीर्यव
त्पूर्जितेनप्राज्ञैस्तवेद्यितोसौममननरीतितत्सप्तमेनोक्तमास्ते ३०
इतिश्रीमद्वैवतपंडितसूर्यविरचितायांभगवद्गीतासप्तमोध्यायः ७

वनमालीटीका

अधिभूताधिदैवंमांसहितंब्रह्मसंततंमांयेविदुर्जानंतियेचयज्ञाख्ये
नमद्रूपांतरेणसहितंचमांविदंतितेमय्येवासक्तमनसोभूत्वामर
णकालेमामेवप्राप्नुवंतीत्यर्थःतेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्म
चेतिअधिभूतमधिदैवंविदुरितिवक्तव्येसाधिभूताधिदैवंमामिति
क्तिरधिभूतादितानस्वतंत्रानर्थत्वसूचनार्थं अध्यात्मादिप्रश्ना
र्थाउत्तराध्यायेवक्ष्यंते भगवद्भजनादन्यज्ञानोपायोनास्तीति
भावः ३० ॥ इतिगीतायांवनमालीसप्तमोध्यायः ७ ॥

ब्रह्मवैजयंतीटीका

तेभ्योप्यन्येयेसकामामद्भक्ताःसन्तितेपिमद्भजनप्रभावेणसंसारं
तरंतीत्याह साधिभूताधिदैवंमामिति अधिभूतंचाधिदैवंप्रकृतिपुरु चानयोःसमाहारोसाधि
षरूपंतेनसहवर्तनेइतिसाधिभूताधिदैवंसर्वैश्वर्यसहितंचमनः भूताधिदैवं

गी॰
टी॰
स॰

144

अधियज्ञं यज्ञकर्माधिष्ठातृत्वेन वर्त्तते इत्यधियज्ञमिन्द्रादिदेवतं तेन सहवर्त्तमानं साधियज्ञं देहाद्यात्मतयाऽवस्थितं मां सर्वेश्वरं सर्वान्तर्यामिनं ये ये सर्वकामाः सन्तोपि विदुर्जानन्ति तेपि च प्रयाणकाले स्थूलदेहवियोगसमयेऽपि मां पुरुषोत्तमं विदुः चेतनाचेतनयोरन्तरात्मानं सकलकारकरूपं सर्वनियन्तारं मां ज्ञात्वा संसारान्मुच्यन्त इत्यभिप्रायः ३० अज्ञानकार्यहीनं यस्मिन्रमन्ति विमला वा हरेः भक्ता विदन्ति यज्ज्ञानं तं कृष्णं नौमि सप्तमे १ ॥ इतिज्ञानमेवजयंतीस प्तमोध्यायः ७ ॥

मधुसूदनीटीका

न चैवंभूतानां मद्भक्तानां मरणकालेपि विवशकरणतया मद्विस्मरणं शंकनीयं यतः साधिभूताधिदैवं अधिभूताधिदैवाभ्यां सहितं तथा साधियज्ञं च अधियज्ञेन सहितं मां ये विदुः चिन्तयन्ति ते युक्तचेतसः सर्वदा मयि समाहितचेतसः सन्तः तत्संस्कारपाटवात् प्रयाणकाले प्राणोत्क्रमणकाले करणग्रामस्यात्यन्तव्यग्रतायामपि च कारुण्यादयत्नेनैव मदनुग्रहान्मां सर्वात्मानं विदुः ^जानन्ति तेषामन्तकालेपि मदाकारैव वृत्तिर्भवति सर्वदापि चिन्तनसंस्कारपाटवाद्भवति तथा च ते मद्भक्तियोगात्कृतार्था एव भवन्तीति भावः अधिभूताधिदैवाधियज्ञशब्दार्थमग्रिमेऽध्याये अर्जुनप्रश्नपूर्वकं व्याख्यास्यति भगवानिति सर्वमनाविलं तदेवं उत्तमाधिकारिणं प्रति ज्ञेयं मध्यमाधिकारिणं प्रति ^च ध्येयं लक्षणया मुख्यया वृत्त्या तत्पदप्रतिपाद्यं ब्रह्म निरूपितं ३० ॥ इति श्रीमधुसूदनीटीकायां सप्तमोध्यायः ७ ॥

सदानंदीटीका

एवंभूतास्ते मद्भक्ता मरणकालेपि मां हरिं न विस्मरन्ति किं वाच्यं जीवने सति साधवः १ येपि भूताधिदैवाभ्यां सहितं चिन्तयन्ति मां अधियज्ञेन सहितं सर्वदा तत्परा अपि २ प्राणोत्क्रमणकालेपि तत्संस्कारैकपाटवात् अत्यन्तव्यग्रतायां च सर्वेन्द्रियगणस्य च ३ अनायासेन मद्भक्ता मां विदुर्मदनुग्रहात् अन्तकालेपि तेषां स्यान्मदाकारैकधीगतिः ४ पूर्वोपार्जितसंस्कारपाटवादेव सर्वथा तथा च ते कृतार्थाः स्युर्मद्भक्त्या गुणयोर्हरेः ५ एवं सप्तमे श्लोकाभ्यां प्रश्नबीजं निधाय च विस्तरेणोत्तरं तस्य व्याख्यास्यति हरिः स्वयं ६ तदेवं गुणहीनं तत्पदब्रह्म निरूपितं मध्यादिकारिणां ध्येयं वोपायहरिणोदितं ७ ३० योमायावीमहि

णःप्रकटितमहिमावेदसिद्धांतगीतोयोभक्तार्थंस्वरूपंव्रजनरवनजंस्वे
कृपयाधत्तदेवः यस्यांघ्रिद्वंद्वमीशंतनुमतिनलधिसंतरंत्याश्रितायै
नेश्रीकृष्णंहृदिस्थंसततमिहमुदासंश्रयेहंस्वभक्त्या १ ॥ मायाया
स्यातिगूढाप्रसुरगणगुणनासर्वसंसारहेतुर्नोमन्त्रैर्नैःसम्यगध्याहरिप
दशरणंयेप्रपन्नाभक्त्या यस्मात्तेभोहहानतर्भमीतविवजन्तः संप्र
विष्णोनित्यामयत्वंचैवनित्यंनामिहमरारिंश्रीकृष्णमीशंप्रपद्ये ॥
इतिश्रीभावप्रकाशेश्रीमल्लालनंदविलाहानेटसमाप्तिप्रधानोयंसप्तमो
ध्यायः ७ ॥

नीलकंठीटीका

एवंतत्पदार्थविवेकंसयोगमुक्तिहेतुंसमाप्यतत्प्राप्त्युपायभूतान्युपासना
तिक्रमसाक्षिफलानिविस्तरेणवक्तुकामः संक्षेपेणसूचयति साधि
भूतेति अधिभूतंचअधिदैवंचताभ्यांसहितंसाधिभूताधिदैवं तथा
अधियज्ञेनसहितंसाधियज्ञंचमांयेविदुः उपासतेतेयुक्तचेतसः य
तःनित्यंसमाहितचित्तास्ततोमांप्रयाणकालेपिसर्वजनप्रत्यक्षमोहके
विदुरेव भावनादार्ढ्यात्मरणकालेपितस्यतानस्यप्रमोषोनभवत्य
तोभगवतिनैरंतर्येणहृच्छभावनाकर्तव्येतिभावः अधिभूतादिपदा
र्थंतुभगवानेवव्याख्यास्यतीतिनोक्तंवतोवयं ३० ॥ इतिश्रीएम
पर्वणिनैलकंठीयेभारतभावदीपेसप्तमोध्यायः ७ ॥ ॥

आनंदटीका

युक्तचेतसःप्राज्ञाहितेनयोगाभ्यासेनसमाहितांतःकरणाः एतद्धा
ख्यानमस्यदर्शिमाध्यायप्रश्नोत्तरेणविव्रियतेइतिशुभम् ३० ॥ इति
श्रीपरमेश्वरलघुणोआनंदटीकानामसप्तमोध्यायः ७ ॥

रामकंठीटीका

गीताध्यायोऽधीतिमुपगताःसप्तमेसत्स्वरूपेसंतःसम्यक्कालिनस्वरूपाः
केपिलोकेयथास्मिन् निःसंदेहाःसकलभवनाभोगभावव्यवस्थां
हस्तन्यस्तामलकफलवदात्ममालोकयंत ३० ॥ इतिश्रीराजानक
रामकंठविरचितेवाक्यार्थान्वयमात्रेसर्वतोभद्रनाम्निभगवद्गीता॥

145

विवरणे रामकंठीटीकायां सप्तमोध्यायः ७ ॥

[illegible] टीका

अथ विदेहमुक्तानां तत्तत्फलप्राप्तये विवक्षुः तीजभूतं हृदयस्थानीयं श्लोकमाह ॥ ॥

येममात्मानमेवभूतं सुष्याव स्थायाविजानंति कीदृशमधिभूतेनाधिदैवेनाधियज्ञेन च सहितं संतमेव नपवयुक्तचेतसो नित्यमवहितांतःकरणाः प्रयाणकाले देहत्यागसमयेपि मांप्रतिगात्मानं विदुः साक्षात्कुर्वंति विदेहमुक्ताभवंतीत्यर्थः वक्ष्ययोगाद्गुणांति अपिशब्दाज्जीवन्मुक्तावस्थायामपि चैवंप्रकारेण अधिभूतादिशब्दानामर्थमनंतराध्याये वक्ष्यति ॥ ३० इतिश्री [illegible] लासिकीटीकायां योगोनाम सप्तमोध्यायः ७ ॥

जीवन्मुक्ता नये वा चद्धत देहस्य सम्भ चिदै कोत्मा पपत्तिं यत्नो मिभक्तवत्सलम्

पंचोलीटीका

उत्तराध्यायबीजं प्रतिपादयति साधिभूतेति येमां साधिभूताधिदैवं मां अधिभूतेन अधिदैवेन च अधिभूताधिदैवे सहानेन वर्तते इति साधिभूताधिदैवं साधियज्ञमधियज्ञेन सह वर्तते इति साधियज्ञं मां जानंति ते युक्तचेतसः प्रयाणकाले मरणकालेपि मां विदुः तेषां अतिवेदनापीडितानामपि कृपया चितेआगच्छामि ३० इति पंचोले सप्तमोध्यायः ७ ॥

रणवीरसमिद्धोधिनी

साधिभूतेति अधिभूताधिदैवाधियज्ञसहितं मां परमेश्वरं ये विदुः ते युक्तचेतसः शुक्ले कर्मयोगाभ्यासेन सावधानं चेतोंतःकरणं येषां ते प्रयाणकालेपि मरणसमयेपि मां विदुः न तु तदापि मां विस्मरंतीति न तेषां स्वार्थहानिरिति भावः ब्रह्मादिपदानां व्याख्यानमग्रिमाध्याये भगवतैव क्रियते इत्यग्रे परम्यते इति भद्रं ३०॥ इतिश्रीरणवीरसमिद्धोधिन्यां भगवद्गीताव्याख्यायां सप्तमोध्यायः ७॥

मधुभाष

३० इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये सप्तमोध्यायः ७॥

भाषाअनवाद

और ऐसे मेरे भक्तों को योगसे भ्रष्ट होने की शंका नहीं है यहा
इस श्लोक से कहते है कि अधिभूत अधिदैव अधियज्ञ सहित
जो हम को जानते हैं तेई सदा सक्त चित्त मरण समय मे भी
हम को जानि पावैं हैं उस वेलाभी व्याकुल होय हम को न
ही भूलते है इससे मेरे भक्त को योगभ्रष्ट होने का डर नहीं
है श्रीधरस्वामी अध्याय भरका अर्थ कहतेहैं कि जिसके भ
क्त ही यत्न से ज्ञानलाभ करतेहै यही विज्ञानयोग नामक
सप्तम अध्याय भगवानने प्रकाशित किया ३० ॥
इतिजगन्नाथशुक्लविरचितायांमतभावतीटीकायां सप्तमोध्यायः ७

दोहा

मोहि अभिभूत अधिदैव अधियज्ञ सहित जोजान मरणसम
यभी मोहिको युगत हृदय तेहिं ज्ञान ३०॥ इतिश्री